प्रथम १० पल असगन्ध लेकर उसका चूर्ण करे और असगन्धसे आधी सोंठका चूर्ण करे और सोंठसे आधी पीपलोंका चूर्ण ले और एक पल काली मिरचका चूर्ण लेवे तज, छोटी इलायची, पत्रज, लौंग ये औषधि एक एक पल लेवे,भैंसका दूध पांचसेर, दूधसे आधा सहद और शहदसे आधा गौका घृत, १० पल मिश्री, पीछे दूध मिश्री घृत शहद चारोंको मिलाकर मिट्टीके बरतनमें डाल मन्द मन्द अग्निसे पाचन करे और जबतक उफान न आवे तबतक अग्नि देवे और जब उफान आजावे तब पूर्वोक्त असगन्ध सोंठ आदिके चूर्णको थोडे दूधमें घोलकर पूर्वोक्त दूधमें मिलादेवे. उसको फिर पचावे । जब दूध करछीसे लगने लगे तब चातुर्जात ( इलायची आदि ) को डाले, जब चावल समान भिन्न भिन्न होजाय तबतक पक्व करे, जब घृत और दूध दोनों मिलजायँ तब उतारकर इन औषधियोंको और डाले ॥ १–७ ॥

ग्रन्थिकं जीरकं छिन्नां लवङ्गं तगरं तथा । जातीफलमुशीरं च वालकं मलयोद्भवम् ॥ ८ ॥ श्रीफलाम्भोरुहं धान्यं धातकीं वंशरोचनाम् । धात्रीखदिरसारं च घनसारं तथैव च ॥ ९ ॥ पुनर्नवाऽजगन्धे च हुताशनशतावरी । मात्रा गद्याणका चैव द्रव्याणामेकविंशतिः ॥ १० ॥ सूक्ष्मचूर्णं पुरा कृत्वा योगे ह्यस्मिन्विनिक्षिपेत् ।

Aho ! Shrutgyanam

पश्चात्सुशीतलं कृत्वा स्निग्धभाण्डे निधापयेत् ॥ ११ ॥ पलार्द्धमपि भुञ्जीत यथेच्छाहारभोजनम् । कासं श्वासं तथा हन्यादजीर्णं वातशोणितम् ॥ १२ ॥ प्लीहामयं च मन्दं च आमवातं च दुर्जयम् । शोफं शूलं च वातार्द्धं पाण्डुरोगं च कामलाम् ॥ १३ ॥ ग्रहणीं गुल्मरोगं च अन्यान् वातकफोद्भवान् । एते विकारा विलयं यान्ति सूर्योदये तमः ॥ १४ ॥ एकमासप्रयोगेण वृद्धः संजायते युवा । मन्दाग्नीनां हितं बल्यं बालानां चाङ्गवर्द्धनम् ॥ १५ ॥ स्त्रीणां च कुरुते पुष्टिं प्रसवे स्तन्यवर्द्धनम् । यावत्स्तनं भवेत्स्तोकं तावद् दुग्धयुतं भवेत् ॥ १६ ॥ क्षीणानां चाल्पवीर्याणां हितं कामाग्निदीपनम् । सर्वव्याधिहरं श्रेष्ठं योगं सर्वोत्तमं विदुः ॥ १७ ॥

पीपलामूल, जीरा, गिलोय, लौंग, तगर, जायफल, खस, नेत्रबाला, चंदन, नारियलकी गिरी, नागरमोथा, धनिया, धायके फूल, वंशलोचन, आंवले, खैरसार, कपूर, सांठकी जड, अजमोदा, चित्रक, शतावर इन इक्कीस औषधियोंको छः छः मासे ले चूर्ण कर उसमें मिलाकर शीतल करे । पीछे उसको चीनी आदि चिकने बरतनमें भरकर रखदेवे. इसमेंसे आधे पलके अनुमान भक्षण कर और यथेच्छ भोजन करे. यह इतने रोगोंको नष्ट करता है-खांसी, श्वास,

Aho ! Shrutgyanam

अजीर्ण वातरक्त, तापतिल्ली, आमवात, सूजन, शूल, वादी, बवासीर, पाण्डुरोग, कामला, संग्रहणी, गोला और जो वातकफसे प्रगट रोग हैं वे सब नष्ट होते हैं जैसे सूर्योदयसे अंधकार नष्ट होता है। एक महीना खानेसे वृद्ध मनुष्य भी तरुणताको प्राप्त होता है, मंदाग्निवालेको परम हित है, बलकर्ता, बालकके अंगको पुष्ट करता है, स्त्रियोंके प्रसवमें दूध और देहको पुष्ट करै. जबतक स्तन छोटे होवें तबतक दूधसे परिपूर्ण रहें. क्षीण और अल्पवीर्यवाले पुरुषको हित है. कामदेव और अग्निका दीपन करता है, सकल व्याधियोंका हर्ता सर्वोत्तम योग है ॥ ८-१७ ॥

अफीमपाक ।

आकल्लकं केशरदेवपुष्पं जातीफलं भृङ्गसहं सपाकम् । एतानि कुर्वीत सहानि विद्वान्मूलार्द्धं भागं क्षिपनागफेनम् ॥ १॥ क्षीरेण फेनं परिपच्य बद्धा मूलात्सितां षड्गुणमानयोग्याम् । विमर्द्य कुर्याद्गुटिकां निशायां मुखे कृता कामयते शतानि ॥ २ ॥ आसेवनं यः प्रकरोति नित्यं दृढो-न्नताङ्गः स च मानवः स्यात् । स मत्तमातंगबली सकामी व्रजन्ति रोगाः क्षयजाश्च सर्वे ॥ ३ ॥

अकरकरा, केशर, लौंग जायफल, भाँग, शिंगरफ सबसे आधी अफीम प्रथम अफीमको इस प्रकार शुद्ध करे--प्रथम दोलायंत्र बनाकर इस हांडीमें शेरभर दूध भरे पीछे अफीमको किसी वस्त्रमें बांध उस हांडीमें अधर लटका देवे, नीचे अग्नि बाले जब दूध गाढा होजावे तब उस पोटलीको निकाल लेवे. पीछे उसे उस पाकमें मिलावे. इस

Aho ! Shrutgyanam

दोला यन्त्र ।



पाकमें सब औषधियोंसे छः गुनी मिश्री मिलाकर सबका मर्दन कर चार २ मासेकी गोलियां बनावे । रात्रिके समय इस गोलीको मुखमें राखे तो सौ सौ स्त्रियोंसे सम्भोग करनेकी सामर्थ्य होय. दृढदेह हाथीकासा बल, महाकामी हो और सम्पूर्ण क्षीणता आदि रोग नष्ट होवें ॥ १--३ ॥

अगस्त्यहरीतकी ।

द्विपञ्चमूलेभकणात्मगुप्ता भार्ङ्गी सटी पुष्करमूल विश्वा । पाठाऽमृताग्रंथिकशंखपुष्पीरास्नाग्न्यपामार्गबलायवासान् ॥ १ ॥ द्विपालकान्जस्य यवाढकं च हरीतकीनां च शतं गुरूणाम् । द्रोणे जलस्याढकसंयुते वा क्वाथे कृते पूतचतुर्थभागे ॥२॥ पचेत्तुलां शुद्धगुडस्य दत्त्वा पृथक्सतैलं कुडवं घृतं च । चूर्णं तु तावन्मगधोद्भवाया देयं च तस्मिन्मधुशीतसिद्धम् ॥ ३ ॥ रसायनं कल्कमथो विलिह्याद्द्वे च मयी नित्यमथाशु हन्यात् । तद्राजयक्ष्मग्रहणीप्रदोषं शोफाग्निमांद्यं स्वरभेदकंच॥४॥ पाण्डूवामयश्वासशिराविकारान हृद्रोगहिक्काविषमज्वरांश्च । मेधाबलोत्साहगतिप्रदो वै हरीतकीपाकपतिर्वरिष्ठः ॥ ५ ॥

दशमूल, गजपीपल, कौंचके बीज, भारंगी, कचूर, पुहकरमूल, सोंठ, पाढ, गिलोय, पीपलामल, शंखपुष्पी ( शंखाहूली ), रासना,

Aho ! Shrutgyanam

चित्रक, ओंगा, गंभेरन, जवासा इन सब औषधियोंको दो दो पल लेवे. बडी हरड १००, पानी ३६० पल अर्थात् २७ सेर ९ पैसे १ टंक लेवे पीछे उन हरडोंको उस पानीमें औटावे जब जलका चतुर्थांश रहे तब उतार लेवे. पीछे १० सेर गुड २० पल पानीमें औटावे ४ पल तेल ४ पल घृत ४ पल पीपलका चूर्ण पीछे पूर्वोक्त गुडमें हरड डाले और तैलादिक मिलावे, जब शीतल होजाय तब ४ पल शहद डाल. इलायची, नागकेशर, पत्रज और तज ये चारों औषधि एक एक पल डाले. यह उत्तम रसायन है. इनमेंसे दो हरड कल्कसमेत नित्य प्रातःकाल खाय तो राजयक्ष्मा, संग्रहणी, सूजन, मन्दाग्नि स्वरभेद, पांडरोग, श्वास, मस्तकरोग, हृदयरोग, हिचकी, विषमज्वर इनको नाश करे. बुद्धि बल उत्साह इनको बढावे, चलनेकी शक्तिको देवे, इस श्रेष्ठ हरडपाकको अगस्त्यऋषिने निर्माण किया है ॥ १-९ ॥

### मधुपक्कहरीतकी ।

सुपक्कपथ्यापलपञ्चकं च मूत्रे गवां प्रस्थमिते विपाच्यम् । प्रस्थे पुनः काञ्जिकदुग्धतक्रे पक्त्वा ततो निष्कुलिका विधेया ॥ १ ॥ व्योषं यवानी कुटजस्य बीजं मुस्ताजलं दाडिम-मम्लवेतसम् । सधातकीपुष्पमजाजियुग्मं कणा जटा मोचरसं सबिल्वम् ॥ २ ॥ सौवर्चलं सैन्धव-मश्मवल्कं जम्ब्वाम्रमज्जाऽतिविषा च पाठा । लवं-गजातीफलतुर्यजातान्येतानि तुल्यानि विचूर्ण-

Aho ! Shrutgyanam

तानि ॥ ३ ॥ कपित्थमाण्डूरमयोदशांशा समस्त-
चूर्णार्द्धमिता सिता च । एतैश्च पथ्या परिपूर-
र्णीया सूत्रेण युक्ता परिवेष्टनीया ॥ ४ ॥ स्थाल्यां
ततस्तक्रमधो निधाय तृणानि मुक्त्वोपरि तां
विमुच्य । मन्दाग्निना याममथो विपाच्य विहाय
सीतां मधुनिक्षिपेच्च ॥ ५ ॥ सा सेव्यमाना ग्रह-
णीप्रमेहश्वासापहा अग्निकरा सवृष्या । पाण्डवा-
मवातापहरी च पुष्टिप्रदायिका मध्वभया
प्रदिष्टा ॥ ६ ॥

पकी बडी हरड ५ पल लेवे, उनको प्रस्थभरम गौके मूत्रमें औटावे तदनन्तर कांजी दूध और छाछ इनको एक एक प्रस्थ लेकर इनमें पृथक् २ औटावे जब औट जावे तब उतारकर उनकी गुटली निकालडाले । पीछे सोंठ, मिरच, पीपल, अजवायन, इन्द्रयव, नागरमोथा, हाऊबेर, आनारदाना, अमलबेंत, धावडाके फूल, जीरा सुफेद, जीरा काला, पीपल, जटामांसी मोचरस बेलगिरी, काला नोन, सेंधानोन, पाषाणभेद, आमकी गुठली, जामुनकी गुटली, अतीस, पाढ, लौंग, जायफल, इलायची, नागकेशर, तज, पत्रज इन सबको बराबर लेवे कैथ, मंडूर दशांश लेवे, सब चूर्णसे आधी मिश्री लेवे इन सबको कूट पीस चूर्ण कर उन हरडोंमें भरे पीछे उन हरडोंको डोरेसे बांध देवे. पीछे मिट्टीके पात्रमें छाछ भरकर हरडोंको बांधकर उसमें लटका देवे पीछे मन्दाग्निसे उनको पचावे जब पकजावे तब उतारकर शीतलकर शहदमें डुबोदेवे. इनके खानेसे संग्रहणी, श्वास, खांसी, प्रमेह दूर होवे और जठराग्निको बढावे, वृष्य, है,

Aho ! Shrutgyanam

पांडुरोग आमवात नष्ट होवे पुष्टिकर्त्ता यह मधुपक्वहरीतकी है इसी प्रकार आंवलेका पाक बनाना ॥ १–६ ॥

आमलापाक ( च्यवनप्राश )

शृङ्गीतामलकीफलत्रिकबलाच्छिन्नाविदारीसटी-
जीवंतीदशमूलचन्दनघनैर्नीलोत्पलैलावृषैः। मृद्वी-
काष्टकवर्गपौष्करयुतैः सार्द्धं पृथक्पालकैरंबुद्रोण-
शतानि पंचविपचेद्धात्रीफलानामतः॥ १ ॥ उद्धृ-
त्यामलकानि तैलघृतयोः षड्भिः पलैः संमिता
भृष्टान्यर्द्धतुलां निधाय विधिवन्मत्स्यण्डिकायां
पचेत् । शीते षण्मधुनापलानि कुडवा वंश्यश्च-
तुर्जातकं मुष्टिर्मागधिकापलद्वयमितः प्राश्यः
स्मृतश्च्यावनः॥ २ ॥ रक्तपित्ते क्षये क्षीणे कासे
कुष्ठे भ्रमे तृषि । आमलक्यादिकः पाको वली-
पलितनाशनः ॥ ३ ॥

काकडासिंगी, तालीसपत्र, त्रिफला, खरैंटी, गिलोय, विदारीकन्द, कचूर, जीवंती ( डोडी ), दशमूल, चन्दन, भीमसेनी कपूर, कमलगट्टा, इलायची, अडूसा, दाख, अष्टवर्ग, पुहकरमूल ये सब औषधि दो दो पल लेकर, पानी एक द्रोण ( ४०९६ टंक ) में आमलोंको औटावे पीछे निकालकर तेल और घृत दोनो छः पल लेकर इनमें आंवलोंको जुदे २ भूने पीछे ५ सेर मिश्रीकी चासनी कर उसमें आंवलोंको पाग लेवे जब शीतल होजावें तब छः पल शहद डाल और वंशलोचन, चातुर्जात, पीपल ये दो पल डाले यह च्यवनप्राशाव-

Aho ! Shrutgyanam

लेह है । इसके खानेसे रक्तपित्त, क्षयसे जो क्षीण होगया हो, खांसी, कुष्ठ, भ्रम, प्यास इन सब रोगोंको यह आमलापाक नाश करे तथा मुलझटका पडना और सफेद बाल होनेको नाश करे ॥ १-३ ॥

अडूसापाक १--२ ।

वासाक्षुद्राग्निपथ्यामलकफलयुतं पञ्चमूलद्वयं च झिंझिण्याः क्काथमेनं वसुगुणपयसा पाचितं तुर्य-भागः । ग्राह्यस्तस्मिन्गुडमिति ततो निक्षिपेत्पा-चयेच्च निक्षेप्या व्योषयुक्ता बलमुशलियुता जातकं साथरी च ॥ १ ॥ शृंगाटकं बिल्वगिरं हरिद्रां खैरीरगुंदं च शतावरीं च । जातीफलं माजुफलं कबाबी आकल्लिकं मालविकाजगंधाम् ॥ २ ॥ सजातिपत्री फटिका प्रियंगु गुन्दीफलं क्षौद्रयुतं घृतं च । चूर्णं क्षिपेदिक्षुरसे सुपक्के लेहो भवे-द्वासकसंज्ञकोऽयम् ॥ ३ ॥ कासश्वासहरः सदा बलकरः कामाग्निसन्दीपनो लेहोऽयं सरुजाम-भीष्टफलदः प्रोक्तः स वासाह्वयः ॥ ४ ॥

१- अडूसा, कटेरी, चित्रक, हरड, आंवला ये औषधि दो दो पल लेवे, दशमूल, झिंझणी ( डिडून ) का काढा इन सब औषधियोंको आठ गुने पानीमें औटावे जब चौथाई बाकी रहे तब उतारकर गुड मिलावे और उसमें पूर्वोक्त औषाधियोंको मिलाकर परिपक्व करे । पीछे इन औषधि-

Aho ! Shrutgyanam

योंको डाले-सोंठ, मिरच, पीपल, खरैंटी, मुसली, चातुर्जात, अजवायन, सिंघाडा, बेलगिरी, हलदी, खैरका गोंद, शतावर, जायफल, माजूफल, कबाबचीनी, अकरकरा, मालवनी, बावची, असगंध, जावित्री, फिटकरी, प्रियंगु, चिरौंजी, गोंदीके फल, शहद, घृत इन सब औषधियोंको मिलावे तो यह वासावलेह बनकर तैयार हो । यह खांसी श्वासको हरे, बल करे, कामाग्निको बढावे, संपूर्ण रोगोंको यह वासावलेह दूर करता है ॥ १-४ ॥

**तुलामादाय वासायाः पचेदष्टगुणे जले । तेन पादावशेषेण पाचयेदार्द्रकं भिषक् ॥ १ ॥ हरीतकीनां चूर्णस्य सिता शुद्धा तथाशतम् । शीतीभूते क्षिपेत्तत्र क्षौद्रस्याष्टौ पलानि च ॥ २ ॥ वंशीत्वगायाश्चत्वारि पिप्पल्यष्टपलं तथा । चातुर्जातपलं चैव लेहोऽयं संप्रणाशयेत् । रक्तपित्तं क्षयं चैवश्वासमग्नेश्च मन्दताम् ॥ ३ ॥**

२-अडूसा एक तुला लेवे, उसको अठगुने पानीमें औटावे जब चतुर्थांश जल शेष रहे तब उसमें ११४ टंक हरड औटावे । पीछे १०० पल मिश्री मिलाकर अवलेह बनावे जब शीतल होजाय तब ८ पल शहद डाले और ८ पल वंशलोचन, ८ पल पीपल, १ पल चातुर्जात डाले यह अवलेह रक्तपित्त, क्षय, श्वास और मन्दाग्निका नाश करे ॥ १-३ ॥

**वासकस्य रसप्रस्थं प्रस्थार्द्धं मधुशर्करे । पिप्पल्या द्विपलं साज्यं सम्यग्लेहं विपाचयेत् ॥ १ ॥ श्रेष्ठो बलावलेहोऽयं राजयक्ष्मनिषूदनः । कासश्वासहरः प्रोक्त उरःक्षतहरस्तथा ॥ २ ॥**

Aho ! Shrutgyanam

२-अडूसेका रस एक प्रस्थ लेवे और आधा प्रस्थ शहद और मिश्री लेवे, दो पल पीपल, दो पल घृत लेकर अवलेह बनावे । यह वासावलेह राजयक्ष्माका नाश करे । खांसी श्वास और उरःक्षतको दूर करे ॥ १-२ ॥

भारंगीपाक ।

शतभागं तु भार्ङ्ग्याश्च दशमूलं ततः परम् ।
शतं हरीतकीनां च पचेत्तोये चतुर्गुणे ॥ १ ॥
पादशेषे ततस्तस्मिन्नन्यवस्त्रेण गालयेत् । आ-
लोड्य च तुलां पूतगुडस्य च क्षिपेत्ततः ॥ २ ॥
पुनः पचेत मन्दाग्नौ यावल्लेह्यत्वमाप्नुयात् ।
शीते च मधुनश्चात्र षट् पलानि प्रदापयेत् ॥ ३ ॥
त्रिकुटं त्रिसुगन्धं च पलैकानि पृथक्पृथक् । कर्ष-
द्वयंयवक्षारं संचूर्ण्य प्रक्षिपेत्ततः ॥ ४ ॥ भक्षये-
दभयामेकां लेह्यस्यार्द्धपलं लिहेत् । श्वासं सुदा-
रुणं हन्ति कासं पञ्चविधं तथा ॥ ५ ॥

भारंगी १०० टंक लेवे. १०० टंक दशमूल, १०० टंक हरड इन सबको चौगुगे जलमें डालकर औटावे जब चतुर्थांश जल शेष रहे तब उतारकर वस्त्रसे छानकर उसमें १६०० टंक गुड डालकर मन्दाग्निसे औटावे जब अवलेह होजाय तब शीतल कर ९७ टंक शहद डाले और त्रिकुटा, त्रिसुगंध ( तज, पत्रज, इलायची ये सब औषधि जुदी जुदी कूट पीसकर डाले ८ टंक जवाखार डाले इनमेंसे एक हरड नित्य प्रातःकाल खावें और अवलेह टंक ८ पीवे तो घोर श्वास और पांच प्रकारकी खांसीका नाश करे ॥ १-५ ॥

Aho ! Shrutgyanam

## कटेरी पाक ।

समूलपत्रान्वितकण्टकार्यास्तुलां जले द्रोणपरि-
प्लुतां च । रीतकीनां च शतं निदध्याद्दत्त्वाऽत्र
पक्त्वा चरणावशेषम् ॥ १ ॥ गुडस्य दत्त्वा शत-
मेतदग्नौ सुपक्वमुत्तार्य ततः सुशीते । कटुत्रिकं
च त्रिफलाप्रमाणं पलानि षट्पुष्परसानि तत्र॥२॥
तुगाक्षीरी च गायत्री भार्ङ्गी कर्कटशृङ्गिका । कट्-
फलं पुष्करं वासा क्षिपेदर्द्धपलोन्मितान् ॥ ३ ॥
क्षिपेच्चतुर्जातफलं यथाग्नि प्रयुज्यमानो विधिना-
ऽत्रलेहः । वातात्मकं पित्तकफोद्भवं च द्विदोषजं
कासमपि त्रयं च ॥ ४ ॥ क्षतोद्भवं च क्षयजं च
हन्यात् सपीनसं श्वासमुरःक्षतं च । यक्ष्मागमेका
दशमुग्ररूपं भृगूपदिष्टं हि रसायनं च ॥ ५ ॥

कटेरीका पञ्चांग १०० पल ४०९६ टंक पानीमें हरड १०० डाल-कर औटावे, जब चतुर्थांश जल शेष रहे तब उतारलेवे, उस जलको छानकार १०० पल गुड डालकर औटावे, पीछे उतार शीतल कर ३ पल त्रिकुटा ६ पल शहद डाले और वंशलोचन, खैरसार, काकडासिंगी, कायफल, पुहकरमूल, अडूसा ये औषधि आठ आठ टंक डाले और १ पल चातुर्जात डालकर अवलेह बनावे । इसमेंसे मनुष्यकी अग्नि देखकर खानेको देवे तो वात, पित्त, कफ, द्विदोष, त्रिदोष इनके विकारसे उत्पन्न खांसी, उरःक्षतकी खांसी, क्षय, पीनस, श्वास, उरःक्षत और ग्यारह प्रकारकी यक्ष्माको दूर करे. यह अवलेह भृगुऋषिने कहा है ॥ १-५ ॥

Aho ! Shrutgyanam

भिलावा पाक ।

भल्लातकानां पवनोद्धुतानां वृन्ताच्च्युतानां च
तथाऽऽढकं स्यात् । तच्चेष्टकाचूर्णचयं विघृष्य
प्रक्षाल्य तोये विसृजेत् प्रवाते ॥ १ ॥ शुष्कं
पुनस्तद्द्विदलीकृतं च ततः पचेदप्सु चतुर्गुणासु ।
तत्पादशेषं परिपूतशीतं क्षीरे पचेत्तच्च पुनस्त-
थैव ॥ २ ॥ घृतांशयुक्तेन घनं यथा स्यात्सितो-
पलैःषोडशभिः पलैश्च । विमृश्य संस्थाप्य दिनानि
सप्त ततः प्रयुज्याग्निबलेन मात्राम् ॥ ३ ॥ जये-
द्विकारानखिलांश्च कुष्ठान् दृष्टिं च दीप्तिं च बलं
करोति । शतायुषं चैव नरं विधत्तेराजा ह्ययं सर्व-
रसायनानाम् ॥ ४ ॥

पवनसे टूटकर गिरे भिलावे एक आढक ( ४०९६ टंक ) ले मोटे कपडेमें बांधकर पृथ्वीमें पछाडे, पीछे ईंटके कुकुआसे मसल पानीसे धोकर शुद्ध करे और हवामें रख देवे, जब सूखजायँ तब दो दो टुकडे कर चौगुने जलमें औटावे, जब चतुर्थांश जल शेष रहे तब वस्त्रमें छानलेवे, पीछे चौगुना दूध डालकर फिर औटावे, जब चतुर्थांश दूध शेष रहे. तब निकालकर घृतमें पकावे, पीछे १६ पल मिश्रीकी चासनीमें पाक बनालेवे । इसको चीनी वा काचके पात्रमें सात दिन रखकर पीछे बराबर देखकर खानेको देवे तो सम्पूर्ण कुष्ठके विकारोंका नाश करे, दृष्टिको बढावे, बल करे, सौ वर्षकी आयु होय, यह सब रसायनोंका राजा है. अथवा खांडकी चासनी करके इला

Aho ! Shrutgyanam

यची, कपूर, लौंग, तज, पत्रज, नागकेशर, जावित्री, जायफल इन सब औषधियोंका ३२ टंक चूर्ण डाले, पीछे अवलेह बनाकर घृतके चिकने बरतनमें रखदे और धानमें आठ दिन गाडकर खावे, इसपर तेल लगाना, खारा खट्टा खाना वर्जित है ॥ १-४ ॥

### सूरणपाक ।

त्रिवृत्तेजोवती दन्ती श्वदंष्ट्रा चित्रकं सटी । गवाक्षी विश्वमुस्ता च विडङ्गा च हरीतकी ॥ १ ॥ पलोन्मितानि चैतानि पलान्यष्टौ च रुक्षराः । तावत्फलं वृद्धदारु सूरणस्य तु षोडश ॥ २ ॥ जलद्रोणद्वये क्वाथ्यं चतुर्भागावशेषितम् । पूर्वं तु तं रसं भूयः क्वाथेभ्यस्त्रिगुणो गुडः ॥ ३ ॥ लेहं पचेत्तु तं ताव द्यावद्दर्वीप्रलेपनम् । अवतार्य ततः पश्चाच्चूर्णानीमानि दापयेत् ॥ ४ ॥ त्रिवृत्तेजोवती कन्दचित्रकान्द्विपलांशकान् । एलात्वङ्मरिचं चापि नागाह्वं चापि षट्पलम् ॥ ५ ॥ द्वात्रिंशत्पलकं चैव चूर्णं दत्त्वा निधापयेत् । ततो मात्रां प्रयुञ्जीत जीर्णे क्षीणे रसायने ॥ ६ ॥ पञ्च गुल्मान् प्रमेहांश्च पाण्डुरोगं हलीमकम् । जयेदर्शांसि सर्वाणि तथा सर्वोदराणि च ॥ ७ ॥ रसायनवरश्चैव मेधाजननकारकः । गुडः श्रीबाहुशालोऽयं दुर्नामारिः प्रकीर्तितः ॥ ८ ॥



Aho ! Shrutgyanam

निसोथ, मालकांगनी, इँतून, गोखरू. चित्रक, कचूर, इन्द्रायण, सोंठ, नागरमोथा, वायविडंग, हरड इन औषधियोंको सोलह सोलह टंक लेवे. पानी ८१९२ टंक लेवे, भिलावे ८ पल, विधायरा ८ पल, जमीकन्द १६ पल इन सबको पूर्वोक्त जलमें डालकर औटावे. जब चौथाई शेष रहे तब उतारकर क्वाथसे तिगुना गुड डालकर औटावे और कडछीसे चलाता जाय, आगे कहे प्रकारसे अवलेह बनालेवे। जब कडछीमें लिपटने लगे, तब उतारकर ये चूर्ण और डाले–निसोथ, मालकांगनी, सूरण ( जमीकंद ), चित्रक इनको बत्तीस बत्तीस पल लेवे । इलायची छोटी, तज, मिरच, नागकेशर ये औषधि और छः छः पल लेवे, इन सबको उस अवलेहमें डालकर रक्खे, पीछे इसकी मात्रा देवे अजीर्णतामें और क्षीणतामें यह रसायन है. पांच प्रकारके गुल्म, प्रमेहमात्र, पांडुरोग, हलीमक सर्व प्रकारकी बवासीर तथा सर्व प्रकारके उदररोगपर यह उत्तम रसायन है । तीव्र बुद्धि करे, यह बाहुशाल गुड दुर्नाम ( बवासीर ) का शत्रु है शास्त्रान्तरमें इसको बाहुशालगुड कहते हैं ॥ १-८ ॥

## आर्द्रकपाक ।

चूर्णितं चार्द्रकप्रस्थं गुडप्रस्थेन पाचयेत् ।
सर्पिषः कुडवं दत्त्वा चूर्णं तं वेदमापचेत् ॥ १ ॥
चातुर्जातफलं व्योषं त्रिफला तुर्यभागकाः ।
लवंगमभया भार्ङ्गी वृषं भूनिंबपौष्करम् ॥ २ ॥
देवदार्वश्वगंधा च जातीपत्रफलागुरु ।
गायत्रीसारमृद्वी च द्विगुणं च रसं क्षिपेत् ॥ ३ ॥
कासं श्वासं क्षयं शोषं पण्ढैकादशरूपिणम् ।
श्लेष्मप्रकोपमामं च मंदाग्निमुदरग्रहम् ॥ ४ ॥

Aho ! Shrutgyanam

हृद्रोगं रक्तदोषं च हन्ति वर्णाग्निवृद्धिकृत् ।
बलपुष्टिप्रदो वृष्य आर्द्रको लेह उच्यते ॥ ९ ॥

अदरखको छील टुकडे कर उनको घीमें डालकर लोहे या मिट्टीकेपात्रमें भूने, पीछे जितना अदरख लेवे उतना गुड लेकर उसमें उस अदरखको डालकर औटावे, कडछीसे चलाता जाय, जब अच्छे प्रकार परिपक्क होजाय तब इतनी औषधि और मिलावे -सोंठ, जीरा, मिरच, नागकेशर, जावित्री, इलायची, तज, पत्रज, पीपल धनियां, काला जीरा, पीपलामूल, वायविडंग ये औषधि शीतल होनेपर मिलाकर रख छोड़े, आठ टंक नित्य शीतकालमें खाय तौ श्वास, खांसी, बहरापन, स्वरभंग, अरुचि, हृद्रोग, संग्रहणी, गोला, शूल, सूजन इतने रोग नष्ट होवें ॥ १-९ ॥

लहसनपाक ।

तदुग्रगन्धमादाय रात्रौ तक्रे विनिक्षिपेत् ।
प्रातर्निस्सार्य तत्पिष्ट्वा ततो दुग्धे विपाचयेत् ॥ १ ॥
निस्तुषं लशुनं प्रस्थं क्षीरप्रस्थचतुष्टये ।
विपाच्य सांद्रीभूतेऽस्मिन्सर्पिषः कुडवं क्षिपेत् ॥ २ ॥
रास्ना वरी वृषा च्छिन्ना सटी विश्वा सुरद्रुमम् ।
वृद्धदारुकदीप्याग्निसुताह्वा सपुनर्नवा ॥ ३ ॥
फलत्रयं पिप्पली च कृमिघ्नः कर्षसंमितः ।
विचूर्ण्य शीते मधुनः कुडवं तत्र योजयेत् ॥ ४ ॥
शीतया भक्षयेन्मात्रां मांद्यवाते हनुग्रहे ।
आक्षेपकादिभग्नेषु कक्षोरुस्तम्भहृद्ग्रहे ॥ ५ ॥

Aho ! Shrutgyanam

**सर्वाङ्गसन्धिभग्ने च वातजाशीतिरोगिणे ।**
**पथ्यो लशुनपाकोऽयं वर्णायुः- पुष्टिकारकः ॥ ६ ॥**

लहसनकी दुर्गंधि दूर करनेके निमित्त रात्रिको छाछमें भिगोदे, प्रातःकाल छाछमेंसे निकालकर छिलका दूर कर पीसे फिर चौगुने दूधमें औटावे, जब खोवा होजाय तब घी ६४ टंक डाले । रास्ना, शतावर, अडूसा, गिलोय, कचूर, सोंठ, देवदारु, विधायरा, अजमायन, चित्रक, सांठकी जड, त्रिफला, पीपल, वायविडंग ये औषधि चार टंक लेवे, सबका चूर्ण कर पूर्वोक्त खोवामें मिलावे. सबकी बराबर मिश्री ले चासनी कर अवलेह बनावे, जब शीतल होजाय तब ६४ टंक शहद उसमें डाले तो यह लहसुनपाक बनकर तैयार होवे । यह पाक मन्दवात, हनुग्रह, आक्षेपकादि भग्नरोग, कमर ऊरु जकडना, हृदयका जकडना, सर्वांगमें स्थित वात, संधियोंमें स्थित वात और अस्सी प्रकारके वातरोगको नष्ट करे, यह लहसनपाक पथ्यरूप है. वर्ण, आयु और पुष्टिका कर्ता है. अथवा घी तेल मिलाकर ले, सो ग्रन्थान्तरोंमें लिखा भी है. लहसनका तेल और घृत मिलाकर प्रातःकाल सूर्योदयके समय खानेसे विषमज्वर और वातके विकारको नष्ट करे, बुढापेको दूर करे, इसके खानेसे मनुष्य कामदेवसे भी अत्यन्त सुन्दर होवे ॥ १-६ ॥

स्त्री योग्य कसेलापाक ।

**कसेलं कुडवं चैव घृतं देयं च तत्समम् ।**
**गोक्षीरमाढकं देयं पचेत्सम्यग्भिषग्वरः ॥ १ ॥**
**उत्तार्य च क्षिपेत्तत्र गुन्द्रकोलं पलद्वयम् ।**
**खण्डप्रस्थद्वयं चैव पाकिं कृत्वा क्षिपेत्पुनः ॥ २ ॥**
**व्योषं पाषाणभेदं च लोहं जाती शतावरी ।**

Aho ! Shrutgyanam

मंजिष्ठा धातकी माजू बिल्वमोचरसं तथा ॥ ३ ॥
एतेषां शुक्तिमात्रं च चतुःकर्षं च मोदकम् ।
स्त्रीप्रदरं निहन्त्याशु योनिदोषं च शाम्यति ॥ ४ ॥

कसेला ६४ टंकको घृत ६४ टंकमें पकावे पीछे गौका दूध १०२४ टंक डालकर उत्तम वैद्य भली भाँतिसे खोवा करे. पीछे इसको उतारकर बबूलका गोंद ३२ टंक लेवे उसमें घी डालकर तल लेवे, ५१२ टंक खांडकी चासनी कर उसमें पूर्वोक्त गोंद और खोवा डालकर इन औषधियोंको और मिलावे--सोंठ, मिरच, पीपल, पाषाणभेद, लोध, जावित्री, शतावर, मँजीठ, धायके फूल, माजूफल, बेलगिरी, मोचरस ये सब औषधि दो दो कर्ष लेवे. सबको मिलाकर चार कर्षके अनुमान लड्डू बनावे, इसके खानेसे स्त्रियोंका प्रदर और योनिके दोष दूर होवें ॥ १-४ ॥

अण्डीपाक ।

निस्तुषं बीजमैरण्डं पयस्यष्टगुणे पचेत् ।
तस्मिन्पयसि शोषं च तं बीजं परिपेषयेत् ॥ १ ॥
पश्चाद् घृतेन संयुक्तं सम्पचेन्मृदुवह्निना ।
कटुत्रिकं लवङ्गं च एला त्वक्पत्रकेशरम् ॥ २ ॥
अश्वगन्धाशिफा रास्ना षड्गन्धा रेणुका वरी ।
लोहं पुनर्नवा श्यामा उशीरं जातिपत्रकम् ॥ ३ ॥
जातीफलमभ्रकं च सूक्ष्मचूर्णं तु कारयेत् ।
शीतीभूतेऽवलेहोऽयं तस्मिन्खण्डं समोदयम् ॥ ४ ॥
वातारिपाकनामाऽयं प्रातरुत्थाय भक्षितः ।
अशीतिवातरोगांश्च चत्वारिंशच्च पैत्तिकान् ॥ ५ ॥

Aho ! Shrutgyanam

उदराणि तथा चाष्टौ शोफरोगान्निहन्ति च ।
विंशतिं मेहजान् रोगान्षष्टिं नाडीव्रणानि च ॥ ६ ॥
हन्त्यष्टादश कुष्ठानिक्षयरोगांश्च सप्त च ।
पंचैव पाण्डुरोगाणि पंच श्वासान्प्रणाशयेत् ॥ ७ ॥
चतुरो ग्रहणीरोगान्हृद्रोगं च गलग्रहम् ॥
अनेकवातरोगाणि तानि सर्वाणि वारयेत् ॥ ८ ॥
शुक्तापाकेति विख्यातः सर्वरोगनिवारणे ॥ ९ ॥

नागपुरीययतिगणश्रीहर्षकीर्तिसंकलिते ।
वैद्यकसारोद्धारे प्रथमः पाकाधिकारोऽयम् ॥ १ ॥

अरण्डीक छिलके दूर कर आठगुने दूधमें औटावे, जब दूध सूख जाय तब पीसकर घृत मिलाय पचावे. त्रिकुटा, लौंग, इलायची, पत्रज, तज, केशर, असगन्ध, सोवाके बीज, पीपलामूल, रेणुका, शतावर, सार, सांठकी जड, दारुहलदी, उशीर, जावित्री, जायफल, अभ्रक ये औषधि सब बराबर लेवे, सबका चूर्ण कर पीछे अवलेह करे जब शीतल होजाय तब सब औषधियोंकी बराबर खाण्ड डाले। यह वातारिनाम पाक है। इसको प्रातःकाल भक्षण करे तो अस्सी प्रकारके बातरोग, चालीस प्रकारके पित्तरोग, आठ प्रकारके उदरविकार, सूजन, बीस प्रकारक प्रमेह, साठ प्रकारके नाडीव्रण, अठारह प्रकारके कुष्ठ, सात प्रकारकी क्षय, पांच प्रकारके पाण्डुरोग, पांच प्रकारके श्वास, चार प्रकारकी संग्रहणी, हृदयरोग, गलग्रह, अनेक वादीके रोग इन सबको नष्ट करता है। यह शुक्तापाकनामसे विख्यात है, इसी प्रकार और भी, पाक वैद्य अपनी बुद्धिसे बना लेवे ॥ १-९ ॥

इति श्रीमाथुर दत्तरामचौबेकृत माथुरीमञ्जूषा भाषाटीकायां
पाकाधिकारः प्रथमोऽध्यायः ॥ १ ॥

Aho ! Shrutgyanam

# अथ चूर्णाधिकारः-द्वितीयोऽध्यायः २.

कुंकुमादिचूर्ण ।

कुंकुमं मन्दनी मुस्ता चातुर्जातफलत्रिकम् ।
आकल्लमभ्रकं धान्यं दाडिमं मरिचं कणा ॥ १ ॥
यवानी तंतडीकं च हिंगुलं घनसारकम् ।
तुम्बरं तगरं तोयलवंगं जातिपत्रिका ॥ २ ॥
समंगा पुष्करं श्यामा पद्मबीजं तुगा सटी ।
तालीसं चित्रकं मांसी जातीफलमुशीरकम् ॥ ३ ॥
बला नागबला मांसी कुष्ठग्रंथिकमाषिकाः ।
यावंत्येतानि सर्वाणि तावन्मोचरसं ददेत् ॥ ४ ॥
सर्वतुल्या सिता योज्या कर्षमात्रं तु भक्षयेत ।
प्रभाते च निशादौ च भोजनान्ते विशेषतः ॥ ५ ॥
संध्याकाले तथा भोज्यं वाजीकरणमुत्तमम् ।
अजीर्णं जरयत्याशु नष्टाग्नेश्चाग्निदीपनम् ॥ ६ ॥
अशीतिवातजान् रोगांश्चतुर्विंशतिपैत्तिकान् ।
विंशतिश्लेष्मजांश्चैव हृल्लासं छर्द्यरोचकम् ॥ ७ ॥
पञ्चैव ग्रहणीदोषानतिसारं विशेषतः ।
क्षयमेकादशं श्वासं कासं पञ्चविधं तथा ॥ ८ ॥
उदरव्याधिनाशं च मूत्रकृच्छ्रं गलग्रहम् ।
पुत्रं जनयते वंध्या सेव्यमाने तथौषधे ॥ ९ ॥

Aho ! Shrutgyanam

सन्निपातातुरं चैव विस्फोटकभगन्दरम्।
नेत्ररोगं शिरोरोगं कर्णमन्याहनुग्रहम् ॥ १० ॥
हृद्रोगं कण्ठरोगं च जानुजंघागतं तथा।
सर्वरोगविनाशाय चरकेण प्रभाषितम् ॥ ११ ॥

केशर, कस्तूरी, चातुर्जात, त्रिफला, अकरकरा, अभ्रक, धनियाँ, अनारदाना, मिरच, पीपल, अजमायन, तंतडीक, हिंगुल, कपूर, तुंबरू, तगर, नेत्रवाला, लौंग, जावित्री, मँजीठ अथवा लजालू, पोहकरमूल, प्रियंगु, कमलगट्टा, वंशलोचन, कचूर, तालीसपत्र, चित्रक, छड, जायफल, खस, खरेटी, गंगेरनकी छाल, सोनामक्खी, कूठ, पीपलामूल, उडद ये सब औषधि बराबर लेवे तथा सबकी बराबर मोचरस और सबकी बराबर मिश्री मिलावे, इस चूर्णको प्रातःकाल, सायंकाल और भोजनके अन्तमें वा रात्रिमें खाय तौ वाजीकरण करता है. अजीर्णको तत्काल नष्ट करे. मन्दाग्निको प्रबल करे, अस्सी प्रकारके वातरोग, चालीस प्रकारके पित्तरोग, बीस प्रकारके कफरोग, सूखी रद्द, वमन, अरुचि. पांचप्रकारकी संग्रहणी, अतीसार, ग्यारह क्षयरोग, श्वास, पांचप्रकारकी खांसी, उदररोग, मूत्रकृच्छ्र और गलग्रह इन सबका नाश करे। इस चूर्णके खानेसे वंध्याके पुत्र होय, सन्निपात, विस्फोटक, भगंदर, नेत्ररोग, शिरके रोग, कर्णरोग, मन्यानाडीका जकडना, हनुग्रह, हृदयरोग, कंठरोग और जानुके रोग इन रोगोंसे आदि ले सर्वरोग नष्ट करनेके निमित्त चरकऋषिने कहा है ॥१-११॥

लवङ्गादि चूर्ण।

लवंगक कोलमुशीरचदनं नतांसनीलोत्पलकृष्ण-
जीरकम्। एलासकृष्णागरनागकेशरं कणं सवि-
श्वानलदं सहांबुना ॥ १ ॥ कर्पूरजातीफलवंश-
लोचना सितार्द्धमात्रासमसूक्ष्मचूर्णितम्। सरोचनं

Aho ! Shrutgyanam

तर्पणमग्निदीपनं बलप्रदं वृष्यतमं त्रिदोषनुत् ॥ २ ॥ अर्शोविबन्धं तमकं गलग्रहं सकासहिक्कारुचियक्ष्मपीनसम् । ग्रहण्यतीसारमथासृजःक्षयं प्रमेहगुल्माश्च निहंति सत्वरम् ॥ ३ ॥

लौंग, कंकोल, खस, सफेद चन्दन, तगर, नीलकमल, कालाजीरा, छोटी इलायची, काला अगर, नागकेशर, पीपल, सोंठ, छड, नेत्रवाला, कपूर, जायफल, वंशलोचन ये सब औषधि बराबर लेवे, सबकी बराबर मिश्री मिलावे । यह चूर्ण रुधिरकर्त्ता, इंद्रियोंकी पुष्टि करे, अग्निको दीप्त करे, बल करे, वृष्य है, त्रिदोषको हरे । बवासीर, अफारा, तमकश्वास, गलग्रह, खांसी, हिचकी, अरुचि, यक्ष्मा, पीनस, संग्रहणी, अतीसार, रुधिरके विकार, क्षय, प्रमेह और गोला इन सबको शीघ्र नाश करता है ॥ १-३ ॥

बृहल्लवङ्गादिचूर्ण ।

लवङ्गमेला तजपत्रजोत्पलं ह्युशीरमांसी तगरं सवालकम् । कङ्कोलकृष्णागरुनागकेशरं जातीफलं चन्दनजातिपत्रिका ॥ १ ॥ द्व्यजाजिका त्र्यूषणपुष्करं सटी फलत्रिकं कुष्ठविडंगचित्रकम् । तालीसपत्रं सुरदारु धान्यकं यवानि मिष्टाखदिराम्लवेतसम् ॥ २ ॥ तुगाऽजमोदा घनसारमभ्रकं शृङ्गी वृषाग्रंथिकमग्निमंथकम् । प्रियंगुमुस्तातिविषा शतावरी सत्त्वं गुडूच्यास्त्रिवृतादुरालभा ॥ ३ ॥ समानि सर्वैश्च समा सिता भवेद्बृहल्लव-

Aho ! Shrutgyanam

ङ्गादिरयं निगद्यते । सायं प्रगे खादति कर्षसंमितं
भवन्ति देहे बलवीर्यपुष्टयः ॥ ४ ॥
निहतं दीपयत्यग्निं तनुवर्णकरं परम् ।
वातघ्नं नेत्रहृदयकण्ठजिह्वाविशोधनम् ॥ ५ ॥
प्रमेहकासारुचियक्ष्मपीनसक्षयास्रदाहग्रहणीत्रिदो-
षनुत् । हिक्कातिसारप्रदरं गलग्रहं निहन्ति
पाण्डुं स्वरभंगमश्मरीम् ॥ ६ ॥

लौंग, इलायची, तज, पत्रज, कमलगट्टाकी मिंगी, खस, छड, तगर, नेत्रवाला, कंकोल, काली अगर, नागकेशर, जायफल, सफेद चन्दन, जावित्री, दोनों जीरे, सोंठ, मिरच, पीपल, पोहकरमूल, कपूर, हरड, बहेडा, आंवला, कूठ, बायविडंग, चित्रक, तालीसपत्र, देवदारु, धनियां, अजमायन, मुलहठी खैरसार, अम्लवेत, वंशलोचन, अजमोद, भीमसेनीकपूर, अभ्रक, काकडासिंगी, अडूसा, पीपलामूल, अरनी, फूलप्रियंगु, मोथा, अतीस, शतावरी, गिलोयका सत्त्व, निसोथ, जवासा इन सब औषधियोंको बराबर लेकर सबकी बराबर मिश्री मिलावे। यह 'बृहल्लवङ्गादि चूर्ण' है इसको सायंकाल और प्रातःकालके समय चार टंकके अनुमान नित्य खाय तो देहमें बल और वीर्यकी पुष्टता होवे । प्रमेह, खांसी, अरुचि, राजयक्ष्मा, पीनस, क्षय. रुधिर-जन्यदाह, संग्रहणी, त्रिदोष, हिचकी, अतीसार, प्रदर, गलग्रह, पांडु-रोग, स्वरभंग और पथरी दूर होवे, अग्निको दीपन करे, देहका वर्ण उत्तम करे । वातके रोग, नेत्रके रोग, हृदय और कंठके रोग नष्ट होवें, जिह्वाको शुद्ध करे ॥ १-६ ॥

Aho ! Shrutgyanam

पिपल्यादिचूर्ण ।

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ।
मरिचेन समायुक्तं बुधैः षट्कटु कथ्यते ॥ १ ॥

पीपल, पीपलामूल, चव्य, चित्रक, सोंठ, मिरच इनको पंडित षट्कटु कहते हैं ॥ १ ॥

शुंट्यादिचूर्ण ।

सविश्वसौवर्चलपुष्कराह्वयं सहिङ्गुमुष्णोदकपीत-
मेतत् । हृत्कोष्ठपृष्ठान्तचरं क्षणांतः शूलं जय-
त्याशु मरुत्कफोत्थम् ॥ १ ॥

सोंठ, कालानोन, पोहकरमूल, हींग इनका चूर्ण गरम जलके साथ पीनेसे हृदय, कोठा, पीठ, पेट आदिका शूल तथा वादी और कफका शूल तत्क्षण नष्ट होता है ॥ १ ॥

त्रिकुटादि चूर्ण ।

त्रिकुटं ग्रन्थिकं ब्राह्मी रेणुकाकल्लपुष्करम् । लवं-
गमश्वगंधा च किरातं हपुषा मटी ॥ १ ॥ रास्ना
श्वेता वचाभृङ्गं सर्वमेकत्र चूर्णयेत् । सन्निपाते
महावाते चूर्णमेतत् सदा हितम् ॥ २ ॥

सोंठ, मिरच, पीपल, पीपलामूल, ब्राह्मी, रेणुका, अकरकरा, पोहकरमूल, लौंग, असगंध, चिरायता, हाऊबेर, कचूर, रास्ना, सफेद बच, भांगरा सब बराबर लेकर चूर्ण करे। यह चूर्ण सन्निपात और घोर वातव्याधि दूर करनेको अत्यन्त हित है ॥ १ ॥ २ ॥

एलादि चूर्ण १-४ ॥

सूक्ष्मैला केसरं भृङ्गं पत्रं तालीसकं तुगा। मृद्वी-
का दाडिमं धान्यं जीरके द्वे द्विकर्षिका ॥ १ ॥

Aho ! Shrutgyanam

पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् । मरिचं दीप्यकं चैव वृक्षाम्लं चाम्लवेतसम् ॥ २ ॥ अजमोदाऽजगन्धा च कपिकच्छेति कर्षिका । अत्यन्तसुविशुद्धायाः शर्करायाश्चतुःपलम् ॥ ३ ॥ चूर्णं सदा हितं पुंसां परमं रुचिवर्द्धनम् । प्लीहकासामयार्शांसि श्वासं शूलं च सज्वरम् ॥ ४ ॥ निहन्ति दीपयत्यग्निं बलवर्णकरं परम् । वातघ्नं लोचनं हृद्यं कण्ठजिह्वाविशोधनम् ॥ ५ ॥

१-छोटी इलायची, केशर, भांगरा, तालीसपत्र, वंशलोचन, दाख, अनारदाना, धनियां, दोनों जीरे ये आठ आठ टंक लेवे. पीपल, पीपलामूल, चव्य, चित्रक, सोंठ, मिरच, अजमायन, तंतडीक, अमलवेत, अजमोद, असगंध, कौंचके बीज इन औषधियोंको चार चार टंक लेवे, मिश्री ४ पल डाले । यह चर्ण रुचिकर है, तापतिल्ली, खाँसी, बवासीर, श्वास, शूल, और ज्वर इनको नाश करे, अग्निको बढावे, वर्ण उत्तम करे, वादी, नेत्ररोग, हृदय, और कंठके रोगको नष्ट करे ॥ १-५ ॥

त्रुटिलवङ्गविडंगकटुत्रिकं घनशिवाशिवपत्रजकं समम् । त्रिगुणिता त्रिवृता च सिता समा अदन आम पतिष्यति कामतः ॥ १ ॥

२-छोटी इलायची, लौंग, वायविडंग, सोंठ, मिरच, पीपल, नागरमोथा, आंवले, हरड, तमालपत्र इन सब औषधियोंको बराबर लेय और सब औषधियोंसे त्रिगुण निसोथ डाले और सबके समान मिश्री मिलावे । इस चर्णको खानेसे आम झडकर गिरपडे ॥ १ ॥

Aho ! Shrutgyanam

एलाकुङ्कुमचोचजातिपलयुक्श्रीपुष्पजातीफलं
मस्तक्या करहाटनागरयुतं फेनाहिकृष्णान्वितम् ।
एतेषां समशालशीतलरजः स्याद्र्द्धकस्तूरिका
दद्यात्क्षौद्रयुतं दिनांतसमये यामद्वयं स्तम्भकृत् ॥ १ ॥

३-- इलायची, केशर, तज, जावित्री, तमालपत्र, लौंग, जायफल, मस्तंगी, अकरकरा, सोंठ, अफीम, पीपल इन सबको बराबर लेवे और इन सबकी बराबर मिश्री और औषधियोंसे आधी कस्तूरी लेवे, सबको मिलाय रात्रिके समय इस चूर्णको शहद मिलाकर लेवे तो दो प्रकाहरका स्तंभन होवे ॥ १ ॥

शिलाजतुक्षौद्रविडङ्गसर्पिलोहाभयापारदताप्य-
भाष्यम् । आपूर्यते दुर्बलदेहधातुःस्त्रियं
निशायां च यथा शशांकः ॥ २ ॥

शिलाजीत, शहद, वायाविडंग, घृत, सार, हरड, रससिंदूर, सोना-मक्खी इन सबका चूर्ण पन्द्रह दिन सेवन करनेसे दुर्बल देहकी सब धातुपुष्टि करे, चन्द्रमाके समान प्रकाशमान करे ॥ २ ॥

सत्त्वं गुडूच्या गगनं सलोहमेला सिता मागधि-
कासमेतम् । एतत्समस्तं मधुनाऽवलीढं रामा-
शतं सेवयतीह षण्ढः ॥ ३ ॥

गिलोयका सत्त्व, अभ्रकसार, छोटी इलायची, मिश्री, पीपल इन सबका चूर्ण शहदके साथ मिलाकर खानेसे नपुंसकभी सौ स्त्रियोंसे सम्भोग करे ॥ ३ ॥

Aho ! Shrutgyanam

**गोक्षुरकः क्षुरकः शतमूली वानरिनागबलाऽतिबला च । चूर्णमिदं पयसा निशि पेयं यस्य गृहे प्रमदाशतमस्ति ॥ ४ ॥**

गोखरू, तालमखाने, शतावरी, कौंचके बीज, गंगेरनकी छाल, खरेटी इन सबका चूर्ण रात्रिको दूधके संग उस मनुष्यको पीना चाहिये जिसके घरमें १०० स्त्री होवें ॥ ४ ॥

प्रमेहमें एलादिचूर्ण ४ ।

**एलाश्मभेदकशिलाजतुपिप्पलीनां चूर्णानि तण्डुलजलैर्लुलितानि पीत्वा । यद्वा गुडेन सहितान्यवलिह्य मासमासन्नमृत्युरपि जीवति मूत्रकृच्छ्री ॥ १ ॥**

४-छोटी इलायची. पाषाणभेद, शिलाजीत, पीपल इनका चूर्ण सांठी चांवलोंके पानीके साथ महीनेभर पीवे अथवा गुड डालकर अवलेह सेवन करे तो निकट मृत्युवाला भी मूत्रकृच्छ्री जीवे ॥ १ ॥

चातुर्जातकचूर्ण ।

**चातुर्जाततुगाद्विजीरकधनातालीससाराधसा वृक्षाम्लं कपिकच्छुषट्ककटुत्रयाम्लद्विदीप्या च षट् । चूर्णस्तुल्यसितो बलाग्निरुचिकृत्तत्प्लीहमूलानिलश्वासार्शःकसनव्यथाज्वरवमीहृत्कण्ठजिह्वार्तिजित् १**

चातुर्जात, वंशलोचन, दोनों जीरे, धनियां, तालीसपत्र, अनारदाना इनको दश दश कर्ष लेवे । तंतडीक, कैथ, षटकटु ( पीपल, पीपलामूल, चव्य, चित्रक, सोंठ, मिरच ) अमलवेत, अजमोद, अजमायन इनको छः कर्ष लेवे और सबकी बराबर मिश्री मिलावे ।

Aho ! Shrutgyanam

यह चूर्ण बल, अग्नि, रुचि इनको बढावे, तापतिल्ली, वादीके रोग, श्वास, बवासीर, खांसी, ज्वर, वमन और हृदय कंठ जीभ इन सबके रोगोंको, नाश करता है ॥ १ ॥

त्रिजातादिचूर्ण ।

त्रिजातविश्वा त्रिफला विडंगं द्राक्षा निशायुग्म-मरिष्टपत्रम् । कृष्णा गुडूची मसिमेषशृंगी पुरातनाः षष्टिकतण्डुलाश्च ॥ १ ॥ एतानि चूर्णानि समानि कृत्वा सिता प्रदेया तदनन्तरं समा । दिनोदये चूर्णमिदं हि खादन्कुर्यान्नरः शीतरसोपहारम् ॥२॥ दद्रूणि रक्तं कुपितं च पित्तं कुष्टाम्लपित्तं सविचर्चिपामा । विस्फोटका मण्डलकाः प्रदोषा ह्यनेकदोषाः प्रशमं प्रयान्ति ॥ ३ ॥

त्रिजातक ( तज, तमालपत्र, इलायची ), सोंठ, त्रिफला, वायविडंग, दाख, हलदी, दारुहलदी, नीमके पत्ते, पीपल, गिलोय, सोयाके बीज, मेढासिंगी, पुराने सांठी चावल ये सब बराबर लेकर इन सबके समान मिश्री मिलावे और प्रातःकाल खाय, शीतल आहार करे तो दाद, रुधिरविकार, पित्तके विकार, कोढ, अम्लपित्त, खाज, खसर, विस्फोटक, चकत्ता और अनेक दोष नष्ट होवें ॥ १-३ ॥

त्रिफलादिचूर्ण ।

त्रिफलां त्रापुषं बीजं सैन्धवं च शिलाजतु ।
बद्धमूत्रे हितं चूर्णं नात्र कार्या विचारणा ॥ १ ॥

त्रिफला, ककडीके बीज, सैंधानोन और शिलाजीत इनका चूर्ण बद्धमूत्रवाले रोगीको हित है ॥ १ ॥

Aho ! Shrutgyanam

तालीसादिचूर्ण १-२ ।

तालीसोपणचव्यनागलवणैस्तुल्यांशकैर्द्विस्थितं
कृष्णाग्रं थिकतन्तडीकहुतभुक्त्वग्जीरकौ तूर्यकौ ।
विश्वैलाबदराम्लवेतसघनैर्धान्याजमोदान्वितास्तिस्रो
दाडिमसारपादसहितः श्रेष्ठः सिता खाण्डवः ॥ १ ॥
कण्ठास्योदरहृद्विकारशमनं कामाग्निसन्दीपनो
गुल्माध्मानविषूचिकागुदरुजः श्वासं कृमीञ्छर्दि-
काम् । कासारुच्यतिसारगूढमरुतां हृद्रोगिणां
कीर्तितश्चूर्णोऽयं भिषजामतीव दयितः ख्यातो
महाखाण्डवः ॥ २

१--तालीसपत्र, कालीमिरच, चव्य, नागकेशरर, सैंधानोन ये औषधि प्रत्येक चार चार टंक लेवे. पीपल, पीपलामूल, तंतडीक (दासरा), चित्रक, दोनों जीरे, तज, तमालपत्र, इन औषधियोंको आठ आठ टंक लेवे. सोंठ, इलायची, बेरकी मींगी, अम्लवेत, नागरमोथा, धनियां अजमोद इन औषधियोंको बारह बारह टंक लेवे, इन सबका चतुर्थांश अनारदाना लेवे और सबके समान मिश्री मिलावे, अथवा सफेद चीनी मिलाकर नित्य खाय तो कंठ, मुख, उदर, हृदय इनके विकारोंको नष्ट करे, कामाग्निको बढावे, गोला, अफरा, हैजा, बवासीर, श्वास, कृमि, छर्दि खांसी, अरुचि, अतिसार, गूढवातव्याधि और हृदयरोगोंको हित है, वैद्योंको अत्यन्त प्यारा यह चूर्ण महाखाण्डव नामसे विख्यात है ॥ १-२ ॥

तुल्यं तालीसचव्योषणलवणगजद्विःकणा ग्रंथ्य-
जाजी वृक्षाम्लाऽग्नित्वचं त्रिर्घनबदरघनैलाजमो-

Aho ! Shrutgyanam

दाम्लविश्वम् । सार्द्धं श्वेतोह्नि सारेऽतिसृतिकृमि-
वमौ खाण्डवारुच्यजीर्णे गुल्माध्मानानलास्योदर-
गलगुदमृद्धृद्रुदश्वासकासे ॥ १ ॥

२-तालीसपत्र, चव्य, कालीमिरच, नागकेशर, गजपीपल, पीपलामूल, पीपल, जीरा, तंतडीक, चित्रककी छाल, तज, नागरमोथा, भिंगी, धनियां, इलायची, अजमोद, अमलवेत, सोंठ, अनारदाना इन सब औषधियोंको बराबर लेकर इनसे आधी मिश्री मिलावे, मिश्रीको छोडकर सब औषधियोंका आधा सार मिलावे । इसके खानेसे अतीसार, कृमिरोग, वमन, अरुचि, अजीर्ण, गोला, उदरविकार, मन्दाग्नि, मुखरोग, कंठरोग, गुदारोग, मिट्टी खानेका रोग, श्वास, खांसी इन सब रोगोंको यह खांडवचूर्ण दूर करता है ॥ १ ॥

तालीसग्रंथिधान्यैर्भवरबिधकणाकृष्णजीरच्छ-
दाम्लं सामुद्रं विश्वजीरोषणमथ रुचकं त्वक्त्रुटी-
दाडिमैस्तैः । विंशत्यष्टत्रिपञ्चैकचतुरवयवैर्भास्क-
रोन्मन्थवाम्लैर्गुल्मे सार्शोर्तिकासग्रहणिजठरहृत्त्व-
ग्गदश्लेष्मवाते ॥ १ ॥

३-तालीसपत्र, पीपलामूल, धनियां, बिडनोन, पीपल, कालाजीरा, अमलवेत, समुद्रनोन, सोंठ, सफेदजीरा, पत्रज, कालानोन, तज, छोटी इलायची, अनारदाना, इनको क्रमसे बीस, आठ, तीन, पांच, एक और चार भाग लेवे, इसमें नींबूके रसकी भावना देवे, यह भास्करचूर्ण गोला, बवासीर, खांसी, संग्रहणी, उदररोग, त्वग्रोग, कफवातके रोग इन सबको नष्ट करे ॥ १ ॥


Aho ! Shrutgyanam

गगनाश्रयचूर्ण ।

त्रिकटु त्रिसुगन्धं च लवंगं जातिकाफलम् । तुगा-
क्षीरी सटी शृंगी वाजिगन्धा च दाडिमी ॥ १ ॥
एतानि समाभागानि सर्वतुल्यमयोरजः । आय-
सेन समं देयं गगनं च सुशोधितम् ॥ २ ॥ याव-
न्त्येतानि चूर्णानि तावद्द्यात्सितोपलाम् । कर्ष-
प्रमाणं दातव्यं खादयेच्च यथाबलम् ॥३॥अग्नि-
संजननं हृद्यं प्रमेहं हन्ति दारुणम् । अश्मरीं मूत्र-
कृच्छ्रं च धातुस्थं विषमज्वरम् ॥ ४ ॥ नाशयेच्च
त्रिदोषं च राजयक्ष्मज्वरापहम् । पीनसश्वासका-
सघ्नं रुच्यं कासहरं परम् ॥ ५ ॥

सोंठ, मिरच, पीपल, तज, पत्रज, इलायची, लौंग, जायफल, तवाखीर, कचूर, काकडासिंगी, असगंध, अनारदाना ये सब बराबर लेवे और सबके समान सार लेवे. और सारकी बराबर शुद्ध अभ्रक लेव और सबकी बराबर मिश्री मिलावे. बलाबल देखकर इसकी मात्रा चार टंक देवे तो अग्निको दीप्त करे, हृदयके रोग, प्रमेह, पथरी, मूत्रकृच्छ्र, धातुओंमें स्थित विषमज्वर, त्रिदोष, राजयक्ष्मा, ज्वर, पीनस, श्वास, खांसी इनका नाश करे ॥ १–५ ॥

सितोपलादिचूर्ण ।

सितोपला षोडश स्यादष्टौ स्याद्वंशलोचना ।
पिप्पलीस्यात् चतुःकर्षा एला च द्वयकार्षिका
॥ १ ॥ एककर्षा च त्वक्कार्या चूर्णयेत्सर्वमेकतः ।
सितोपलादिकं चूर्णं मधुसर्पियुतं लिहेत् ॥ २ ॥

Aho ! Shrutgyanam

कासश्वासक्षयहरं हस्तपादांगदाहजित् । मन्दाग्नि-
शुष्कजिह्वां च पार्श्वशूलमरोचकम् । ज्वरमूर्ध्व-
गतं रक्तं पित्तमाशु व्यपोहति ॥ ३ ॥

मिश्री १६ कर्ष, वंशलोचन ८ कर्ष, पीपल ४ कर्ष, छोटी इलायची २ कर्ष, तज १ कर्ष इन सबका चूर्ण कर शहदमें मिलाकर खावे तो खांसी, श्वास, क्षय और हाथ पैरोंके दाहको दूर करे, मन्दाग्नि, जीभका सूखना, पसवाडेका शूल, अरुचि, ज्वर, ऊर्ध्वगत रुधिरके विकार तथा पित्तके रोगोंको यह सितोपलादि चूर्ण दूर करता है ॥ १–३ ॥

श्रीखण्डादिचूर्ण ।

श्रीखण्डं मरिचं लवंगफलजं द्राक्षा तजं पत्रजं
रक्तं चन्दनवालकं मधुनिशा शुण्ठीकणाग्र-
न्थिकाः । धान्या जीरककेशरं जलफलं खर्जूर-
सम्यक्त्वचश्चूर्णं भेषजमिश्रितं सममितं मात्रा
बिडालं पदम् ॥ १ ॥ श्वासं शोषयुतं क्षयज्वरहरं
पित्तप्रमेहापहं रक्तस्तापजडं प्रकाशमरुचिं व्याधिं
भगेन्द्रापहम् । क्षीणे देहपतत्रययुताबलं सर्वा-
तिसारापहं सर्वव्याधिविनाशनं निगदितं श्रीखण्ड-
चूर्णाभिधम् ॥ २ ॥

चन्दन, मिरच, लौंग, जायफल, दाख, तज, पत्रज, लालचन्दन, नेत्रवाला, मुलहठी, हलदी, सोंठ, पीपल, पीपलामूल, धनियां, जीरा, केशर, पवहडी, छुहारा इन सबको समान भाग लेवे, सबकी बराबर मिश्री मिलादेवे और चार टंकके अंदाज नित्य खाय तो शोषयुक्त श्वास, क्षय, ज्वर, पित्त, प्रमेह, रुधिरविकार, ताप, जडता, बहुत

Aho ! Shrutgyanam

दिनकी व्याधि, भगन्दर इनका नाश करे, क्षीण देहको पुष्ट करे अतिसारका नाश करे, सर्वव्याधियोंका नाश करे इसको वैद्य श्रीखंड-चूर्ण कहते हैं ॥ १ ॥ २ ॥

शंखादिचूर्ण ।

**शंखचूर्णं सलवणं सहिंगु व्योषसंयुतम् ।**
**उष्णोदकेन सम्पीतं हन्ति शूलं त्रिदोषजम् ॥ १ ॥**

शंखका चरा, सेंधानोंन, हींग, सोंठ, मिरच, पीपल इनका चूर्ण बनाकर गरम जलके साथ लेनेसे त्रिदोषका भी नाश होवे ॥ १ ॥

कायफलादिचूर्ण ।

**कट्फलं पुष्करं भार्ङ्गी शृङ्गी च मधुना सह ।**
**श्वासकासज्वरहरं कट्फलादिकफान्तकृत् ॥ १ ॥**

कायफल, पोहकरमूल, भारंगी, काकडासिंगी इनका चूर्ण शहदके साथ खानेसे खांसी, श्वास और ज्वरको दूर करे, यह कट्-फलादिचूर्ण कफनाशक है ॥ १ ॥

षड्योगचूर्ण ।

**तवराजकणा द्राक्षा खर्जूरं मधुरं त्रुटिः ।**
**लवंगं पत्रकं चैव नागकेशरनामतः ॥ १ ॥**

मिश्री, पीपल, दाख, छुहारे, मुलहठी, इलायची, लौंग, पत्रज और नागकेशर इनके चूर्णको षड्योग चूर्ण कहते हैं ॥ १ ॥

मिश्रादिचूर्ण ।

**चित्रकेन्द्रयवा पाठा कटुकाऽतिविषाऽभया ।**
**महाव्याधिप्रशमनो योगः षट्चरणः स्मृतः ॥ १ ॥**
**मधुना भक्षितं हन्ति चूर्णमेकं हि निश्चितम् ।**
**भ्रमं दाहं शीतपीडां क्षयरोगं न संशयः ॥ २ ॥**

Aho ! Shrutgyanam

चित्रक, इंद्रयव, पाढ, कुटकी, अतीस, हरड यह महाव्याधि-शमनकर्ता षट्चरणयोग कहाता है। इस चूर्णको शहदके साथ खानेसे भ्रम, दाह, शीतकी पीडा और क्षयरोगका नाश करे ॥ १ ॥ २ ॥

कीलकादिचूर्ण ।

गृहधूमो यवक्षारं पाठाव्योषरसाञ्जनम् । तेजोह्वा
त्रिफला लोध्रं चित्रकं चेति चूर्णितम् ॥ १ ॥
सक्षौद्रं धारयेदेतद्गलरोगविनाशनम् । चूर्णं तु
भक्षयेद्धीमान्दन्तास्यस्य च रोगजित् ॥ २ ॥

घरका धूआं, जवाखार, पाढ, सोंठ, मिरच, पीपल, रसौंत, तज, दालचीनी, त्रिफला, लोध, चित्रक इनका चूर्ण शहदसंयुक्त खानेसे गलेके रोग नष्ट होवें और दांतोंके तथा मुखके रोगोंका नाश होवे ॥ १ ॥ २ ॥

पञ्चनिम्बचूर्ण ।

मूलं पत्रं फलं पुष्पं त्वङ् निम्बस्य समाहरेत् ।
सूक्ष्मचूर्णमिदं कुर्यात्पलैः पंचदशोन्मितैः ॥ १ ॥
लोहभस्महरीतक्यौ चक्रमर्दकचित्रकौ ।
भल्लातकं विडंगानिशर्कराऽऽमलकं निशा ॥ २ ॥
पिप्पली मरिचं शुण्ठी बाकुचीकृतमालकैः ।
गोक्षुरं च पदोन्मानमेकैकं कारयेद् बुधः ॥ ३ ॥
सर्वमेकीकृतं चूर्णं भृङ्गराजेन भावयेत् ।
अष्टभागावशिष्टेन खदिरावरवारिणा ॥ ४ ॥
भावयित्वा सुशुष्कं च कर्षमात्रं त[illegible] पिवेत् ।
खदिरसारतोयेन सर्पिषा पयसाऽथवा ॥ ५ ॥

Aho ! Shrutgyanam

मासेन सर्वकुष्ठानि विनिर्यान्ति रसायनम्।
पञ्चनिम्बमिदं चूर्णं सर्वरोगप्रणाशनम् ॥ ६ ॥

निंबकी जड पत्ता फल फूल, और, छाल लेकर चूर्ण करे. लोहेकी भस्म १५ पल, हरड, पवांडके बीज, चित्रक, भिलावे, वायविडंग, मिश्री, आंवले, हलदी, पीपल, मिरच, सोंठ, बावची, अमलतासका गूदा गोखरू ये सब औषधि जुदी २ एक एक पल लेवे. सब चूर्णको एकत्र कर भांगरेके रसकी २१ भावना देवे. पीछे सुखाकर एक कर्ष नित्य खैरसारके जल अथवा घृतके साथ वा दूधके साथ पीवे तो एक महीनेमें सकल कुष्ठोंको दूर करे। यह पञ्चनिम्बचर्ण सकलरोगनाशक है ॥ १–६ ॥

सुदर्शनचूर्ण।

त्रिफला रजनीयुग्मं कण्टकारीयुगं सटी।
चित्रकं ग्रन्थिकं मूर्वा गुडूची धान्ययासके ॥ १ ॥
कटुका पर्पटी मुस्ता त्रायमाणं च बालकम्।
निम्बं पुष्करमूलं च मधुयष्टी च वासकम् ॥ २ ॥
यवानीन्द्रयवा भार्ङ्गी शिग्रुबीजं सुराष्ट्रकम्।
वचा त्वक्पद्मकोशीरं चन्दनातिविषा बला ॥ ३ ॥
शालपर्णी पृष्ठिपर्णी विडङ्गं तगरं तथा।
चित्रको देवदारुश्च चव्यं पत्रं पटोलकम् ॥ ४ ॥
जीवकर्षभकौ चैव लवंगं वंशलोचनम्।
पुण्डरीकं च काकोलीपत्रकं जातिपत्रकम् ॥ ५ ॥
तालीसपत्रं च तथा समभागानि चूर्णयेत्।
सर्वचूर्णस्य चोर्द्धांशं किराततं प्रक्षिपेत सुधीः ॥ ६ ॥

Aho ! Shrutgyanam

एतत्सुदर्शनं नाम चूर्णं दोषज्वरापहम् ।
ज्वरांश्च निखिलान्हन्ति नात्र कार्या विचारणा ॥ ७ ॥
सन्निपातोद्भवांश्चापि मानसानपि नाशयेत् ।
शीतज्वरैकाहिकादीन्मोहं तन्द्रां भ्रमं तृषाम् ॥ ८ ॥
श्वासं कासं च पाण्डुंच हृद्रोगं हन्ति कामलाम् ।
त्रिकपृष्ठकटीजानुपार्श्वशूलनिवारणः ॥ ९ ॥
शीताम्बुना पिबेद्धीमान्सर्वज्वरनिवृत्तये ।
यथा सुदर्शनं चक्रं दानवानां विनाशकम् ॥ १० ॥
तथाज्वराणां सर्वेषामिदं चूर्णं प्रशस्यते ।
नानादेशोद्भवांश्चैव नीरदोषान् व्यपोहति ॥ ११ ॥

त्रिफला, हलदी, दारुहलदी, छोटी बडी दोनों कटेरी, कचूर, सोंठ, मिरच, पीपल, पीपलामूल, मूर्वा, गिलोय, धनिया, अडूसा, कुटकी, पित्तपापडा, मोथा, त्रायमाण, नेत्रवाला, नीमकी छाल, पोहकरमूल, मुलहटी, जवासा, अजमायन, इन्द्रयव, भारंगी, सहँजनेके बीज, फिटकरी, वच, तज, पद्माख, खस, चन्दन, अतीस, खरेटी, सरिवन, पिठवन, वायविडंग, तगर, चित्रक, देवदारु, चव्य, पटोलपत्र जीवक, ऋषभक, लौंग, वंशलोचन, कमलगट्टा, कंकोल, तमालपत्र, जावित्री, तालीसपत्र, ये सब औषधि बराबर भाग ले चूर्ण करे और चूर्णसे आधा चिरायता मिलावे. यह सुदर्शनचूर्ण त्रिदोषज्वर तथा सम्पूर्ण ज्वरोंको नाश करे वात पित्त कफोंके ज्वर, द्वन्द्वज, आगन्तुक, धातुमें स्थित, विषमज्वर, सन्निपातज ज्वर, मानस ( जो मनसे सम्बन्ध रखता हो ), शीतज्वर, इकतरा, मोह, तन्द्रा, भ्रम, प्यास, श्वास, खांसी, पाण्डुरोग, हृद्रोग, कामला, त्रिकपीडा, पीठ, कमर, घोंटू, पसवाडा, इनका दुखना ये सब नष्ट होवे. जैसे

Aho ! Shrutgyanam

सुदर्शनचक्र दैत्योंका नाश करता है तैसेही यह सुदर्शनचूर्ण सब ज्वरोंको नाश करता है और अनेक देशोंके जलविकारको नाश करता है ॥ १-११ ॥

### षोडशांग चूर्ण।

किरातं तिक्तकं तिक्ता गुडूची चाभया घना।
धन्वयासकत्रायंती क्षुद्रा शृङ्गी महौषधम् ॥ १ ॥
पर्पटं च प्रियंगुं च पटोलं मागधी सटी।
षोडशांगमिति प्रोक्त ज्वरशूलविनाशनम् ॥ २ ॥

चिरायता, नींबकी छाल, कुटकी, गिलोय, हरड, मोथा, जवासा, त्रायमाण, कटेरी, काकडासिंगी, सोंठ, पित्तपापडा, फूलप्रियंगु, पटोलपत्र, पीपल, कचर इनका चूर्ण षोडशांगनामसे विख्यात है यह ज्वर शूलका नाशक है १ ॥ २ ॥

### अरिष्टादिचूर्ण।

निम्बच्छदो दशपलंत्र्यूषणं च पलत्रयम् ।
त्रिपलंत्रिफला चैव त्रिफलं लवणत्रयम् ॥ १ ॥
द्वौ क्षारौ द्विपलंचैव यवानी पलपंचकम् ।
सर्वमेकीकृतं चूर्ण प्रत्यूषे भक्षयेन्नरः ॥ २ ॥
ऐकाहिकं द्व्याहिकं च त्र्याहिकं च तथाज्वरम् ।
चातुर्थिकं महाघोरं नाशयेत्संततज्वरम् ॥ ३ ॥

नींबकी छाल १० पल, त्रिकुटा ३ पल, त्रिफला ३ पल, सेंधानोन, बिडनोन, संचरनोन तीनों एक एक पल, सज्जीखार, जवाखार दो दो पल, अजमायन ५ पल सबको एकत्र चूर्ण कर खाय तो इकतरा द्व्याहिक तिजारी, चौथिया और सन्ततज्वर ये सब नष्ट होवें ॥ १-३ ॥

Aho ! Shrutgyanam

शृंग्यादिचूर्ण ।

शृंगीकटुत्रिकफलत्रयकण्टकारी भार्ङ्गी सपुष्करजटा लवणानि पञ्च। चूर्णं पिबेदशिशिरेण जलेन हिक्काश्वासोर्ध्ववातकसनारुचिपीनसेषु ॥ १ ॥

काकडासिंगी, सोंठ, मिरच, पीपल, त्रिफला, कटेरी, भारंगी, पुहकरमूल, सैंधानोन, संचरनोन, बिडनोन, समुद्रनोन, कचियानोन इनका चूर्ण गरम जलके साथ पीनेसे हिचकी, ऊर्ध्वश्वास, वात कफके रोग, अरुचि और पीनस ये सब नष्ट होवें ॥ १ ॥

लवणभास्करचूर्ण ।

पिप्पली पिप्पलीमूलं धान्यकं कृष्णजीरकम् ।
सैन्धवं च विडङ्गं च पत्रं तालीसकेशरम् ॥१॥
एषां द्विपलिकान् भागान्पञ्च सौवर्चलस्य च ।
मरिचं शुण्ठ्यजाजी स्यादेकैकं च पलं पलम् ॥ २ ॥ त्वगेला चार्द्धभागेन सामुद्रं च पलाष्टकम् । चतुःपलं दाडिमं च द्विपलं चाम्लवेतसम् ॥ ३ ॥ एतच्चूर्णीकृतं सूक्ष्मं लवणं भास्कराभिधम् । गवां तक्रं सुरा सुक्तदधि कांजिकयोजितम् ॥ ४ ॥ वातश्लेष्मं वातगुल्मं वातशूलं च नाशयेत्। मन्दाग्निं ग्रहणीमर्शो हृद्रोगं प्लीहमेवच॥५॥

पीपल, पीपलामूल, धनियां कालाजीरा, सैंधानोन, वाय विडंग, तालीसपत्र, नागकेशर इन औषधियोंको दो दो पल लेवे. संचरनोन, मिरच, सोंठ, जीरा इनको एक एक पल लेवे. तज, इलायची इनको ८ टंक लेवे. समुद्रनोन ८ पल, अनारदाना ४ पल,

Aho ! Shrutgyanam

अमलवेत २ पल ले सबको मिलाकर खूब बारीक पीसे । यह लवणभास्कर चूर्ण भास्करवैद्यका बनाया हुआ है, सुगन्धयुक्त और अमृतके तुल्य है इसको छांछ, कांजी, दारु, दही इनके साथ खानेसे वात कफके विकार, वायगोला, मन्दाग्नि, संग्रहणी, बवासीर, हृद्रोग, प्लीहके रोग ये सब नष्ट होते हैं ॥ १-९ ॥

वज्रक्षारचूर्ण ।

**सामुद्रं सैन्धवं काचं यवक्षारं सुवर्चलम् । टंकणं स्वर्जिकाक्षारं तुल्यं चूर्णं प्रकल्पयेत् ॥ १ ॥ अर्कक्षीरैः स्नुहीक्षीरैर्भावयेदातपे त्र्यहम् । अर्कपत्रे लिपेत्तं तु रुद्ध्वा चांधपुटे पचेत् ॥ २ ॥ सकलं चूर्णयित्वाऽथ त्र्यूषणं त्रिफलारजः । जीरकं रजनी वह्निर्निम्बकस्य रसं समम ॥ ३ ॥ एकीकृत्य प्रयोगेण सूक्ष्मं चूर्णं तुकारयेत् । वज्रक्षारमिदं चूर्णं स्वयं प्रोक्तं पिनाकिना ॥ ४ ॥ सर्वोदरेषु गुल्मेषु शोफे शूलेषु योजयेत् । अग्निमांद्यमजीर्णेषु भक्ष्यं निष्कद्वयं द्वयम् ॥ ५ ॥ अर्कपत्रं सलवणं पुटे दग्धं सुचूर्णितम् । निहन्ति मधुना पीतं प्लीहानं शूलदारुणम् ॥ ६ ॥**

समुद्रनोन, सैंधानोन, कचियानोन, जवाखार, संचरनोन, सुहागा, सज्जी इन सबको बराबर ले चूर्णकर आकके रसकी और थूहरके दूधकी तीन तीन भावना देवे, पीछे इस चूर्णको आकके पत्तोंसे लपेटकर अंधमूषापुटमें रखकर फूंक देवे । जब सबकी भस्म होजाय तब इसमें इतनी औषध और मिलावे-सोंठ, मिरच, पीपल, त्रिफला, जीरा, हलदी, चित्रक, इनका चूर्णकर औषधियोंके समान नींबूके रसकी भावना

Aho ! Shrutgyanam

देवे, यह वज्रक्षार श्रीमहादेवजीने कहा है, इसको सब उदरके रोग, गोला, सूजन, शूल इनमें देना चाहिये, मन्दाग्नि और अजीर्णमें दो टंकके अनुमान खावे ॥ १–६ ॥

अर्कपत्रं सलवणं पुटदग्धं सुचूर्णिम् ।
निहन्ति मधुना लीढंप्लीहानं च सुदारुणम् ॥ १ ॥

आकके पत्तोंमें नोन मिलाकर भस्म करे, उस भस्मको शहदके साथ चाटनेसे महाभयानक प्लीहारोग नष्ट होवे ॥ १ ॥

विडलवणादिचूर्ण ।

विडरुचकयवानी जीरके द्वे च पथ्या त्रिकटुकहुतभुग्भ्यां वेतसाम्लाजमोदाः । समविहितरजोभिर्धान्यकं तिन्तडीकं जरयति नगकूटं का कथा भोजनस्य ॥ १ ॥

बिडनोन, अजमायन, दोनों जीरे, हरड, सोंठ, मिरच, पीपल, चित्रक, अमलवेत, अजमोद, धनियां, तिंतडीक इन सबको समान लेवे । यह चूर्ण पत्थरको जीर्ण करदेवे, भोजनकी तो क्या बडी बात है ? ॥ १ ॥

सामुद्रिकचूर्ण ।

सामुद्रसौवर्चलसैन्धवानां क्षारो यवानामजमोदभागम् । हरीतकी पिप्पलिशृंगवेरं हिंगुर्विडंगानि समं च दद्यात् ॥ १ ॥ एतानि चूर्णानि घृतप्लुतानि भुञ्जीत पिण्डान्प्रथमं च पञ्च । अजीर्णवातं गुदगुल्मवातं वातप्रमेहं विषमं च वातम् ॥२॥ विषूचिकां कामलपाण्डुरोगान्कासं च श्वासं हरते प्रवृद्धम् ॥ ३ ॥

Aho ! Shrutgyanam

समुद्रनोन, संचरनोन, सैंधानोन, जवाखार, हरड, अजमोद, सोंठ, हींग, वायविडंग इन सबको समान ले इनका चूर्णकर घृत मिलाय भोजनके प्रथम पांच ग्रास लेवे तो अजीर्ण, वादी, गुदाके रोग, वायगोला, वातप्रमेह, विषमवात, हैजा, कामला, पांडुरोग, खांसी और श्वास इन सबका नाश करे ॥ १-३ ॥

हिंग्वष्टकचूर्ण ।

त्रिकटुकमजमोदासैन्धवं जीरके द्वे समचरणधृता-
नामष्टमो हिङ्गुभागः । प्रथमकवलभुक्तं सर्पिषा
चूर्णमेतज्जनयति जठराग्निं वातगुल्मं निहन्ति ॥ १ ॥

सोंठ, मिरच, पीपल, अजमोद, सैंधानोन, सफेदजीरा, कालाजीरा इन सबको बराबर लेकर अष्टमांश, हींग घीमें भूनकर डाले पीछे इस चूर्णको भोजनके प्रथम पांच ग्रासोंमें खाय तो जठराग्निको प्रबल करे और वायगोलाको नष्ट करे ॥ १ ॥

हिंगुपंचक चूर्ण ।

विश्वौषधेन रुचकेन सदाडिमेन स्यादम्लवेतसयुतं
कृतहिंगुभागम् । तद्धिंगुपञ्चकमिदं जठरामयघ्नं
भेडाभिधानमुनिना गदितं मुनीनाम् ॥ १ ॥

सोंठ, संचरनोन, अनारदाना, अमलवेत ये बराबर लेवे, इनमें एक हिस्सा हिंगु मिलावे । यह हिंगुपञ्चक उदरके रोगोंको दूर करे, यह भेडनाम मुनिने कहा है ॥ १ ॥

हिंगुत्रयोविंशति चूर्ण ।

हिंग्वग्निचव्यलवणत्रयवेतमाम्लक्षारद्वयं त्रिकटु-
दाडिमतिंतडीकम् । सग्रंथिकाग्निकसटी हपुषा-
ऽजगंधा पाठाऽभया सुसितजीरकपुष्कराह्वा ॥ १ ॥

Aho ! Shrutgyanam

सोग्रं सधान्यकमिति प्रविधाय चूर्णं भूयः प्लुतं
हि फलपूरफलद्रवेण । उष्णोदकेन परिपीतमिदं
निहन्ति शूलानि गुल्मगुदजान् ग्रहणीरुजश्च ॥ २ ॥

हींग, चीता, सैंधानोन, चव्य, संचरनोन, बिड़नोन, अमलवेत, सज्जीखार, जवाखार, सोंठ, मिरच, पीपल, अनारदाना, तंतडीक, पीपलामूल, अरणा, कचर, हाऊबेर, असगंध, पाढ, हरड, सफेदजीरा, पोहकरमूल, वच, धनियां ये सब बराबर लेवे, सबका चूर्ण कर बिजोरे नींबूकी भावना देवे. पीछे इसको गरम जलके साथ खाय तो वायगोला, शूल, गुदाके रोग और संग्रहणी इन सबको नाश करे ॥ १ ॥ २ ॥

तुम्बरादिचूर्ण ।

तुम्बराणि त्रिलवणं यवानी पुष्कराह्वयम् ।
यवक्षाराभया हिङ्गुविडंगानि समानि च ॥ १ ॥
त्रिवृत्त्रिभागविजया सूक्ष्मचूर्णानि कारयेत् ।
पिबेदुष्णेन तोयेन यवक्काथेन वा पिबेत् ।
जयेत्सर्वाणि शूलानि गुल्माध्मानोदराणि च ॥ २ ॥

तुंबरु, सैंधानोन, संचरनोन बिडनोन, अजमायन, पोहकरमूल, जवाखार, हरड, हींग, वायविडंग ये समान भाग लेवे, इन सबका तीसरा भाग निसोथ लेवे, सबको पीसकर महीन कर लेवे । गरम जलके साथ पीवे अथवा जवके काढेके साथ पीवे तो सब प्रकारके शूल, गोला, अफरा और उदररोगोंको जीते ॥ १ ॥ २ ॥

अजमोदादिचूर्ण ।

अजमोदा विडङ्गं च सैंधवं देवदारु च ।
चित्रकं पिप्पलीमूलं शतपुष्पा च पिप्पली ।

Aho ! Shrutgyanam

मरिचं चेति कर्षांशं प्रत्येकं कारयेद् बुधः ।
कर्षास्तु पञ्च पथ्याया दश स्युर्वृद्धदारुकाः ॥ २ ॥
नागराच्च दशैव स्युः सर्वानेकत्र चूर्णयेत ।
पिबेत्कोष्णजलेनैतच्चूर्णं शोफविनाशनम् ॥ ३ ॥
आमवातरुजं हन्ति सन्धिपीडां च गृध्रसीम् ।
कटिपृष्ठगुदस्थां च जंघयोश्च रुजं जयेत् ॥ ४ ॥
तूनीप्रतूनीवातांश्च कफवातामयाञ्जयेत् ।
समेन वा गुडेनास्य वटिकाः कारयेद् बुधः ॥ ५ ॥

अजमोदा, वायविडंग, सैंधानोन, देवदारु, चित्रक, पीपलामूल, सौंफ, पीपल, मिरच, इन सबको एक एक कर्ष लेवे और हरड पांच कर्ष लेवे, विधायरा दश कर्ष लेवे, सोंठ दश कर्ष लेवे, सबको एकत्र कर चूर्ण करे और गरम जलके साथ लेवे तो सूजनका नाश करे, आमवात, संधियोंकी पीडा, गृध्रसी रोग तथा कमर, पीठ, गुदा, जंघा इनकी पीडाका नाश करे. तूनी, प्रतूनी, विश्वाची और कफके रोगोंको दूर करे. अथवा इसमें बराबर गुड मिलाकर गोली बना लेवे ॥ १-५॥

उदरविकारमें विजयचूर्ण ।

श्रीदीपोग्राग्निहिंगुद्विविषिमिशिवृकीचव्यतिक्तापटूनि ग्रन्थिक्षारेन्द्रजत्रित्रिकमिति विजयः सोष्णकैरण्डतैलम् । हन्त्यर्शःकासगुल्मग्रहणिकृमिरुजापाण्डुरुग्भूतशूलं श्वासं प्लीहं प्रमेहं ज्वरमरुचिमुदावर्तघर्मामवातान् ॥ १ ॥

अजमोद, वच, चीता, हींग, अतीस, सोया, पाढ, चव्य, कुटकी, पांचों नोंन, पीपलामूल, जवाखार, इन्द्रयव, सोंठ, मिरच, पीपल,

Aho ! Shrutgyanam

त्रिसुगंध इन सबको बराबर २ लेवे, गरम जलसे अंडीका तेल मिला-कर देवे तो यह विजयचूर्ण बवासीर, खांसी, गोला, संग्रहणी, कृमिरोग, पांडुरोग, भयानक शूल, श्वास, तापतिल्ली, प्रमेह, ज्वर, अरुचि, उदावर्त्त, अफरा और आमवात इन सब रोगोंका नाश करे ॥ १ ॥

नारायणचूर्ण ।

द्वौ क्षारौ लवणानि पंच हपुषा धान्याजगन्धा सटी व्योषाजाज्युपकुञ्चिका कृमिजितः कंकुष्ठकुष्ठा-ग्रयः । उग्रा गंधककारवी मिसियुतं योज्यं फलानां त्रयं मूलं पुष्करजं यवान् परिभवेदेतानि तुल्या-न्यथ ॥ १ ॥ त्रिवृद्विशाले द्विगुणाथ दन्तिनी त्रिसंगुणा स्वादथ तिक्तका भवेत् । चतुर्गुणा चूर्ण-मुदाहृतं जनैरिदं हि नारायणमौषधं बुधैः ॥ २ ॥ उष्णोदकेन यवकोलकुलत्थतोयैस्तक्रेण मद्यदधि-मस्तुसुरासवैर्वा । नारायणं प्रपिबतः सकलोदराणि नश्यन्ति विष्णुमिव दैत्यगणा द्विषन्तः ॥ ३ ॥

सज्जीखार, जवाखार, पांचों नोन, हाऊबेर, धनिया, अजमोद, कचूर, सोंठ, मिरच, पीपल, काला जीरा सफेद जीरा, वायविडंग, कंकोल, कूठ, चित्रक, वच, पीपलामूल, सोवाके बीज, त्रिफला, पोहकरमूल, अजमायन इन सब औषधियोंको बराबर लेकर निसोथ, इन्द्रायनकी जड हरएक दूनी लेवे, दंती तिगुनी लेवे, कुटकी चौगुनी लेय सबका चूर्ण कर गरम जलसे अथवा यवके काढेके साथ तथा कुलथीके काढेके साथ अथवा छांछके साथ वा मदिराके साथ वा दहीसे वा दहीके जलसे वा सुरामांसीके आसवसे इस नारायणचूर्णको पीवे

Aho ! Shrutgyanam

तो सम्पूर्ण उदरके विकार ऐसे नष्ट होवें जैसे विष्णुभगवान्‌के सुदर्शन-चक्रसे दैत्योंका नाश हुआ ॥ १-३ ॥

### त्रिलवणादिचूर्ण ।

त्रिलवणहपुषाजमोदोग्रगन्धा वचा हिंगु पाठोपकुंचिका सटी जीरका धानिकस्तुंबरी सापि काकावरातुंबरूसर्जिका यावशूकाजटा पुष्करं दाडिमं तिन्तडीकं विडंबानि भार्ङ्गी वरी वेतसाम्लो मरीचं गजकणाऽभया पंचकोलानि कुभाविशाला यवानी सुराह्वा च तत्सर्वमेकत्र चूर्णीकृतं बीजपूरार्द्रकरसेनासकृद्भावितं यः पिबेत्प्रातरुत्थाय चाहारकालेऽथवा मासमात्रं हिताशी नरः प्लुतमशिशिरेण वारिणा जीर्णमद्येन तक्रेण कोलांभसा मस्तुना वा पिबेत् सर्पिषा कोष्णदुग्धेन तत्क्षारनष्टोरनिष्टस्ततः श्वेतवादाडिमं वारसेनात्मवानेभिरेवौषधैः सारितं व्याधिहृद्धृदयगुदकटियकृत्प्लीहगुल्माश्रितं तस्य शूलप्रणाशस्तथा गुल्मविष्टंभदुर्नामहृद्रोगकृच्छ्रोदराध्मानहृल्लासयक्ष्मारुचिश्वासकासान्प्रपचयत्यसकौभवेत्पाचकः प्राश्यमानानि पाषाणचूर्णान्यपि ॥

तीनों नोन, हाऊबेर, अजमोद, असगंध, वच, हींग, पाढ, काला जीरा, कचूर, अजवायन, धनियां, हिंगुपत्री, सोवा, तुंवरू, सज्जी, जवासा, पोहकरमूल, अनारदाना, तिंतडीक, वायविडंग, भारंगी, शतावर, अमलवेत, काली

Aho ! Shrutgyanam

मिरच, गजपीपल, हरड, पंचमूल, ( पीपल, पीपलामूल, चव्य, चित्रक, सोंठ, ) बेरकी मिंगी, दांतण, इन्द्रायणकी जड, देवदारु य सब औषधि कूट पीस कपडछानकर बिजोरेके रसकी और अदरखके रसकी अनेक भावना देकर रख छोडे । इसमेंसे एक महीना पर्यंत प्रातःकाल नित्य खाय अथवा भोजनके समय खाय और पथ्यसे रहे इसको गरम वा शीतल जलके साथ वा पुराने मद्यके साथ या छाछ वा बेरके पानीसे वा दहीके जलसे, घृत वा गरम दूधके साथ पीवे अथवा चनाखार आदिके साथ सेवन करे वा अनारके रसके साथ सेवन करे तो इतने रोगोंका नाश-करे-हृदय, गुदा, कमर, यकृत् प्लीहा, गोला इनके आश्रित व्याधि, शूल, व्रणरोग, बवासीर, गोला, अफरा, हृदयरोग, उदररोग, और सूखी रहको नाश करे ॥

क्षारामृत ।

क्षारं किंशुकमुष्ककार्जुनधवापामार्गरम्भातिला-
जीवन्तीकनकाह्वया मरजनी कूष्माण्डवल्ली
तथा। वासासूरणकत्रिवृद्दहनकैः प्रज्वाल्य भस्मी-
कृतं तोयेन प्रतिशोध्य निःसृतमयःपानं विधेयं
सकृत् ॥ १ ॥ शूलानाहविबन्धगुल्मकफजान्रो-
गाञ्जयेत्कामलां वायुं विद्रधिशूलपाण्डुग्रहणीशो-
फार्शसं पीनसम् । मन्दाग्निं जठरस्य पीनसगुरु-
प्लीहातिमेदादिकान् पाषाणा उदरे भवन्ति बहुधा
भस्मीभवन्ति क्षणात् ॥ २ ॥

ढाकका खार, मुष्क वृक्ष ( वनपलाश ) नामसे प्रसिद्ध है, अर्जुन ( कोह ) इति भाषा ), ओंगा, केला, तिल, जीवन्ती ( डोडी )



Aho ! Shrutgyanam

धतूरा, हलदी, पेठा, अडूसा, जिमींकंद और निसोथ इन सबकी राखको पानीमें भिगोकर अग्नि पर रख खारकी क्रियासे खार निकाल लेवे आर खारोंको जलमें मिलाकर पीनेसे शूल, पेटका अफरा, बन्धकुष्ठ, गोला, कफके रोग, कमलवायु, विद्रधि हृदयका शूल, पांडु, संग्रहणी, सूजन, बवासीर, पीनस, मन्दाग्नि, पेटके रोग, प्रमेह, पथरी इत्यादि रोगोंका नाश करता है ॥ १ ॥ २ ॥

अमलवेतसचूर्ण ।

कत्यम्लवेतसफलानि विदारितानि सिंध्वादिपंचलवणेन सुपूरितानि । हिंग्वादिजेन पटुभास्करजेन चाथ तालीसपुष्पजनितेन विभाव्य युक्त्या ॥ १ ॥ संशोष्य तीव्रकिरणै रवितप्ततापैः सिद्धानि तत्सकलमेव सुभक्षितं च । गुल्मेऽरुचौ यकृति दुष्पवनाग्निमांद्ये प्लीहामयेषु जठरेषु गुदोद्भवेषु ॥२॥

कितनेक फल अमलवेतके लेकर चीर २ कर उनके भीतर पांचोंनिमक अथवा लवणभास्कर चूर्ण भरदेवे, वा हिंग्वष्टक भरदेवे वा तालीसादि भरदे, फिर उन फलोंको धूपमें सुखावे जब सूखजायँ तब उसमेंसे एक टंक खाय तौ गुल्म, अरुचि. प्लीहा, दुष्टवात, मन्दाग्नि, तापतिल्ली और उदर तथा गुदाके सम्पूर्ण रोगोंका नाश करता है॥१-२॥

अतीसारे—लघुगंगाधरचूर्ण ।

अजमोदा मोचरसं सशृंगवेरं च धातकीकुसुमम् । गोमथिततक्रपीतं गङ्गामपि वेगवाहिनीं रुन्ध्यात् ॥ १ ॥

Aho ! Shrutgyanam

अजमोद, मोचरस, सोंठ और धायके फूलके चूर्णको गायके मट्ठेके साथ पीवे तो गंगाके समान वेगवाला अतीसार भी नाश होय ॥ १ ॥

अतीसारे-वृद्धगंगाधरचूर्ण ।

**अरलुकघनशुण्ठी धातकी बिल्वलोध्रं कुटजपल-समेतं मोचनिर्यासयुक्तम् । अतिविषजलपाठा साहकारं च बीजं मसृणमविमिश्रं तण्डुलाम्बुप्र-पीतम् ॥ १ ॥ कफोद्भवं मारुतपित्तसंभवं जये-दतीसारपुराणमामजम् । प्रसिद्धगंगाधरनामचूर्णं तथा हि रोगे ग्रहणीगदे च ॥ २ ॥**

अरलूकी छाल, मोथा, सोंठ, धायके फूल, बेलगिरी, लोध, कुडाकी छाल, इंद्रयव, मोचरस, अतीस, सुगंधवाला, पाठा, आमकी गुठली इनको शहदमें मिलाकर सांठी चावलोंके साथ खाय तो कफ, वात पित्तसे जो बहुत दिनका अतीसार, आमसंग्रहणी आदि रोगोंको जीते । यह चूर्ण वृद्धगंगाधर नामसे प्रसिद्ध है ॥ १ ॥ २ ॥

कपित्थाष्टकचूर्ण ।

**अष्टौ भागाः कपित्थस्य षड्भागा शर्करा मता ।**
**दाडिमं तिन्तडीकं चश्रीफलं धातकी तथा ॥ १ ॥**
**अजमोदा च पिप्पल्याः प्रत्येकं स्युस्त्रिभागकम् ।**
**मरिचं जीरकं धान्यं ग्रन्थिकं बालकं तथा ॥ २ ॥**
**सौवर्चलं यवानी च चातुर्जातं सचित्रकम् ।**
**नागरं चैकभागाः स्युः प्रत्येकं सूक्ष्मचूर्णिताः ॥ ३ ॥**
**कपित्थाष्टकसंज्ञं स्याच्चूर्णमेतज्जलामयान् ।**
**निहन्ति ग्रहणीरोगानतीसारं व्यपोहति ॥ ४ ॥**

Aho ! Shrutgyanam

आठ भाग कैथ और छः भाग मिश्री, अनारदाना, तन्तडीक, बेलगिरी, धायके फूल, अजमोद, पीपल ये प्रत्येक तीन तीन भाग लेवे, सुगंधवाला, कालानोन, अजमायन, चातुर्जात, चीता, सोंठ इन सब औषधियोंको दो दो भाग ल सूक्ष्म चूर्ण कर मिश्री मिलावे । यह चूर्ण दुष्ट जलके रोग, संग्रहणी और अतीसारको दूर करता है ॥ १-४ ॥

यवान्यादिचूर्ण ।

यवानीपिप्पलीमूलचातुर्जातकनागरैः ।
मरिचेन्द्रयवाजाजीधान्यसौवर्चलैः समैः ॥ १ ॥
वृक्षाम्लधातकीकृष्णाबिल्वदाडिमदीपकैः ।
त्रिगुणैः षड्गुणैः सिद्धैः कपित्थोऽष्टगुणः स्मृतः ॥२॥
चूर्णमतीसारग्रहीक्षयगुल्मगलामयान् ।
कासश्वासाग्निमन्दार्शः पीनसारोचकाञ्जयेत् ॥ ३ ॥

अजमायन, पीपलामूल, चातुर्जात, सोंठ, मिरच, इन्द्रजव, जीरा, धनिया कालानोन य सब समान लेवे । अमलवेत, धायके फूल, पीपल, बेल, अनारदाना, अजमोद ये सब हरएक तिगुनी लय और मिश्री छः गुनी लेवे, कैथके आठ भाग लेवे । यह चूर्ण अतीसार, ग्रहणी, क्षय, गुल्म, गोलेके रोग, खांसी, श्वास, मन्दाग्नि, अर्श, पीनस, अरुचि आदिको दूर करता है ॥ १-३ ॥

दाडिमाष्टकचूर्ण ।

दाडिमस्य पलान्यष्टौ शर्करायाः पलाष्टकम् ।
पिप्पली पिप्पलीमूलं यवानी मरिचं तथा ॥ १ ॥
धान्यकं जीरकं शुण्ठी प्रत्येकं पलसम्मितम् ।
कर्षमात्रा तुगाक्षीरी त्वक्पत्रैलाश्च केशरम् ॥ २ ॥

Aho ! Shrutgyanam

**प्रत्येकं कोलमात्रं स्यात्तच्चूर्णं दाडिमाष्टकम् ।**
**अतीसारं क्षयं गुल्मं ग्रहणीं च गलग्रहम् ।**
**मन्दाग्निं पीनसं कासं चूर्णमेतद्व्यपोहति ॥ ३ ॥**

अनारदाना ८ पल, मिश्री ८ पल, पीपल, पीपलामूल, अजमायन, मिरच, धनियां, जीरा, सोंठ, ये सब एक एक पल लेवे, वंशलोचन ४ टंक, तज, तेजपात, दालचीनी, इलायची, नागकेशर इन औषधियोंको दो दो टंक लेवे, यह दाडिमाष्टक चूर्ण अतीसार, क्षयी, गोला, संग्रहणी, गलरोग, मन्दाग्नि, पीनस, खांसी आदि रोगोंका नाश करे ॥ १-३ ॥

उदरकृमिरोगमें वचादिचूर्ण ।

**वचाऽजमोदा कृमिहृत्पलाशबीजं सटी रामठकं त्रिवृच्च । जलेन तप्तेन तु पेष्यपेयं पतन्ति शीघ्रं कृमयः समूलाः ॥ १ ॥**

वच, अजमोद, वायविडंग, ढाकके बीज, सोंठ, कचूर, हींग, निसोथ इनका चूर्ण गरम जलके साथ पीवे तो सब कृमि गिरपडें ॥ १ ॥

**कपिल्लकं विडङ्गानि क्षारं सैन्धवमेव च ।**
**पिष्ट्वा तक्रेण पातव्यं नित्यं कृमिविनाशनम् ॥ १ ॥**

कबीला, वायविडंग, जवाखार, सैंधानोन इनको पीसकर मठेके संग पीवे तो कृमि नाश होवें ॥ १ ॥

**कोलमज्जा कणा वह्निपक्षभस्म सशर्करम् ।**
**मधुना लेहयेच्छर्दिहिक्काकोपस्य शांतये ॥ १ ॥**

बेरकी मिंगी, पीपल, चीता, मोरपंखकी राख, मिश्री शहदके साथ लेवे तो छर्दि, हिचकी ये सब दूर होवें ॥ १ ॥

Aho ! Shrutgyanam

लाजाकपित्थमधुमागधिकोषणानां क्षुद्राभयात्रि-
कटुधान्यकजीरकाणाम् । पथ्यामृतामरिचमाक्षि
कपिप्पलीनां लेहास्त्रयःसकलवम्यरुचिप्रशान्त्यै ॥२॥

पहिला—धानकी खील, कैथ, मुलहठी, पीपल, मिरच, दूसरा कटेरी, हरड, त्रिकटु, धनियां जीरा इनका अवलेह और तीसरा—हरड़, गिलोय, मिरच, शहद, पीपल इनका अवलेह सब अरुचि और छर्दिका नाश करता है ॥ २ ॥

कोलामलकमज्जानौ मक्षिकाविट् सिता मधु ।
सकृष्णातण्डुलो लेहः श्रेष्ठश्छर्दिनिवारणः ॥ ३ ॥

बेरकी मिंगी, आंवलेकी मिंगी, मक्खीकी बीट, मिश्री, शहद, पीपल इनको सांठी चावलोंके पानीके साथ लेवे तो सब प्रकारकी छर्दि जाय ॥ ३ ॥

दन्तपीडामें जातीपत्रादिचूर्ण ।

जातीपत्रपुनर्नवागजकणाकोरण्टकुष्ठावचा-
शुण्ठी दिव्यशतावरी समघृतं चूर्णं मुखे धार्यते ।
वातघ्नं कफनाशनं कृमिहरं दुर्गंधिनिर्णाशनं
वक्रस्यापि समस्तदोषहननं दन्तश्च वज्रायते ॥ १ ॥

जावित्री, सांठकी जड, गजपीपल, कोरटंक वृक्षके फूल, कूठ, वच, सोंठ लौंग, शतावर इन सबको बराबर लेवे और सबके समान घी लेकर मुखमें रखनेसे वायुविकार, कफ, कृमि तथा मुँहकी दुर्गंध जाय और दाँत वज्रके समान होजावें ॥ १ ॥

कुष्ठं दार्वी लोध्रमब्दं समङ्गा पाठा का तेजनी
पीतका च । एतच्चूर्णं घर्षणं तद्द्विजानां रक्तस्रावं

Aho ! Shrutgyanam

हन्ति कण्डूरुजं च ॥ २ ॥ फलान्यम्लानि शी-
ताम्बु रूक्षान्नं दन्तधावनम् । तथाऽतिकठिनान्भ-
क्ष्यान्दन्तरोगीविवर्जयेत् ॥ ३ ॥

कूठ, दारुहलदी, लोध, मोथा, मँजीठ, पाढ, कुटकी, मूर्वा ( एक लता होती है ), हलदी इन सब औषधियोंका चूर्ण कर दातोंमें मले तो रुधिर गिरना, खुजली, दरद आदिको दूर करे और खट्टा फल तथा खटाई न खावे, ठंढा पानी न पीवे, रूखा अन्न दन्तधावन, अति- कठिन भोजन इन सबको दंतरोगी छोडदेवे ॥ २-३ ॥

दन्तमसी ।

कासीसं त्रिफला माजूफलं जुङ्गी हरीतकी । कर्पूरं
खदिरं ताप्यं लोहचूर्णं च विद्रुमम् ॥ १ ॥ दाडिमं
त्वक्च मंजिष्ठा लोध्रं तुत्थं सुराष्ट्रजा । मस्तंगी
विदलं पूगं सर्वं सूक्ष्मविचूर्णितम् । दन्तशूलहरं
चाम्लं दन्तकृष्णीकरं तथा ॥ २ ॥

कसीस, त्रिफला, माजूफल, जंगीहरड, कपूर, खैरसार, सोना मक्खी, लोहचूर्ण, मूंगा, अनारका छिलका, मँजीठ, लोध, नीलाथोथा, फिटकरी, मस्तंगी, विदल, सुपारी, इन सबको बराबर लेकर पीस ले । यह दाँतोंका दरद दूर करे तथा दाँतोंको स्याह करे, यह खट्टा है ॥ १ ॥ २ ॥

कायाकल्पमें भृंगराजचूर्ण ।

समूलं भृंगराजं चं छायाशुष्कं तु कारयेत् ।
तत्समं त्रिफलाचूर्णं सर्वतुल्या सिता भवेत् ॥ १ ॥
पलैकं भक्षयेच्चैतदपमृत्युज्वरापहम् ॥ २ ॥

भांगरा पचांगको छायामें सुखावे उसकी बराबर त्रिफला और

Aho ! Shrutgyanam

सबके समान मिश्री डाले. इस चूर्णको एक पल लेवे तो अपमृत्यु और ज्वरका नाश करे ॥ १–२ ॥

सूक्ष्मीकृतं भृङ्गनृपस्य चूर्णैः कृष्णैस्तिलैरामलकैश्च सार्द्धम् । सितायुतं भक्षयतां नराणां न व्याधयो नैव जरा न मृत्युः ॥ ३ ॥

भांगरेके पचांगको महीन पीसकर काले तिल, आंवले बराबर लेवे और फिर इनके बराबर मिश्री डाले इस चूर्णको जो कोई खावे इसको व्याधि, बुढापा, पलित और अपमृत्यु न सतावे ॥ ३ ॥

आमलकादिचूर्ण ।

आमलं चित्रिकं पथ्या पिप्पली सैन्धवं तथा । भेदी रुचिकरः श्लेष्मजेता पाचनदीपनः ॥ १ ॥

आंवला, चीता, हरड, पीपल, सैंधानोन इनका चर्ण भेदी, रुचि कारक, तथा श्लेष्मविकारको दूर करे और अग्निको दीपन करता है ॥ १ ॥

स्तम्भनचूर्ण ।

अकारकरभः शुंठी कंकोलं कुङ्कुमंकणा । जातीफलं लवङ्गं च चन्दनं चेति कर्षकान् ॥ १ ॥ चूर्णानि मानतः कुर्यादहिफेनपलोन्मितान् । सर्वमेकीकृतं चूर्णमाषैकं मधुना लिहेत् ॥ २ ॥ शुक्रस्तम्भकरं चूर्णं पुंसामानन्दकारकम् । नारीणां प्रीतिजननं सेवेत निशि कामुकः ॥ ३ ॥

अकरकरा, सोंठ, कंकोल, मिरच, केशर, पीपल, जायफल, लौंग, चन्दन, इन सबको चार चार टंक लेवे, सबसे आधी अफीम १६ टंक सबका चूर्ण कर शहदके साथ एक मासा नित्य चाटे तो वीर्यको स्तंभन करे, पुरुषको अति आनन्द

Aho ! Shrutgyanam

करे, स्त्रियोंको परमप्रीति होवे, यह चूर्ण कामी पुरुषको रात्रिसमय खाना चाहिये ॥ १-३ ॥

बुद्धिवृद्धिके लिये सारस्वतादिचूर्ण ।

कुष्ठाश्वगन्धे लवणाजमोदे द्वे जीरके त्रीणि कटूनि पाठा । मांगल्यपुष्पा च समानचूर्णं कृत्वा च चूर्णेन वचोद्भवेन ॥ १ ॥ तुल्येन युक्तं बहुशो रसेन तद्भावितं ब्रह्मविनिर्मितायाः । सर्पिर्मधुभ्यां च ततोऽक्षमात्रं लिह्याद्दिनात्सप्तगुणांश्च सप्त ॥२॥ सारस्वतमिदं चूर्णं ब्रह्मणा निर्मितं स्वयम् । जगद्धिताय लोकानां दुर्मेधानामचेतसाम् ॥ ३ ॥

कूठ, असगंध, सेंधानोन, अजमोद, दोनों जीर, सोंठ और सबकी बराबर वच लेवे. मिरच, पीपल, पाढ, शंखाहूली इनकी समान मात्रा लेवे. इनको चूर्ण कर ब्राह्मीके रसकी भावना देवे, यह ब्रह्माने अपनी बुद्धिसे रचा है. घृत अथवा शहद ४ टंक ले, ४९ दिन खावे तो यह चूर्ण मूर्खकी बुद्धिको बढावे ॥ १-३ ॥

गुडूच्यपामार्गविडङ्गशङ्खिनी ब्राह्मी वचा शुण्ठिशतावरी च । घृतेन लीढा प्रकरोति मनवांस्त्रिभिर्दिनैर्ग्रन्थसहस्रधारिणः ॥ ४ ॥ ब्राह्मी मुण्डी पिप्पली नागराजं कुष्ठं सर्पिः श्वेतवर्णा वचा वा । मौढ्यार्त्तानामक्षमात्रं ददीत प्रज्ञा मेधा वर्द्धते मासयुग्मात् ॥५॥ ज्योतिष्मत्यास्तैलमेकं पिबेच्च गुञ्जावृद्ध्या कर्षमात्रंतु यावत् । सौरे पर्वण्यम्बुमध्ये प्रविष्टः प्रज्ञामूर्तिर्जायतेऽसौ कवीन्द्रः ॥ ६ ॥

Aho ! Shrutgyanam

गिलोय, ओंगा, वायविडंग, शंखाहुली, ब्राह्मी, वच, सोंठ, शतावरी ये सब बराबर लेवे और चूर्ण कर घृतके संग अवलेह कर सेवन करे तो तीन दिनमें हजार श्लोककी धारणा होवे, मालकांगनीके तेलको सूर्यपर्वके समय जलमें पीवे तो पंडित होवे ॥ ४–६ ॥

त्रिकटुत्रिफलाधान्य यवानी शतमूलिका । वचा भार्ङ्गी तथा ब्राह्मीचूर्णं समधु लेहयेत ॥ ७ ॥
वाक्प्रदायि च बालानां वीणावाद्यसमस्वरम् । तैलं तीक्ष्णं रूक्षमम्लं वातलं च विवर्जयेत् ॥ ८ ॥
ज्योतिष्मत्यास्तैलमत्राभिमन्त्र्य वाग्वादिन्या मंत्र-बीजं त्रिकं तु । जिह्वायां वै लिख्यते यस्य जन्तोर्वै लेखन्या जायतेऽसौ कवीशः ॥ ९ ॥

नागपुरीययतिगणश्रीहर्षकीर्तिसंकलिते ।
वैद्यकसारोद्धारे चूर्णाधिकृतिर्द्वितीयेयम् ॥ २ ॥

सोंठ, मिरच, पीपल, त्रिफला, धनियां, अजमायन, शतावरी, वच, ब्राह्मी, भारंगी इन सबको बराबर लेवे और शहदके साथ सेवन करे तो बालकभी बोलनेमें चतुर होय, वीणाकासा शब्द बोले । इन चीजोंसे परहेज करे–तैल, चरपरा, रूखा, खट्टा, वातल । ब्राह्मी, गोरखमुंडी, पीपर, नागेश्वर, कूठ, मक्खन और सपेद वच ये औषध मूर्खोंको १ तोला देनेसे कवीन्द्र करता है अथवा मालकांगनीके तेलको सरस्वतीके मन्त्रसे अभिमन्त्रित कर बालककी जीभपर सरस्वती बीजको लिखे तो कविराज होय ॥ ७-९ ॥

इति श्रीमाथुरदत्तराम चौबेकृतमाथुरीमञ्जूषाभाषा-
टीकायां चूर्णाधिकारो द्वितीयोऽध्यायः ॥ २ ॥

Aho ! Shrutgyanam

# अथ गुटिकाधिकारः-तृतीयोऽध्यायः ३.

रुचिकर अमृतप्रभा नाम गुटिका १-२ ।

मरिचं पिप्पलीमूलं लवङ्गं च हरीतकी । यवानी तिन्तडीकं च दाडिमं लवणत्रयम् ॥ १ ॥ एतानि पलमात्राणि मागधी क्षारचित्रकम् । ब्यजाजी नागरं धान्यमेला धात्रीफलं समम् ॥ २ ॥ एतान्द्विपलिकान्भागान्भावयेद्बीजपूरकैः । भावनात्रितयं दत्त्वा गुटिकां कारयेद् बुधः ॥ ३ ॥ छायाशुष्कां प्रकुर्वीत ह्यजीर्णस्य प्रशान्तये । अग्निं च कुरुते घोरं गुटिका चामृतप्रभा ॥ ४ ॥

१-मिरच, पीपलामूल, लौंग, हरड, अजवायन, तंतडीक, अनारदाना, सेंधानोन, कालानोन, कचनोन ये सब औषधि एक एक पल लेवे. पीपल, जवाखार, चीता, दोनों जीरे, सोंठ, धानियां, इलायची, आंवला, ये सब औषधि एक एक पल लेवे फिर बिजौरेके रसमें घोटकर तीन पुट दे, गोली बनाकर छायामें सुखावे । यह अजीर्णको दूर करे, अग्निदीपन करे और ये गोली अमृतके तुल्य हैं ॥ १-४ ॥

आकल्लकं सैन्धववह्निशुण्ठीधात्र्यूषणं दिव्यसमा सपथ्या । रसेन भाव्यं फलपूरकेण मन्दानिलत्वे ह्यमृतप्रभेयम् ॥ ५ ॥ कासे गलामये श्वासे प्रतिश्याये च पीनसे । अपस्मारे तथोन्मादे सन्निपाते सदा हिता ॥ ६ ॥

Aho ! Shrutgyanam

२-अकरकरा, सैंधानोन, चीता, सोंठ, आंवला, मिरच, लौंग और हरड इनको बिजौरेके रसकी भावना देकर गोली बनावे । मन्दाग्निवालेको यह अमृत समान है, इससे खांसी, गलरोग, श्वास, पीनस आदि रोग दूर होवें. अपस्मार, उन्माद, सन्निपातवालोंको भी हितकारी है ॥ ५ ॥ ६ ॥

वटप्ररोहादिगुटिका ।

**वटप्ररोहं मधु कुष्ठमुत्पलं सलाजचूर्णैर्गुटिकां प्रकल्पयेत् । सशर्करा सा वदने च धारिता तृषां प्रवृद्धामपि हन्ति सत्वरम् ॥ १ ॥**

वडकी जटा, शहद, कूठ, कमलगट्टा, धानकी खील इनकी गोली बनाकर मिश्रीके साथ मुँहमें राखे तो प्यास बंद होवे ॥ १ ॥

राजगुटिका १-२ ।

**शुण्ठ्याः पलं पलार्द्धं च गन्धकं सैन्धवं तथा ।**
**निम्बूकरससंबद्धाहन्त्यजीर्णं विषूचिकाम् ॥ १ ॥**

१-सोंठ एक पल, गन्धक, सैंधानोन आधा पल, इनको नीम्बूके रसमें मिलाय छोटे बेरके समान गोली बना लेवे तो अजीर्ण और विषूचिकाको दूर करे ॥ १ ॥

**नागरं च चतुर्भागं तदर्द्धं सैन्धवं तथा । गन्धकं भागमेकं च काप्थ्या गन्धकं समम् ॥ २ ॥**
**निम्बूरसस्य सप्ताहं पुटं दद्याद्विशारदः ।**
**विषूचिकाजीर्णशूलं मन्दाग्निं वमनं हरेत् ॥ ३ ॥**
**एषा राजवटी नाम कोलमात्रं तु भयक्षेत ॥ ४ ॥**

२-साठ ४ टंक, सैंधानोन २ टंक, हरड १ टंक, गन्धक १ टंक इनकी नीम्बूके रसमें छोटे बेरके समान गोली बनावे

Aho ! Shrutgyanam

और खाय तो विषूचिका, अजीर्ण, मन्दाग्नि और वमन इन सबका नाश करे ॥ २-४ ॥

उन्मीलनीगुटिका ।

उन्मीलनी बुद्धिबलेन्द्रियाणां निर्मूलनी वातकफार्दितानाम् । संशोधिनी मूत्रपुरीषयोश्च हरीतकी शुण्ठिगुडप्रयुक्ता ॥ १ ॥

हरड, सोंठसे गुडकी गोली बुद्धि बढावे, मनुष्यकी इद्रियोंको चैतन्य करे, वात कफादिक रोगोंको निर्मूल करे, मलमूत्रको शुद्ध करती है ॥ १ ॥

गुडचतुष्टयवटिका ।

आमेषु सगुडां शुण्ठीमजीर्णे गुडपिप्पलीम् ।
कृच्छ्रे जीरगुडं दद्यादर्शोघ्नं गुडदाडिमम् ॥ १ ॥

आमरोगमें सोंठ गुड, अजीर्णमें गुड पीपल, मूत्रकृच्छ्ररोगमें जीरा गुड और बवासीर रोगमें अनारदाना गुडसंयुक्त देना चाहिये ॥ १ ॥

गुडविश्वौषधं पथ्यामागधीदाडिमैः कृता ।
वटिर्हन्याद् भक्ष्यमाणा गुल्मार्शोवह्निजान् गदान् १॥

गुड, सोंठ, हरड. पीपल, अनारदाना इनकी गोलीको खावे तो गुल्म आदि रोगोंका नाश करे और अग्निको दीपन करता है ॥ १ ॥

सूरणादिवटिका ।

चूर्णीकृताः षोडश सूरणस्य भागास्तदर्द्धेन च चित्रकस्य । महौषधी द्वौ मरिचस्य चैको गुडेन दुर्नामजयाय पिंडी ॥ १ ॥ मरिचमहौषधिचित्रक

Aho ! Shrutgyanam

सूरणभागा यथोत्तरं द्विगुणाः । सर्वसमो गुडभागो वटिका दुर्नामनाशाय॥२॥वृद्धदारुकभल्लातशुण्ठी चूर्णेन योजितः । मोदकः सगुडो हन्यात्षड्विधा-र्शस्कृतां रुजम् ॥ ३ ॥

जिमीकन्दका चूर्ण १६ पल, चित्रक ८ पल, सोंठ २ पल, मिरच १ पल इनकी गोली गुडमें बनावे तो अर्शको दूर करे मिरच चार टंक, सोंठ ८ टंक, चीता १६ टंक, जिमींकंद ३२ टंक, गुड सबके बराबर लेवे और गोली बनाकर खाय तो अर्शरोगको दूर करे । विधायरा, शुद्ध भिलावा और सोंठ इनका चूर्ण गुड मिलाय गोली बनाकर खावे तो छः प्रकारके अर्शरोगोंका नाश करे ॥ १-३ ॥

सनागरापुष्करवृद्धदारुकं गुडेन यो मोदकमत्त्यु-दारकम् । अशेषदुर्नामकरोगदारकं करोति वृद्धं सहसैव दारकम् ॥ ४ ॥

सोंठ, पुहकरमूल, विधायरा इनकी भले प्रकार गुडमें गोली बनाकर खावे तो सम्पूर्ण प्रकारके अर्शोंका नाश करे और बल बुद्धिको बढावे ॥ ४ ॥

कांकायनीगुटिका ।

पथ्या पञ्चपलान्येकमजाजिमरिचस्य च । पिप्पली पिप्पलीमूलं चव्यचित्रकनागरैः ॥ १ ॥ पलाभि-वृद्धैः क्रमशो यवक्षारं पलद्वयम् । भल्लातकपला-न्यष्टौ सूरणो द्विगुणोमतः ॥ २ ॥ द्विगुणेन गुडेनैषा वटिका चाक्षसंमिता । एकैकां भक्षयेत्प्रातस्तक्र-मम्लं पिबेदनु ॥ ३ ॥ वह्निं संदीपयत्याशु ग्रहणी

Aho ! Shrutgyanam

पाण्डुरोगजित् । कांकायनेन शिष्येभ्यः शस्त्र-
क्षाराग्निभिर्विना ॥ ४ ॥ कथिता गुटिका चैषा
गुदजानां विनाशिका ॥ ५ ॥

हरड ५ पल, जीरा १ पल, मिरच १ पल, पीपल १ पल, पिपलामूल १ पल, चव्य ४ पल, चित्रक ५ पल, सोंठ ६ पल ये सब औषधि पलपल क्रमसे और जवाखार २ पल, शुद्ध भिलावा ८ पल, जिमींकंद सबसे दूना और गुड मिलाके छोटे बेरके समान गोली बनावे और प्रातःकाल छाछके साथ लेवे तो अग्निको दीप्त करे, संग्रहणी और पाण्डुरोगका नाश करे, यह कांकायनकविने अपने शिष्योंसे कहा है और संपूर्ण गुदाके रोगोंका नाशक है ॥ १ ॥ ५ ॥

अभयादिमोदक ।

अभया पिप्पलीमूलं मरिचं नागरं तथा । त्वक्पत्रं
पिप्पली मुस्तं विडङ्गामलकानि च ॥ १ ॥ कर्षं
प्रत्येकमेषां तु दंत्याः कर्षत्रयं तथा । षट्कर्षाश्च
सितायास्तु द्विपला त्रिवृता भवेत् ॥ २ ॥ सर्वं
संचूर्णितं कृत्वा मधुना मोदकः कृताः । खादेत्
प्रतिदिनं चैकं शीतं चानु पिबेज्जलम् ॥ ३ ॥
तावद्विरिच्यते जन्तुर्यावदुष्णं न सेवयेत् । पाण्डुरोगं
विषं कार्श्यं जंघायाश्च रुजस्तथा ॥ ४ ॥ शिरोर्ति
मूत्रकृच्छ्रं च दुर्नामकभगन्दरौ । अश्मरीमेहकुष्ठं
च दाहशोफोदराणि च ॥ ५ ॥

हरड, पीपलामूल, मिरच, सोंठ, तज, तेजपात, पीपल, मोथा, वायविडंग, आमला इन सबको चार चार टंक लेवे और दन्ती १२

Aho ! Shrutgyanam

टंक ( दन्ती वह है जिसका फल जमालगोटा होता है ), मिश्री २४ टंक, निसोथ ३२ टंक इनका चूर्ण कर शहदमें गोली बनावे और एक गोली नित्य ठंढे पानीके साथ खाय तो जबतक गरम जल न पीवे तबतक दस्त होय और पाण्डुरोग, विषरोग, कृशता और जंघाके सब रोग, मस्तकरोग, मूत्रकृच्छ्र, अर्श, भगंदर, पथरी, मेह, कोढ, दाह, सूजन, उदररोगादिकोंको दूर करता है ॥ १–९ ॥

अजमोदादिगुटिका या चूण १-२ ।

अजमोदा मरिचकणा विडंगसुरदारुचित्रकशताह्वा। सैंधवपिप्पलिमूलं भागौ नवकस्य पलिकः स्यात् ॥ १ ॥ शुण्ठी दशपलिका स्यात्पलानि तावंति वृद्धदारोश्च । दंत्याः पलानि पंच च सर्वाण्येकत्र कारयेच्चूर्णम् ॥ २ ॥ समगुडवटिका अदतश्चूर्णं वा कोष्णवारिणा पिबतः । नश्यंत्यनिलोद्भूताः सर्वे रोगास्तथा वाताः ॥ ३ ॥

१–अजमोद, मिरच, पीपल, वायविडंग, देवदारु, चित्रक, सोवा, सैंधानोन, पीपलामूल ये सब नौ पल और सोंठ १० पल, विदारी कन्द १० पल, दन्ती ५ पल, हरड५पल इन सब औषधियोंके बराबर गुड मिलावे अथवा चर्णकोही गरम जलके साथ पीवे तो संपूर्ण वातरोगोंका नाश करता है ॥ १–३ ॥

हिंगुभागो भवेदेको वचा च द्विगुणा भवेत् ।
त्रयो भागा विडंगानां सैन्धवं च चतुर्गुणम् ॥ १ ॥
अजाजी पंचभागा च षड्भागं नागरं तथा ।
मरिचं सप्तभागं च पिप्पल्यष्टगुणा भवेत् ॥ २ ॥

Aho ! Shrutgyanam

कुष्ठस्य नव भागाः स्युर्दशभागा हरीतकी।
एकादश चित्रकस्य अजमोदा च द्वादश ॥ ३ ॥
गुडश्च सर्वद्विगुणो गुटिकां कारयेद्दृढाम्।
हन्यादनेकवातांश्च हर्षं चैव चतुर्दश ॥ ४ ॥
अष्टादशैव गुल्मानि प्रमेहान्विंशतिं तथा।
हृद्रोगकुष्ठशूलानि वातगुल्मं गलग्रहम् ॥ ५ ॥
श्वासं च ग्रहणीं पाण्डुमग्निमांद्यारुची तथा।
धन्वंतरिकृतो योगो निजपुत्रस्य हेतवे ॥ ६ ॥

२-हिंग १ भाग, वच २ भाग, सैंधानोन ४ भाग, जीरा ५ भाग, सोंठ ६ भाग, मिरच ७ भाग, पीपल ८ भाग, कूठ ९ भाग, हरड १० भाग, चीता ११ भाग, अजमोद १२ भाग, इन सबसे दूने गुडमें गोली ७ टंक प्रमाणकी बनावे। यह अनेक वायुरोग, १४ प्रकारका हर्ष, १८ प्रकारका गुल्म, २० प्रकारका प्रमेह, हृदय-रोग, कुष्ठ, शूल, वायगोला, गलग्रह, श्वास, संग्रहणी, पांडुरोग, अग्निमांद्य और अरुचि इन रोगोंको दूर करे। यह योग धन्वंतरिने अपने पुत्रके लिये कहा है ॥ १-६ ॥

उदरविकारमें एलादिवटिका।

एलीयकं कणा पथ्या शुण्ठी चित्रकटंकणम्।
राजिका सर्जिका सौरो विडंगाजाजिसैन्धवम् ॥
गुडेन गुटिका कार्या यकृत्प्लीहविनाशिनी ॥ १ ॥

इलायची पीपल, हरड, सोंठ, चित्रक, सुहागा, राई, सज्जी, शोरा, वायविडंग, जीरा, सेंधानोन इनको बराबर लेवे और गुडके साथ गोली बनावे तो यकृत प्लीहादि रोगोंको दूर करे ॥ १ ॥

Aho ! Shrutgyanam

पाण्डुरोगमें नवरसादिगुटिका ।

चित्रकं त्रिफला मुस्तं विडंगं त्र्यूषणानि च ।
समभागानि कार्याणि सर्वतुल्यमयोरजः ॥ १ ॥
मधुसर्पिर्युतं लेह्यं गुडेन गुटिकाथवा ।
गोमूत्रमथवा तक्रमनुपाने प्रशस्यते ॥ २ ॥
पाण्डुरोगं जयेदुग्रं हृद्रोगं च भगन्दरम् ।
शोफकुष्ठोदरार्शांसि मन्दाग्निमरुचिं कृमीन् ॥ ३ ॥

चित्रक, त्रिफला, मोथा, वायविडंग, सोंठ, मिरच, पीपल सब बराबर और सबके बराबर लोहसार शहद और घास खाय अथवा गुडमें गोली बनावे और गोमूत्र वा छाछके संग लेवे तो पांडुरोग, हृदयरोग, भगंदर, सूजन, कोढ, उदररोग, अर्श, मंदाग्नि, अरुचि, क्रिमि आदि रोगोंको नाश करे ॥ १-३ ॥

वृद्धिनवरसगुटिका ।

विडङ्गं त्रिफला व्योषं चातुर्जातकचित्रकम् ।
स्वर्णमाक्षी तवाक्षीरं जीमूतं वंशलोचनम् ॥ १ ॥
क्वाथसंपक्वलोहं च शर्करापि समन्विता ।
गुटिकां मधुसंयुक्तां प्रातरेकां तु भक्षयेत् ॥ २ ॥
प्रमेहशोफारुचिमामवातं सकामलं पाण्डुगदं सकुष्ठम् । श्वासं च कासं च निहन्ति गुल्मं दुर्नामकं नाशयते च सद्यः ॥ ३ ॥

वायविडंग, त्रिफला, सोंठ, मिरच, पीपल, तज, तेजपात, इलायची, नागकेशर, चीता, सोनामक्खी, तवाखीर, मोथा, वंशलोचन, सार, मंडूर ये सब बराबर, मिश्री सबके बराबर

Aho ! Shrutgyanam

लेकर शहदमें गोली बनावे और प्रातःकाल खावे तो प्रमेह, शूल, अरुचि, आमवात, पीलिया, पांडुरोग, कोढ, श्वास, खांसी, गोला और अर्श आदिको नाश करे ॥ १–३ ॥

प्रमेहमें चन्द्रकलागुटिका ।

एला सुकर्पूरसुधासधात्री जातीफलं गोक्षुरशा-
ल्मली च । सूतेन्द्रवंगायसभस्म सर्वमेतत्समानं
परिमर्दयेच्च ॥ १ ॥ गुडूचिका शाल्मलिका कषा-
यपिष्टं समाना मधुना ततश्च । बद्धा गुटी चन्द्र-
कलेति संज्ञा मेहेषु सर्वेषु नियोजनीया ॥ २ ॥

इलायची, कपूर, मिश्री, आंवला, जायफल, गोखरू, सेमलका गोंद, पारा, इंद्रयव, बंगसार इसकी समान मात्रा लेकर एक प्रहर मर्दन करे फिर गिलोय और सेमलके गोंदके काढेमें घोटे और शहदमें गोली बनावे. यह चन्द्रकला गुटिका संपूर्ण प्रमेहोंको दूर करती है ॥ १ ॥ २ ॥

पीनसादिमें व्योषादिगुटी ।

व्योषाम्लवेतसं चव्यं तालीसं चित्रकं तथा ।
जीरकं तिन्तडीकं च प्रत्येकं कर्षभागकम् ॥ १ ॥
त्रिसुगंधं त्रिभागं स्याद्गुडः स्यात् कर्षविंशतिः ।
व्योषादिवटिका नाम पीनस श्वासकासजित् ॥२॥
रुचिस्वरकरी ख्याता प्रतिश्यायप्रणाशिनी ॥ ३ ॥

सोंठ, मिरच, पीपल, अमलवेत, चव्य, तालीस, चित्रक, जीरा, तंतडीक इन सबको एक एक कर्ष, त्रिसुगंध तीन भाग और गुड २० कर्ष लेवे, यह व्योषादिवटी है । इसके खानेसे पीनस, खांसी श्वास, अरुचि और स्वरभंग आदि रोग नाश होवें ॥ १–३ ॥

Aho ! Shrutgyanam

मरिचादिगुटी ।

मरिचं कर्षमात्रं स्यात्पिप्पली कर्षसंमिता ।
अर्द्धकर्षं यवक्षारं कर्षयुग्मं च दाडिमम् ॥ १ ॥
एतच्चूर्णीकृतं युञ्ज्यादष्टकर्षगुडेन हि ।
शाणप्रमाणां गुटिकां कृत्वा वक्रे च धारयेत् ॥
अस्याः प्रभावात्सर्वेऽपिकासा यांत्येव संक्षयम् २॥

मिरच ४ टंक, पीपल ४ टंक, जवाखार २ टंक, अनारदाना ८ टंक इनको पीसकर ३२ टंक गुड मिलावे और टंक टंकके प्रमाण गोलियां बांधे और मुखमें रक्खे. इन गोलियोंके प्रभावसे पांच प्रकारकी खांसीका नाश होता है ( इसको दाडिमादि गुटिका भी कहते हैं ) ॥ १ ॥ २ ॥

खैरसारादिगुटिका ।

बिभीतकहरीतक्यौ धात्रीकटुफलानि च । शुंठी-
मरिचपिप्पल्य एला कर्कटशृंगिका ॥ १ ॥
कर्पूरं पिप्पलीमूलं लवङ्गं शुंठिसंयुतम् ।
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत् ॥ २ ॥
खदिरं च समं देयमार्द्रकद्रवभावना । भावयेत्कि-
क्रीकाथैर्वटिका कोलमात्रया ॥ ३ ॥ कासं कण्ठे
कफं हन्ति स्वरभङ्गं च दारुणम् । गृध्रसी च
निहंत्याशु क्षयरोगहरी परा ॥ ४ ॥

बहेडा, हरड, आंवला, कायफल, सोंठ, मिरच, पीपल इलायची, काकडासिंगी, कपूर, पीपलामूल, लौंग, कचूर ये औषधि बराबर ले महीन चूर्ण कर सबके बराबर खैरसार डाल फिर अदरखके रसकी भावना देवे, फिर छोटे बेरकी बराबर गोली

Aho ! Shrutgyanam

बनावे । यह गोली पांच प्रकारके कासरोग, कफ, दारुण स्वरभंग, गृध्रसी और क्षयरोगको नाश करती है ॥ १-४ ॥

वीजपूरादिवटिका ।

त्रिकटुविकटदंष्ट्रा हिंगुगुंजाररौद्रस्त्रिलवणनखमुग्रं जीरके द्वे चपेटः । प्रकटितकटुकाग्रप्रोल्लसत्केशरौघः कफमदगजहन्ता केशरी बीजपूरः ॥ १ ॥

सोंठ, मिरच, पीपल यही भई विकट डाढ, हींग मानो विकराल शब्द ( गुंजार ), सैंधानोन, कालानोन, बिडनोन, ये मानो उग्रनख, दोनों जीरे ये चपेट प्रकट जो अदरखकी कटुताई तिसकरके है प्रकाश जिसका ऐसा केसरी मानो कफ, मदयुक्त जो हस्ती इसको मारनेवाला यह बिजोरा है ॥ १ ॥

कासरोगमें बबूलगुटिका ।

रसभागो भवेदेको गन्धको द्विगुणो मतः ।
त्रिभागा पिप्पली ग्राह्या चतुर्भागा हरीतकी ॥ १ ॥
विभीतकं पञ्चभागमटरूषश्च षड्गुणः ।
भाङ्गी सप्तगुणा ग्राह्या सर्वचूर्णं प्रकल्पयेत् ॥ २ ॥
बबूलक्काथमादाय भावना एकविंशतिः ।
कार्या विभीतकमिता गुटिका मधुना सह ॥ ३ ॥
कासं पंचविधं हन्यादूर्ध्वश्वासं कफंजयेत् ॥ ४ ॥

पारा एक भाग, गंधक दो भाग, पीपल तीन भाग, हरड चार भाग, बहेडा पाँच भाग, अडूसा छः भाग, भारंगी सात भाग इन सबका चूर्ण कर फिर बबूलकी छालके काढेकी २१ भावना देवे और बहेडेके समान गोली बनावे, यह गोली पांच प्रकारका कास, ऊर्ध्वश्वास और कफको दूर करती है ॥ १-४ ॥

Aho ! Shrutgyanam

आमलादिवटिका।

आमलं कमलं कुष्ठं लाजाश्च वटरोहकम्।
एतच्चूर्णस्य मधुना गुटिकां धारयेन्मुखे।
तृषां प्रवृद्धां हंत्येषा मुखशोषं च दारुणम्॥ १॥

आमला, कमलगट्टा, कूठ, धानकी खील, बडकी जटा इनका चूर्ण कर शहदमें गोली बनाकर मुखमें रक्खे तो बहुत प्यास और भयानक मुख सूखना दूर होवे॥ १॥

शंखवटी १–२।

चिंचाक्षारपलं पटुव्रजपलं निम्बूजले कल्कितं
तस्मिञ्छंखपलं प्रतप्तमसकृन्निर्वाप्य शीर्णावधि।
हिङ्गुव्योषपलं रसामृतपलं निक्षिप्य निःक्वासकान्।
हर्त्री शंखवटी क्षयग्रहणिरुग्घृद्याऽन्त्रशूलादिषु॥ १॥

इमलीका खार एक पल, पांचों नोन एक पल, नींबूका रस इनमें एक पल शंखको गरम करके जबतक उसके टुकडे न हों तबतक बुझावे, फिर हींग, सोंठ, मिरच, पीपल १ पल, शुद्ध पारा शुद्ध गंधक इनको डालकर गोली १ टंकके प्रमाण बनावे। यह गोली क्षयरोग, संग्रहणी, हृदय, पसलीके शूलादिकोंको दूर करती है॥ १॥

चिंचाक्षारं लवणमखिलं निम्बुतोयेन पिष्टं तप्तं
शंखं पुनरपि पुनर्निक्षिपेत्सप्तवारान्। तस्मि-
ञ्छंखो भवति शिथिलो मर्दयेत्तेन सार्द्धं व्योषं
हिंगुस्तदपि च पुनः पादमानेन दद्यात्॥ १॥
चातुर्थांशं विषरसबली योजयित्वाऽत्र कुर्यात्सम्य-
ग्बद्ध्वा भिषगथ गुटी बादरास्थिप्रमाणाम्। शूले

Aho ! Shrutgyanam

मंदाग्न्युपशमयने पंक्तिशूले कुशूले एकैकां
तामुदयसमये योजयेत्पुष्टिवृद्धौ ॥ २ ॥

२-इमलीका खार, पांचों नोंन, नींबूके रसमें घोटे, फिर शंखको तपाकर सात वार बुझाव जब शंख खिलजाय तब उसी नींबूके रसमें घोट लेवे. फिर सोंठ, मिरच, पीपल, हींग शंखसे चौथाई डाले, गन्धक, तेलिया, पारा चतुर्थांश इनकी कजली डाले, फिर बेरकी गुठलीके समान गोली बनावे । यह गोली शूल, मंदाग्नि, पसलीका दरद, कूखके शूलको दूर करे, एक गोली सूर्योदयके समय लेवे तो पुष्टि वृद्धि करे ॥ १-१ ॥

चतुरशीति ( ८४ ) वाते अमरसुन्दरीगुटिका ।

त्रिकटु त्रिफला चैव रेणुका ग्रन्थिकानलम् ।
मृतलोहं चतुर्जातं पारदं गंधकं विषम् ॥ १ ॥
विडंगाकल्लकं मुस्ता सर्वेभ्यो द्विगुणो गुडः ।
चणकप्रमाणगुटिका नाम्ना अमरसुंदरी ॥ २ ॥
अपस्मारे सन्निपाते कासे श्वासे गुदामये ।
अशीतिवातरोगेषु उन्मादेषु विशेषतः ॥ ३ ॥

त्रिकटु, त्रिफला, संभालूके बीज, पीपलामूल, चित्रक, मरा सार, चातुर्जात, पारा, गंधक, विष, विडंग, अकरकरा, मोथा इनकी सममात्रा और इनसे दूना गुड डालकर चनेके प्रमाण गोली बनावे, यह अमरसुन्दरी नाम गोली मिरगी, सन्निपात १३ श्वास, खांसी, गुदरोग, अर्श और ८० प्रकारके वातरोग और उन्मादको विशेषकर दूर करती है ॥ १--३ ॥

विजयादिगुटिका ।

पलत्रयं हरीतक्याश्चित्रकस्य पलत्रयम् ।
एलात्वक्पत्रमुस्तानां भागश्चार्द्धपलःस्मृतः ॥ १ ॥

Aho ! Shrutgyanam

व्योषं च पिप्पलीमूलं विषं कर्षप्रमाणकम् ।
नागकेशरचूर्णं च कर्षं दद्याद्विचक्षणः ॥ २ ॥
रेणुकार्द्धपलं मात्रा तथा गन्धरसौ क्षिपेत् ।
एतान्संभृतसम्भारान्सूक्ष्मचूर्णं तु कारयेत् ॥ ३ ॥
गुडस्य च तुलां दद्यान्मर्दयेत्तद्विचक्षणः ।
एतेन गुटिकाः कार्याः षष्ट्याऽधिकशतत्रयम् ॥ ४ ॥
एकैकं भक्षयेत्प्रातः कृत्वाऽऽहारं यथासुखम् ।
मासेन पलितं हन्ति करोत्यग्निं द्वितीयके ॥ ५ ॥
शुक्रवृद्धिं तृतीये च बलवर्णप्रसाधिनी ।
हन्त्यष्टादश कुष्ठानि सप्त मेहान् महाक्षयान् ॥ ६ ॥
प्लीहानं श्वासकासौ च अण्डवृद्धिमरोचकम् ।
अशीतिवातजान्रोगान्मूत्रकृच्छ्रं गलग्रहम् ॥ ७ ॥
सर्वमूर्च्छां विषं हन्ति सर्वस्थावरजंगमम् ।
योनिदोषमपस्मारमुन्मादं विषमज्वरम् ॥ ८ ॥
बलेन गजतुल्यो वा वेगेन तुरगोपमः ।
मयूरस्तु भवेदग्नौ वाराहश्रोत्रमेव च ॥ ९ ॥
हयतुल्यो भवेत्स्त्रीषु गृध्रदृष्टिर्हि जायते ।
उपयोगात्परं जीवेन्नरो वर्षशतत्रयम् ॥ १० ॥
न चात्र परिहारोऽस्ति न च कामे न मैथुने ।
ग्राम्यधर्मोऽथ वाग्बाणो भोजने च यथेच्छया ॥ ११ ॥
न केवलं विष्णुपितामहाभ्यां मूर्द्धाभिषेकस्त्रिदि-
वेश्वरेण। अयं वरः सर्वरसायनानां योगेन इन्याद्-

Aho ! Shrutgyanam

चिरेण रोगान् ॥ १२ ॥ विजया नाम गुटिका विख्याता रुद्रभाषिता । भक्षयेद्यो नरो वर्षं तस्य सिद्धिर्न संशयः ॥ १३ ॥

हरड ३ पल, चित्रक ३ पल, इलायची ८ टंक, तज ८ टंक, तेजपात ८ टंक, मोथा ८ टंक, सोंठ, मिरच, पीपलामूल, तेलिया ४ टंक, नागकेशर ४ टंक, संभालूके बीज ८ टंक, गन्धक १ पल, पारा १ पल, पारे गन्धककी कजली कर लेवे और सबको महीन पीसकर और सब औषधियोंके बराबर गुड डालकर ३६० गोलियां बनावे, प्रातःकाल एक गोला नित्य खावे. भोजन इच्छा रुचिसे करे तो एक महीनेमें बुढापेको दूर करे, दो महीनेमें अग्निको प्रज्वलित करे, तीन महीनेमें वीर्यको बढावे, बल वर्णको बढावे, कोढ १८, प्रमेह २०, महाक्षय, प्लीहा, श्वास, खांसी, आतें बढनेको, अरुचि, वातजरोग ८० मूत्रकृच्छ्र, गलग्रह, सम्पूर्ण मूर्च्छा तथा स्थावर जंगम विष, योनिदोष, मिरगी, उन्माद, विषमज्वर आदिकोंका नाश करता है और हाथिकासा बल, घोडेकासा वेग, मारकीसी अग्नि, शूकरकासा श्रवण आर स्त्रीसंगमें घोडेके समान बहुत प्रबलता होय, नेत्रोंमें ज्योति गीधके तुल्य हो इस औषधिके समान दूसरी औषधि जगत्के विषे नहीं है, जिससे मनुष्य अपनी पूरी आयुष्य भोगे. इसमें मैथुन करना वर्जित नहीं है और ग्राम्यधम और भोजन यथेष्ट करना। यह ब्रह्मा और विष्णुने बनाया, राज्याभिषेक इन्द्रने करी यह श्रेष्ठ रसायन है. यह सब रोगोंका शीघ्रही नाश करती है, यह विजयानाम गोली प्रसिद्ध महादेवजीने कही है, जो मनुष्य इसे एक वर्ष सेवन करे उसको निस्संदेह सिद्धि प्राप्त होय ॥ १-१३ ॥

Aho ! Shrutgyanam

क्षयरोगमें शिवागुटी।

शिलाजतुपलान्यष्टौ तावती सितशर्करा।
त्वक्क्षीरी पिप्पली धात्री कर्कटाक्षी पलोन्मिता॥ १॥
निर्दग्धफलमूलाभ्यां पलं युज्यात्त्रिगन्धकान्।
मधुत्रिपलसंयुक्ता विधेयाऽक्षसमा गुटी॥ २॥

शिलाजीत ८ पल, मिश्री ८ पल, वंशलोचन, पीपल, आंवला, काकडासिंगी यह एक एक पल लेनी, कटेरी पंचाङ्ग १६ टंक और त्रिफला इनको शहदमें मिलाकर बहेडेके प्रमाण प्रमाण गोली बनावे॥ १॥ २॥

शिवगुटिका।

द्राक्षाभीरुविदारिकाद्वयपृथक्पर्णीस्थिरापुष्करैः
पाठाकौटजकर्कटाक्षकटुकागस्त्याम्बुदालाम्बुजैः।
दन्तीचित्रकचव्यवारणकणावीरादिवर्गौषधीरब्द्रोणे
चरणस्थिते पलमितैरेभिः श्रितैर्भावयेत्॥ १॥
धात्रीमेषाविषाणिकात्रिकटुकैरेभिः पृथक् पंचभि-
र्द्रव्यैश्च द्विपलोन्मितरपि पलं चूर्णं विदारी भवेत्।
तालीस कुडवं चतुःपलमिह प्रक्षिप्यते सर्पिषा
तैलस्य द्विपलं पलाष्टकमसौ क्षौद्रं भिषग्योजयेत्
॥ २॥ तुल्यं पलैः षोडशभिः सितायास्त्व-
क्क्षीरिकापत्रककेशरस्य। बिल्वांशकैस्त्वक्त्रुटि
संप्रयुक्तैरित्यक्षमात्रागुटिकाः प्रकल्प्याः॥ ३॥
तासामेकतमां प्रयुज्य विधिवत्प्रातः पुमान्भोज-
नात्प्राग्वा मुद्गदलाम्बुजांगलरस शीतं शृतं वा

Aho ! Shrutgyanam

जलम् । माक्षीकं मदिरामगुर्वशनभुक्पीत्वा पयो
वा गवां प्राप्नोत्यंगमनंगवास्तुभवनं सम्पन्नमानंद-
कृत् ॥४॥ शोफं ग्रंथ्यवमंथवेपथुवमीं पांड्वामया
ञ्च्रलीपदं प्लीहार्शःप्रदर प्रमेहपिटिका मेहोऽश्मरी
शर्करा । हृद्रोगार्बुदवृद्धिविद्रधियकृद्योन्याजरी-
न्सानिलानूरुस्तंभभगन्दरं ज्वररुजस्तूनीप्रतूनी
तृषा ॥ ५ ॥ वातासृक्प्रबलं प्रवृद्धमुदरं कुष्ठं
किलासक्रिमीन्कासश्वासज्वरस्वरक्षयमसृक्पित्तं
सपानात्ययम् । उन्मादं मदमप्यपस्मृतिमतिस्थौ-
ल्यं कृशत्वं तनोरालस्यं च हलीमकं प्रशमये-
न्मूत्रस्य कृच्छ्राणि च ॥ ६ ॥ झटिति च युवा
सर्वैः श्वेतैरकाल जराकृतैः कृतमलिकुलाकारैरेभिः
शिरश्च शिरोरुहैः । बलिमदबलिव्यस्तातङ्कं
वपुश्च समुद्वहन्प्रभवति शतं स्त्रीणां गन्तुं
प्रभुर्जनवल्लभः ॥ ७ ॥ स्तिमितमतिरविज्ञानान्धः
सदस्यपटुः पुमान् सकृदपि यथा ज्ञानोपेतः
श्रुतिस्मृतिमान्भवेत् । व्रजति च यथा युक्तो योगी
शिवस्य समीपतां शिवगुटिकया कृत्स्नामेकां
करोति हि मानवः ॥ ८ ॥

दाख, शतावर, विदारीकंद, पृष्ठपर्णी, शालपर्णी, कटेरी, पुहकर-
मूल, पाढ, कुडाकी छाल, काकडासिंगी, बहेडा, कुटकी, रास्ना,
मोथा, कडवी, तूंबी, दांतौनी, चीता, चव्य, गजपीपल, अष्ट-

Aho ! Shrutgyanam

वर्ग ( महामेदा १ मेदा २, जीवक ३, ऋषभ ४, सिद्ध ५, ऋद्ध ६, कंकोली ७, क्षीरकाकोली ८, ) और ये न मिलें तो वरी, विदारी, असगंध लेवे, ये सब औषधि चार चार टंक लेवे और आंवला १६ टंक, मेढासिंगी १६ टंक, सोंठ, मिरच, पीपल, दो दो पल, विदारीकंद १६ टंक, तालीसपत्र ६४ टंक, घृत, तेल ३२ टंक, शहद १६ पल, मिश्री १५६ टंक, वंशलोचन, तेजपात, नागकेशर, बेलगिरी, तज, इलायची संयुक्त एक टंकके प्रमाण गोलियां बनावे प्रातःकाल सदा विधिसे सेवन करे, भोजन पहिले लेवे, मूंगका पानी, मांसरस, ठंढा पानी अथवा गरम पानी, शहद मदिरासे इसके ऊपर गरिष्ठ भोजन पहिले लेवे और गौके दूधके साथ लेवे तो रूप बढे और सदा आनंदकारी है और सूजन, गांठ, कंपवायु, पांडुरोग, वमन, कृमि, श्लीपद, प्लीहा, अर्श, प्रमेह, पथरी, शर्करा प्रमेह, हृदयरोग, अर्बुद, वृद्धि, यकृत्, योनिदोष, वायुरोग, ऊरुस्तंभ, भगंदर, खांसी, श्वास, ज्वर, स्वरभंग, क्षयी, रक्तपित्त, मूत्रकृच्छ्र, तूनी, प्रतूनी, प्यास, वातरक्त, पेट बढनेके रोग, कोढ, कृमि, पानात्ययरोग, और समस्त देहके रोग, उन्माद, अतिशूल, अतिदुर्बलता, आलस्य. हलीमक, सर्व मूत्रकृच्छ्र बुढापेसे जो बाल सफेद, होजायँ इन रोगोंको दूर करे मस्त हाथीके समान बल होवे। बलयुक्त मस्तशरीर होजाय और १०० स्त्रियोंसे भोग करनेका सामर्थ्य होवे, लोकमें प्यारा होवे, अज्ञानको दूर करे और महापंडित पुरुष सदा ज्ञानवान् स्मृति भूले नहीं। जो मनुष्य इस औषधिका सेवन करेंगे वह महादेवके समान योगीन्द्र होजावेंगे। यह शिवनाम गोली महादेवजीने कही है ॥ १-८ ॥

ज्वरघ्नी गुटी।

**रसं विषं टंकणगंधकं च सत्र्यूषणं भृङ्गरसेन**

Aho ! Shrutgyanam

भाव्यम् । गुटी प्रदेया समशर्करांशैः सद्योज्वरं नाशयति क्षणेन ॥ १ ॥

पारा, मीठा तेलिया, सुहागा, गंधक, सोंठ, मिरच, पीपल इनकी सममात्रा ले, चूर्ण कर भांगके रसमें गोली बनावे और मिश्रीके साथ खावे तो ज्वर दूर होवे ॥ १ ॥

विरेचननाम गुटिका ।

अष्टौ विषतुषदंतिबीजकलिकाभागत्रयं नागराद् द्वौगन्धान्मरिचानि टंकणरसा एकैकभागाःक्रमात् । गुंजामानवटी विरेचनकरी देया सुशीतांबुना गुल्मप्लीहमहोदरार्तिशमनी नाराचनामा रसः ॥ १ ॥

जमालगोटेका छिलका दूर कर दूधमें पकावे फिर जीभ, रहित कर ८ टंक, सोंठ ३ टंक, शुद्ध गंधक २ टंक, मिरच, सुहागा फूला एक टंक, पारा १ टंक क्रमसे लेकर चिरमिटीके प्रमाण गोली बनावे और ठंढे पानीके साथ लेवे तो प्लीहा और सब उदररोगोंको शांति करे । यह नाराच नामक रस है ॥ १ ॥

विश्वौषधं टंकणगन्धकं च सपारदं चेति समांशयुक्तम् । नृपालचूर्णं त्रिगुणं च दद्याद्गुडेन बद्धा गुटिका प्रसिद्धा ॥ २ ॥ विरेचनी मूत्रविकारनाशिनी लघ्वी हिता दीपनपाचनी च । संशोधनी शीतजलेन सत्यं संस्तम्भनी चोष्णजलेन सत्यम् ॥ ३ ॥

सोंठ, सुहागा फूला, पारा, शुद्ध गंधक यह सममात्रा, जमालगोटा तिगुना इनकी गुडके साथ गुटिका बनावे. यह विरेचनकारी, मुत्रविकारको दूर करे, लघुकारी, हितकारी, अग्निदीपन, पाचन,

Aho ! Shrutgyanam

कोठेको शुद्ध करे और ठंढे जलसे विरेचन होवे, गरम जलसे विरेचन बंद होते हैं. विरेचन नाम दस्तोंका है ॥ २ ॥ ३ ॥

टंकणमयूरतुत्थं स्नुहीक्षीर अजैपालमेरण्डम् ।
नाभिप्रलेपदत्तं नरपतियोग्यं विरेचनं कुरुते ॥४॥
मध्यमस्त्रिवृतस्तिक्ता राजवृक्षो विरेचनम् ।
क्रूरास्नुकपयसाहेमक्षीरदंतीफलादिभिः ॥ ५ ॥
एरंडतैलं दुग्धं गोस्तथा तुंबी हरीतकी। वज्री
क्षीरगुटी चाथ पिप्पली तेन भाविता ॥ ६ ॥
महिषावल्खिा चैव कंपिल्लं तक्रमेव च। उष्ट्रीदुग्धं
तथा पेयं घोडाचोली गुटी तथा ॥ ७ ॥

सुहागा, नीलाथोथा, सेहुंडका दूध, शुद्ध जमालगोटा, अरंडीके बीज इनको पीसकर नाभीपर लेप करे, यह राज योग्य विरेचन है. एलुआ, निसोथ, कुटकी, अमलतास यह मध्यम जुलाब है। आकका दूध, थूहरका दूध, शुद्ध जमालगोटा यह क्रूर जुलाब है। अरंडीके तेल वा गायके दूधमें गोली बनावे अथवा पीपलोंको थूहरके दूधमें भावना देवे, साँठी चांवलोंमें कवीला मट्ठा सङ्ग पीवे अथवा ऊंटनीके दूधमें घोडाचोलीरस सेवन करे ॥ ४-७ ॥

विषूचिकाहरगुटिका ।

पलत्रिकं व्योषकरञ्जबीजं रसं तथा दाडिममातुलुङ्गयोः। निशायुगं पिष्य कृता च वर्तिस्तदञ्जनं हन्ति विषूचिकां च ॥ १ ॥

त्रिफला, सोंठ, मिरच, पीपल, करंजुएके बीज, हलदी, दारुहलदी, पीसकर बिजौरेके रसमें अथवा अनारके रसमें

Aho ! Shrutgyanam

चनेके बराबर गोलियां बनावे फिर उस गोलीसे अञ्जन करे तो विषूचिकारोग तथा मूर्च्छा जाय ॥ १ ॥

विषूचिकामें अञ्जनगुटिका ।

व्योषं करंजस्य फलं हरिद्रे मूलं समावाप्य च मातुलुङ्गा। छायाविशुष्का गुटिका विधेया हन्याद्विषूचीं नयनांजयेन ॥ १ ॥

सोंठ, मिरच, पीपल, करंजबीज, हलदी पीसकर बिजौरेके रसमें गोली बनावे और छायामें सुखाकर अञ्जन करे तो विषूचिकारोग नाश होवे ॥ १ ॥

मातुलुङ्गजटा व्योषनिशाबीजं करञ्जकम् ।
काञ्जिकेनाञ्जनं हन्याद्विषूचीमतिदारुणाम् ॥ २ ॥

बिजौरेकी जड, सोंठ, मिरच, पीपल, हलदी, कंजाके बीज इनकी कांजीके पानीमें गोली बनावे और अञ्जन करे तो दारुण विषूचिका दूर होवे ॥ २ ॥

प्रचेतागुटिका ।

त्र्यूषणं त्रिफला हिङ्गु सैन्धवं कटुका वचा ।
नक्तमालस्य बीजानि तथा गौराश्च सर्षपाः ॥ १ ॥
मेषमूत्रेण पिष्टानि च्छायाशुष्कं विधापयेत ।
भूतोन्मादेष्वचैतन्येऽञ्जनमैकाहिकादिषु ॥ २ ॥

सोंठ, मिरच, पीपल, त्रिफला, हींग, सैंधानोन, कुटकी, बच, कंजाकी मिंगी, सफेद सरसों इनकी मेंढेके मूत्रमें गोली बनावे और छायामें सुखावे और नेत्रमें, आंजे तो यह अञ्जन भूतादिकोंको तथा ऐकाहिक ज्वरादि अचेतनता और उन्मादको दूर करे ॥ १-२ ॥

Aho ! Shrutgyanam

**राजिकां मरिचं कृष्णां सैन्धवं भूतनाशनम्।**
**नरमूत्रेण संपिष्य अञ्जनं ज्वरनाशनम्॥ ३॥**

राई, मिरच, पीपल, सैंधानोन इनकी मनुष्यके मूत्रमें गोली बनावे और अंजन करे तो भूतादिकोंको दूर करे॥ ३॥

सर्षपादिगुटिका।

**सिद्धार्थको वचा हिङ्गुकरञ्जो देवदारु च। मञ्जिष्ठा त्रिफला श्वेता कटुकीत्वक्कटुत्रिकम्॥ १॥ समांशानि प्रियंगुश्च शिरीषो रजनीद्वयम्। बस्तमूत्रेण पिष्टोऽयमङ्के देयस्तथाऽञ्जनम्॥ २॥ नस्यमालेपनं चैव स्नानमुद्वर्त्तनं तथा। अपस्मारे विषोन्मादे कृत्यालक्ष्मीज्वरापहम्॥ ३॥ भूतेभ्यश्च भयं नास्ति राजद्वारे च शस्यते॥ ४॥**

सरसों, वच, हींग, कंजाके बीज, देवदारु, मंजीठ, त्रिफला, मालकांगनी, तज, सोंठ. मिरच, पीपल, समभाग प्रियंगु, सिरसके बीज, दोनों हलदी इनकी बकरेके मूत्रमें गोली बनावे और मर्दन करे तो सब रोग दूर होवें, अञ्जन करै तथा नस्य लेय, लेपन करे, उबटना करे तो मृगी, विष, उन्मादज्वरादि तथा भूतादिकोंको दूर करे। यह राजाके योग्य है॥ १-४॥

चिन्तामणिरसगुटिका।

**द्वौ जाजी कणविश्वपञ्चलवणा मारीचगन्धाभ्रकं क्षारंत्रीणि रसेन्द्रमर्द्धममृतं तत्सर्वमेकीकृतम्।**
**क्षिप्त्वा चार्द्रकनागवल्लिसहितं पञ्चैव गुंजान्वितं सामे सज्वरसन्निपातकमहामेहाद्युदावर्त्तके॥ १॥**

Aho ! Shrutgyanam

दोनों जीरे, पीपल, सोंठ, पाँचों नोन, मिरच, शुद्ध गन्धक, अभ्रक, सुहागा, सज्जी, जवाखार, पारा, आधी मात्रा तेलिया मीठा यह सब बराबर एकत्र कर अदरखके रसकी पांच भावना तथा पानक रसकी पांच भावना देवे, फिर गोल मिरचके बराबर गोली बना खावे तो आमविकार, ज्वरसहित सन्निपात, असाध्य प्रमेह और उदावर्त्तादि रोग दूर होयँ ॥ १ ॥

वडवानलरसगुटिका ।

सूतं भुजङ्गममृतं लवणं हरिद्रा व्योषं घनं जयजटावनि १ भू १ धरित्री। अष्टादश १८त्रि ३ नव ९ वह्नि ३ मितश्च भागः प्रोक्तो रसो रसगुणैर्वडवानलोयऽम् ॥ १ ॥ निम्बुकार्द्रककरीरपयोभिः शिग्रुकेसरिभुजङ्गलताभिः। साध्यमग्निसदनानिलशूलाध्मानहानि वडवानलचूर्णम् ॥ २ ॥

पारा १ टंक, शीशा १ टंक, गन्धक १ टंक, शीशा पारेको मिला एक करले, सैंधानोन १८, हलदी ३, सोंठ, मिरच, पीपल ९, चीता ३ भाग इन सबको नीम्बूके रसकी, अदरखके रसकी, करीरके रसकी, दूधकी, सैंजनेके रसकी, और नागकेशरकी सात सात भावना देवे, फिर गोली बनावे और खावे तो जड बुद्धिको, मन्दाग्निको, वायुशूलको, अफरेको दूर करे ॥ १ ॥ २ ॥

पंचाननरसगुटिका १-३ ।

सूतं गन्धकचित्रकं त्रिकटुकं मुस्तं विडङ्गं विषमेतेषां समतुल्यमार्कवरसं गुञ्जाप्रमाणा वटी । कुष्ठाष्टादशगुल्मरोगमुदरप्लीहप्रमेहादयो रोगनेकसुभूरिदर्पदलने ख्यातश्च पञ्चाननः ॥ १ ॥


Aho ! Shrutgyanam

१—पारा, गंधक, चीता, सोंठ, मिरच, पीपल, मोथा, वायविडंग, तेलिया मीठा इन सबकी समान मात्रा लेवे भांगरेके रसमें गोली बनावे, गुञ्जाप्रमाण लेवे तो यह १८ प्रकारके कुष्ठ, गुल्म, उदररोग, प्लीहा और प्रमेहादि रोगोंको नाश करे ॥ १ ॥

शंभोः कण्ठनिवासनं च मरिचं गन्धं रसेन्द्रो रविः पक्षौ सागरलोचने शशिमुखं भागोऽर्कसंख्याकृतः । खल्वे तत्खलु मर्दितं रविजलैर्गुंजार्द्धमात्रं ददेत् सिद्धोऽयं ज्वरहस्तिदर्प्पदलने पञ्चाननोऽयं रसः ॥ २ ॥ पथ्यं च देयं दधिभक्तयुक्तं सिन्धूत्थयुक्तं सितया समेतम् । गन्धानुलेपं हिमतोयपानं दुग्धं च पेयं शुभदाडिमं च ॥ ३ ॥

२ तेलिया मीठा २ टंक, मिरची ४ टंक, गंधक २ टंक, पारा १ टंक आकका दूध १२ टंकमें खरल करे और आधी रत्ती प्रमाण गोलियां बनावे । यह गोली हस्तीरूप ज्वरको सिंहरूप है. पथ्य—दही, चावल खावे और सैंधानोन, मिश्रीसहित लेवे, सुगंधि द्रव्य अपने शरीरमें लगावे, ठंढा जलपान, दुग्धपान अनार खावे ॥ २ ॥ ३ ॥

सूतं गन्धकचित्रकं त्रिकटुकं मुस्ता विषं त्रैफलमेतैस्तुल्यकृतैर्गुडं द्विगुणितं गुञ्जप्रमाणा वटी । कुष्ठं गुल्ममतिस्रुतिक्रिमिरुजं शूलप्रमेहापहं वातानेककरीन्द्रदर्पदलने ख्यातश्च पञ्चाननः ॥ ४ ॥

३—पारा, गंधक, चीता, सोंठ, मिरच, पीपल, मोथा, तेलिया मीठा यह सब बराबर लेवे और गुड इससे दूना ले गोली गुंजा प्रमाण बनावे. कुष्ठ, गुल्म, अतीसार, कृमि, शूल, प्रमेह, वातादि

Aho ! Shrutgyanam

अनेक मदमस्त हस्ती समान रोगोंको यह पञ्चानन रस नाश करता है ॥ ४ ॥

ज्वरांकुशरसगुटिका ।

शुद्धं सूतं विषं गन्धं धूर्त्तबीजं त्रिभिः समम् ।
चतुर्णां द्विगुणं व्योषं चूर्णं गुंजाद्वयं मतम् ॥ १ ॥
जंबीरकस्य मज्जाया आर्द्रकस्य द्रवैर्युतम् ।
महाज्वरांकुशो नाम ह्यष्टज्वरनिवारकः ॥ २ ॥
ऐकाहिकं द्व्याहिकं च तार्तीयं च चतुर्थकम् ।
विषमं च त्रिदोषोत्थं हन्त्यवश्यं न सशयः ॥ ३ ॥

पारा शुद्ध, तेलिया मीठा, गंधक, धतूरेके बीज यह तीनों बराबर इनसे दूनी सोंठ, मिरच, पीपल लेय, जंभीरी अथवा अदरखके रसमें गोली दो गुञ्जाप्रमाण बनावे, यह महाज्वरांकुश नाम रसगुटिका है, अष्टज्वरोंको तथा ऐकाहिक, द्व्याहिक. तृतीयक, चतुर्थक, विषमज्वर, त्रिदोष इनको नाश करे ॥ १-३ ॥

घोडाचोली ।

विष रस गंधक अरु हरताल, त्रिकटु त्रिफला टंकणखार । अजयपाल भांगरा रस गोली, चौंसठ रोगगमावे घोडाचोली ॥ १ ॥ खण्डेन सह गृह्णी-यात्गुटिकानां चतुष्टयम् । उष्णं जलं चानु पेयं वारान्सप्त च पञ्च वा ॥२॥ सूक्ष्मं विरेचनं कुर्या-ज्जीर्णज्वरविनाशिनी । अजीर्णशूलग्रहणीगुल्म-वातामवातजित् ॥ ३ ॥

Aho ! Shrutgyanam

पारा, गन्धक ले पारे गंधककी कजली करे, तेलिया मीठा, शुद्ध हरताल, सोंठ, मिरच, पीपल, त्रिफला सुहागा इनको चूनेके पानीकी तीन पुट देवे फिर भांगरेके रसमें गोली बनावे, यह गोली चौंसठ रोगोंको दूर करे और खांडके साथ चार गोली लेवे, ऊपरसे गरम पानी पीवे तो सात बार या पांच वार विरेचन करे, जीर्णज्वर, अजीर्ण, संग्रहणी, गुल्म और आमवातको दूर करे ॥ १-३ ॥

प्रभावती गुटिका ।

द्वे हरिद्रे निंबपत्रपिप्पलीमरिचानि च । भद्रमुस्ता विडंगं च सप्तमं विश्वभेषजम् ॥ १ ॥ सैंधवं चित्रकं चैव बावची पित्तपर्पटम् । पाठाऽभया वचा कुष्ठमजामूत्रेण पेषयेत् ॥ २ ॥ साष्टशतं वाऽभिमंत्र्य जातीपुष्पाणि प्रक्षिपेत् । दीपोत्सव-दिने रात्रौ गुटीं कृत्वाभिमंत्रयेत् ॥ ३ ॥ सर्वेषु बालरोगेषु ज्वरएेकाहिकादिके । भूतप्रेतादिदोषेषु वश्ये नेत्रामयेषु च ॥ ४ ॥ अंजनं भक्षणं पुंड्रं यथायोगं प्रयोजयेत् । प्रभावती नाम गुटी सर्व-कार्यप्रसाधिनी ॥ ५ ॥

दोनों हलदी, नीमके पत्ते, पीपल, मिरच, नागरमोथा, वायविडंग, सोंठ, सैंधानोन, चीता, बावची, पित्तपापडा, पाठा, हरड, वच कूठ, उनको बकरीके मूत्रमें १०८ चमेलीके फूल डाल यह मंत्र पढे- " ॐ नमः पार्श्वनाथाय महासत्त्वाय ॐ अहिमहि चर २ चांडालिनि स्वाहा । " और दिवालीकी रातको गोली बनावे । यह गोली समस्त बालरोग, ऐकाहिकादि ज्वर और भूत, प्रेतादिक रोगोंको नाश

Aho ! Shrutgyanam

करे और अंजन करे तो नेत्ररोग नाश होवें, तोलके यथायोग्य भक्षण करे तो यह गोली समस्तकार्योंको सिद्ध करे ॥ १–५ ॥

अतीसारे अरलूगुटिका ।

अरलू बिल्वजम्ब्वाम्रं कपित्थं च रसाञ्जनम् ।
लाक्षा हरिद्रा ह्रीबेरं स्योनाकं कट्फलं तथा ॥ १॥
लोध्रं मोचरसं शृंगी धातकी च वटांकुरान् ।
पिष्ट्वा तण्डुलतोयेन गुटिकां चाक्षसंमिताम् ॥२॥
छायाशुष्कां पिबेत्क्षिप्रं ज्वरातीसारशान्तये ।
रक्तपित्तप्रशमनी ग्रहणीशूलनाशिनी ॥ ३ ॥

अरलूकी छाल, बेलगिरी, जामुनकी छाल, आमकी छाल, कैथ, रसोत, लाख, हलदी, हाऊबेर, नेत्रवाला, कायफल, लोध, मोचरस, सोंठ, धायके फूल, वटके अंकूर इन सबको चावलके पानीमें खरल कर बहेडेके समान गोली बनावे और छायामें सुखाकर सांठी चांवलोंके पानीके संग प्रभात समय खावे तो ज्वर, अतीसार, रक्तपित्त, संग्रहणी और शूलको दूर करै ॥ १–३ ॥

ग्रहणीकपाटगुटिका ।

चातुर्जातकचव्यजीरकयुगं व्योषारलू ग्रंथिकं
श्रीवृक्षातिविषाऽजमोदयुगलंचूतास्थिपाठांबुदम् ।
यष्टी चेन्द्रयवाम्लकास्थिकवचा लोध्रं समङ्गारजः
कुर्यान्मोचरसान्वितं समजयेद्वासावनोतद्गुणान्
॥ १ ॥ आबद्धा ग्रहणीकपाटवटिका अक्षप्रमाणा
भजेत्साध्मानग्रहणीविकाररुधिरातीसारविच्छित्तये २।

Aho ! Shrutgyanam

तज, तेजपात, इलायची, नागकेशर, चव्य दोनों जीरे, सोंठ, मिरच, पीपल, अरलूकी छाल, पीपलामूल, बेलगिरी, अतीस, अजमोद, अजमायन, आमकी गुठली, पाठा, मोथा, मुलहठी, इंद्रजव, इमलीके बीज, बच, लोध, मंजीठ इनका चूर्ण कर मोचरस समान मात्रा लेवे, इतनाही गुड डालकर बहेडेके समान गोलियाँ बनावे। यह संग्रहणी, रक्त अतीसारका नाश करे ॥ १ ॥ २ ॥

### एलादिगुटिका ।

एलात्वक्पत्रकं द्राक्षा पिप्पल्यर्द्धपलं तथा ।
सित्तामधुकखर्जूरमृद्वीकाश्च पलोन्मिताः ॥ १ ॥
संचूर्ण्य मधुना कुर्याद्गुटिकां चाक्षसंमिताम् ।
कासं श्वासं ज्वरं हिक्कां छर्दिं मूर्च्छां मतिभ्रमम्
॥ २ ॥ रक्तष्ठीवं पार्श्वशूलं स्वरभेदं क्षतक्षयम् ।
गुटिका तर्पणी वृष्या रक्तपित्तं च नाशयेत् ॥३॥

इलायची ४ टंक, तज ४ टंक, तेजपात ४ टंक, दाख ४ टंक, पीपल ८ टंक, मिश्री, मुलहठी, छुहारे, मुनक्का १६ टंक इनको शहदमें बहेडेके समान गोलियां बनावे। यह गोली खांसी, श्वास, ज्वर, हिचकी, छर्दि, मूर्च्छा, चित्तभ्रम, मुखका रक्तदोष, पसलीका दरद, स्वरभेद, क्षतक्षय, रुधिरविकार और पित्तादिकोंको दूर करे ॥ १-३ ॥

### तालीसादिगुटिका ।

चव्याम्लवेतसकटुत्रिकतिन्तडीकं तालीसजीरक-
तुगादहनैः समांशैः । चूर्णं गुडप्रमृदितं त्रिसुगं-
धयुक्तं वैस्वर्यपीनसकफारुचिषु प्रशस्तम् ॥ १ ॥

Aho ! Shrutgyanam

चव्य, अमलवेत, सोंठ, मिरच, पीपल, तंतडीक, तालीसपत्र. जीरा, वंशलोचन, इलायची, तज, पत्रज, चीता इनको बराबर लेवे और गुडके संग गोली बनावे यह गोली पीनस, कफ, अरुचि इनको दूर करती है ॥ १ ॥

कामदेवगुटिका ।

पलं गोक्षुरबीजानि द्विपलं कपिकच्छुजम् ।
पलं नागदला मूलं पलमेकं शतावरी ॥ १ ॥
विदारीकन्दचूर्णं तु पलद्वयमथाऽबला ।
द्विपलं त्रपुसीबीजं वाजिगंधा पलत्रयम् ॥ २ ॥
त्रिसुगंधकणा धात्री लवंगं नागकेशरम् ।
वंशी मांसी तालमूली गुडूची रक्तचन्दनम् ॥ ३ ॥
एतानि कर्षमात्राणि सूक्ष्मचूर्णानि कारयेत् ।
बालशाल्मलिकाद्रावैर्भावयेच्चैकविंशतिः ॥ ४ ॥
कुशकाशद्रवैरेवं शर्करासमयोजितम् ।
नष्टशुक्ररुजं हन्ति मूत्रकृच्छ्राणि यानि च ॥ ५ ॥
शतंगच्छेत्तु नारीणां हयतुल्यसमो बले ।
कामदेवमिदं नाम धन्वन्तरिविनिर्मितम् ॥ ६ ॥

गोखरूके बीज १ पल, कौंचके बीज २ पल, गंगेरनकी छाल १ पल, शतावर १ पल, विदारीकन्दका चूर्ण २ पल, खरेटीकी जड २ पल, ककडीके बीज डेढ पल, असगंध डेढ पल, तज, पत्रज, छोटी इलायची, पीपल, आंवले, लौंग, नागकेशर, वंशलोचन, छड, काली मूसली, गिलोय, लाल चन्दन इन सब औषधियोंको एक एक कर्ष लेकर चूर्ण करे, इसमें कोमल सेमलके पत्तोंके रसकी इक्कीस भावना

Aho ! Shrutgyanam

तथा डाभ कांसके रसकी भी इक्कीस भावना देकर बराबर खांड मिलाकर अनुमान मुवाफिक खाय तो नष्ट शुक्रके रोगको तथा मूत्र कृच्छ्रको नाश करे और सौ स्त्रियोंसे भोग करै, घोडेके समान पराक्रम होवे । यह कामदेवगुटी श्रीधन्वन्तरि भगवान्‌ने बनायी है ॥ १–६ ॥

लघुकामेश्वरगुटिका ।

शतावरी गोक्षुरश्च कपिकच्छु उटंगणम् ।
गंगेरी कबिला मुस्ता मुशली खुरसाणकम् ॥ १ ॥
समुद्रशोषोहिपरा चविका शाल्मली सटी ।
मकुष्ठस्य जटामांसी वाजिगन्धा च रेणुका ॥ २ ॥
विदारी ग्रंथिकं गुंदं विडंगं जीरकं सणम् ।
मांसी सिताह्वा धान्याकं विजया तुर्यभागिका ॥ ३ ॥
जातिपत्रं जातिफलं चातुर्जातकटुत्रिकम् ।
कर्पूरं गगनं लोहं रससिंदूरकासिका ॥ ४ ॥
गुटिका द्विगुणखंडेन वृद्धकोलप्रमाणतः ।
वीर्यवृद्धिं बलं पुष्टिं कामदीप्तिं करोत्यलम् ॥ ५ ॥

शतावर, गोखरू, कौंचके बीज, उटंगन, गंगेरन, खरेटी, बाला, मोथा, मूसली, खुरासानी अजमायन, समुद्रशोष, समुद्रफेन, चव्य, सेमलका मूसला, मेदा, कचूर, जटामांसी, असगंध, संभालूके बीज जावित्री जायफल, तज, तेजपात, इलायची, सोंठ, मिरच, पीपल, कपूर, अभ्रक, सार, रससिंदूर, मिश्री, विदारीकंद, पीपलामूल, मस्तंगी, वायविडंग, जीरा, सनके बीज, छड, सौंफ, धनियां इनसे चौथाई भांग और दूनी खांड डालकर बडे बेरके समान गुटिका बना खावे तो वीर्यवृद्धि, बल, पुष्टि, कामदीपन पूर्ण करे ॥ १–५ ॥

Aho ! Shrutgyanam

स्तम्भनगुटिका।

कंकोलं कुंकुमं फेनं मस्तंगी जातिपत्रिका।
जातीफलं च कर्पूरं करहाटमुटीङ्गणम् ॥ १ ॥
जलादिभिर्विनैवैतां गुटिकां वर्द्धयेद्बली।
दिनान्ते भक्षयेच्चैकां रेतस्तंभकरी मता ॥ २ ॥

कंकोल, केशर, अफीम, मस्तंगी, जावित्री, जायफल, कपूर, अकरकरा, उटंगन इनकी विना पानीसे गोली बनावे. संध्याको एक गोली लेवे तो स्तंभन करे, और वीर्यको पुष्ट करे ॥ १ ॥ २ ॥

नेत्राम्बुजवटी।

शंखनाभिकणातुत्थं बोलखर्परसंयुतम्।
निंबूकरसतोयेन ह्यंजनं नयनामृतम् ॥ १ ॥

शंखकी नाभि, पीपल, नीलाथोथा शुद्ध, बीजाबोल, शुद्ध खपरिया इनको नींबूके रसमें खरल कर अञ्जन करे, यह अञ्जन नयनामृत नामसे प्रसिद्ध है ॥ १ ॥

चन्द्रप्रभावर्त्तिः।

अशीतितिलपुष्पाणि षष्ठिभागाधिका कणा।
पञ्चाशज्जातिकलिका मरिचानथ षोडश ॥ १ ॥
भृङ्गराजरसेनेदं कांस्यपात्रेण मर्दयेत्।
एषा चन्द्रप्रभा वर्तिश्चक्षूरोगविनाशिनी ॥ २ ॥
तोयेन तिमिरं हन्ति मधुना हन्ति पुष्पकम्।
अजामूत्रेणरात्र्यन्धं गोमूत्रेण च चिर्पटम् ॥ ३ ॥

तिलके फूल ८०, पीपलके दाने ६०, जाईकी कली ५०, मिरच १६ इनको भांगरेके रसमें कांसेके पात्रमें खरल करे, यह चन्द्रप्रभा

Aho ! Shrutgyanam

वर्ती है. सो सम्पूर्ण नेत्ररोगोंको नाश करे, इसको पानीसे आंजे तो तिमिर जाय. शहदसे आंजे तो फूला जाय, बकरीके मूत्रसे आंजे तो रतौंधी जाय, गोमूत्रसे आंजे तो आंखोंका चिमचिमाहट जावे ॥ १-३ ॥

नेत्रस्रावगुटिका ।

धात्र्यक्षपथ्याबीजानि एकद्वित्रिगुणानि तु ।
पिष्ट्वा वर्तिं जलैः कुर्यादंजनं त्विह रेणुकम् ।
नेत्रस्रावं हरत्याशु वातरक्तकजं तथा ॥ १ ॥

त्रिफलेकी मिंगी क्रमसे १, २, ३ भाग इनको पीसकर पानीमें गोली बनावे. फिर अञ्जन करै तो आंखोंके पानी, वायु और रुधिर-पीडाको दूर करे ॥ १ ॥

रात्र्यन्धताया गुटिका ।

रसांजनं हरिद्रे द्वे मालती निम्बपल्लवाः ।
गोशकृद्रससंयुक्ता वर्तिर्नक्तांध्यनाशिनी ॥ १ ॥

रसोत, सुरमा, दोनों हलदी, मालतीके पत्ते, नीमके पत्ते इनकी गोबरके रसमें गोली बनावे और आंखमें आंजे तो रतौंधका नाश होवे ॥ १ ॥

सप्तामृतगुटी ।

त्रिफलालोहचूर्णं च माक्षिकं मधुयष्टिका ।
सायमाज्यान्वितं मार्षं सद्यस्तिमिरनाशनम् ॥ १ ॥

त्रिफला, सार, शहद और मुलहठीको सायंकालमें घीके संग खाय तो शीघ्रही तिमिररोगका नाश करे ॥ १ ॥

अतिनिद्रायां गुटिका ।

क्षौद्राश्वलालासंघृष्टैर्मरिचैर्नेत्रमञ्जयेत् ।
अतिनिद्रा शमं याति तमः सूर्योदये यथा ॥ १ ॥

Aho ! Shrutgyanam

शहद और घोडेकी लारमें मिरच घिसकर लगावे तो अतिनिद्रा दूर होय, जैसे सूर्यके उदय होनेसे अन्धकार दूर होजाता है ॥ १ ॥

शिरीषबीजगोमूत्रकृष्णामरिचसैंधवम् ।
त्रिफला मधुकं कुष्ठं द्वे निशे कटुरोहिणी ।
विडङ्गं पिप्पली मुस्ता विशालाकट्फलं वचा॥ १॥
मेदे द्वे चैव काकोल्यौ सारिवे द्वे प्रियंगुका ।
शतपुष्पा हिंगु रास्ना चंदनं रक्तचंदनम् ॥ २ ॥
जातीपुष्पं तुगाक्षीरी कमलं शर्करा तथा ।
अजमोदा च दंती च कल्कैरेतैश्च कार्षिकैः ॥ ३ ॥
जीवद्वत्सैकवर्णाया घृतप्रस्थं च गोः क्षिपेत् ।
शतावरीरसं चापि घृताद्देयं चतुर्गुणम् ॥ ४ ॥
चतुर्गुणेन पयसा पचेदारण्यगोमयैः
सुतिथौ पुष्यनक्षत्रे मृद्भाण्डे ताम्रजेऽथवा ॥ ५ ॥
ततः पिबेच्छुभदिने नारी वा पुरुषोऽथवा ।
एतत्सर्पिर्नरः पीत्वा स्त्रीषु नित्यं वृषायते ॥ ६ ॥
पुत्रानुत्पादयेद्वीरान्वन्ध्याऽपि लभते सुतान् ।
अल्पायुषं या जनयेद्या च सूत्वा पुनः स्थिता ॥ ७ ॥
पुत्रं प्राप्नोति सा नारी बुद्धिमन्तं शतायुषम् ।
या च वंध्या भवेन्नारी या च कन्याः प्रसूयते ॥ ८ ॥
या चैवास्थिरगर्भा स्याद्या वा जनयते मृतम् ।
तादृशी जनयेत्पुत्रं वेदवेदांगपारगम् ॥ ९ ॥

Aho ! Shrutgyanam

रूपलावण्यसंपन्नं शतायुर्विगतज्वरम् ।
जीवद्वत्सैकवर्णाया घृतमत्र प्रशस्यते ॥ १० ॥
एतत्फलघृतं नाम भारद्वाजेन भाषितम् ।
अनुक्तं लक्ष्मणामूलं क्षिपत्यत्र चिकित्सकः ॥ ११ ॥

त्रिफला, मुलहठी, कूठ, दोनों हलदी, कुटकी, वायविडंग, पीपल, नागरमोथा, इंद्रायण, कायफल, वच, काकोली, क्षीरकाकोली, दोनों सारिवा, प्रियंगु, सौंफ, हींग, रास्ना, चंदन, रक्तचंदन जावित्री, वंशलोचन, कमलगट्टा, मिश्री, अजमोद, जमालगोटेकी जड इन सब औषधियोंको चार चार टंक लेकर काढा करे और बछडेवाली एकरंगी गायका २५६ टंक घी शतावरी ४ प्रस्थ, चौगुने घीमें औटावे फिर चौगुने दूधमें अरने उपलोंकी आग देकर अच्छी तिथि और शुभ नक्षत्रमें मिट्टी वा तांबेके पात्रमें औटावे, फिर अच्छा दिन देखकर स्त्री अथवा पुरुष पीवे, जो पुरुष सेवन करे तो स्त्रीको सदा सुख देवे और पुत्र वीर्यवंत होवे और वंध्या पुत्र जने और जिसका अल्पायु पुत्र होवे और गूंगा, वह स्त्री बुद्धिमान् और सौ वर्षकी आयुवाला पुत्र जने, जिस स्त्रीके कन्या होती होय वहभी पुत्र जने, जिसका गर्भपात होता होवे उसका गर्भ स्थिर होवे, जो मराहुआ पुत्र जनती हो वह बुद्धिमान् पुत्र जने । रूपवान्. निरोगी पुत्र होवे, परंतु एकवर्णी गौका घी लेवे, यह संतानके लिये घृत भारद्वाजऋषीने कहा है और अच्छे वैद्योंने कहा है कि, पीछे लक्ष्मणाजडी डालकर लेवे ॥ १–११ ॥

सहाचरे द्वे त्रिफला गुडूची सपुनर्नवा ।
शुकनासा हरिद्रे द्वे रास्ना मेदा शतावरी ॥ १ ॥
कल्कीकृत्य घृतप्रस्थं पचेत्क्षीरं चतुर्गुणम् ।

Aho ! Shrutgyanam

तत्सिद्धं या पिबेन्नारी योनिशूलं निवारयेत् ॥ २ ॥
पीडिता चलिता या च निःसृता विवृता च या ।
पित्तयोनिश्च विभ्रांता षण्ढयोनिश्च या स्मृता ॥ ३ ॥
प्रपद्यंते हिताः स्थानं गर्भं गृह्णंति चासकृत् ।
एतत्फलघृतं नाम योनिदोषहरं परम् ॥ ४ ॥

२–त्रिफला, अडूसा, पियावांसा, गिलोय, सांठकी जड, अरलूकी छाल, दोनों हलदी, रास्ना, शतावरी इनका काढा करै, जब सिद्ध होजाय तब एक प्रस्थ सेवन करे तो स्त्रीका योनिशूल जाय, पीडा वहना, विघृता, पित्तयोनी, डरावनी, षंढयोनी, जिसकी रग भीतर हो ये संपूर्ण योनिदोष दूर होवें ॥ १–४ ॥

उदररोगे बिंदुघृतम् ।

अर्कक्षीरपले द्वे च स्नुहीक्षीरपलानि षट् ।
पथ्या कंपिल्लकश्यामा शम्याकं गिरिकर्णिका ॥ १ ॥
नीलिनी त्रिवृता रत्नी शंखिनी चित्रकं तथा ।
वृद्धदारुदेवदाली दंतीबीजं च शातला ॥ २ ॥
हेमक्षीरी च कटुकी विडङ्गं ग्रंथिकं तथा ।
एतेषां पलिकैर्भागैर्घृतप्रस्थं विपाचयेत् ॥ ३ ॥
अथास्य मलिने कोष्ठे बिन्दुमात्रं प्रदापयेत् ।
यावतोऽस्य पिबेद्बिंदूंस्तावद्वारान् विरिच्यते ॥ ४ ॥
कुष्ठं गुल्ममुदावर्त्तं श्वयथुं सभगन्दरम् ।
शमयत्युदराण्यष्टौ वृक्षमिन्द्राशनिर्यथा ॥ ५ ॥
एतद्बिन्दुघृतं नाम तेनाभ्यक्तो विरिच्यते ॥ ६ ॥

Aho ! Shrutgyanam

आकका दूध २ पल, थूहरका दूध २ पल, हरड १६ टंक, कबीला १०१ टंक, प्रियंगु १६ टंक, अमलतास १६ टंक, सेहुंड १ पल, नीलका बीज १ पल, निसोथ १ पल, दन्ती १ पल, शंखाहुली १ पल चित्रक १ पल, विधायरा १ पल, देवदारु १ पल, जमालगोटा १ पल, सातला १ पल, कौंच १ पल, कुटकी १ पल, वायविडंग १ पल, पीपलामूल १ पल इन सब औषधियोंको एक एक पल लेकर एक प्रस्थ घृतमें औटावे, फिर जिसका कोठा मलयुक्त हो उसको एक बूंद दे और जितनी बूंद देवे उतनेही दस्त होवें और कोढ, गुल्म, अफरा, उदावर्त्त, वमन, भगन्दर और आठ प्रकारकी उदरव्याधि दूर होवे, जैसे इन्द्रके वज्रसे वृक्ष कटता है वैसे इस बिन्दुनाम घृतसे विरेचन होवे ॥ १-६ ॥

दुष्टव्रणादौ जात्यादिकं घृतम् ।

जातीपत्रपटोलनिंबकटुकादार्वीनिशाशारिवामंजि-
ष्ठाभयसिक्थरक्तमधुकैर्नक्ताह्वबीजैः समम् ।
सर्पिः शीघ्रमनेन सूक्ष्मवदनं मर्माश्रितः
स्रावणा गंभीराः सरुजो व्रणाः सुगतिकाः
शुध्यंति रोहन्ति च ॥ १ ॥

जायफलके पत्ते, पटोल, नींबकी छाल, कुटकी, दारुहलदी, मजीठ, हरड, गौरीसर, कूठ, मोम, केशर, मुलहठी, कंजा इनकी समान मात्रा लेकर घृत डाल काढा करे, यह घृत गम्भीरव्रण, दुष्टव्रण फोडा फुंसियोंको दूर करे ॥ १ ॥

रुधिरविकारे महातिक्तकं घृतम् ।

करंजसप्तच्छदपिप्पलीनां मूलानि कृष्णा मधुका
विशाला । यवासकश्चंदनमुत्पलं च सत्रायमाणा

Aho ! Shrutgyanam

कटुका वचा च ॥ १ ॥ उशीरपाठातिविषा रजन्यौ किराततिक्तं कटुजस्य बीजम् । निवासनारग्वधमालतीनां पत्राणि मूलानि च कण्टकार्याः ॥ २ ॥ शतावरीपद्मकदेवदारुमुस्तानि कालेयककेशराणि । वासा गुडूची नतसारिवे द्वे बला पटोली त्रिफला च मूर्वा ॥ ३ ॥ नीपाकदंबौ धववेतसौ च कर्कोटकं पर्पटकं यवासः । वाराहि कन्दं दमयन्तिका च ब्राह्मी समंगर्षभवालकं च ॥ ४ ॥ एभिः समांशैरथ कार्षिकैश्च घृतस्य प्रस्थं विपचेन्नदस्य । द्रोणं जलस्याकलुषस्य दद्यात्प्रस्थद्वयं चामलकीरसस्य ॥ ५ ॥ पक्वं प्रशान्तं गतफेनशब्दं प्रयोजयेत्कुष्ठहरं प्रशस्तम्। तद्रक्तपित्तानिलसन्निपाते विस्फोटदुष्टव्रणविद्रधीषु ॥ ६ ॥ किलासकासज्वरगंडमालाग्रंथ्यर्बुदत्वग्भववातरक्तम् । घृतं महातिक्तमिदं प्रशस्तं निहंति सर्वाञ्छ्वयथून्विचर्चीन् ॥ ७ ॥

करंजके बीज, सतवन, पीपलामूल, पीपल, मुलहठी, इन्द्रायण, जवासा, चन्दन, कमल, त्रायमाण, कुटकी, वच, खस, पाढ, अतीस, दोनों हलदी, चिरायता, इन्द्रजौ, विजैसार, अमलतास, मालतीपत्र तथा जड, कटेरीकी जड, शतावर, पदमाख, पीलाचन्दन, देवदारु, मोथा, अगर, नागकेशर, अडूसा, गिलोय, तगर, सारिवा, २, नागबला, पटोल, त्रिफला, मुलहठी, नीलकन्द धायके फूल, वेतस,

Aho ! Shrutgyanam

करैलाकी जड, पित्तपापडा, जवासा, वाराहीकन्द, केवडेकी जड, ब्राह्मी, मँजीठ, ऋषभ ( लहसनके मुवाफिक हिमालयके पहाडमें होता है ) नेत्रवाला यह सब औषधि चार चार मासे लेवे और २५६ टंक घृतमें तथा पानी २५६ पल में औटावे फिर ६४ पल रक्खे, आमलेका, रस ५१२ टंक डाल देवे, जब झाग और शब्द बन्द होजावे तब निकाल लेवे । १८ प्रकारके कोढ, रक्तपित्त, वायुरोग, सन्निपात, दुष्ट फोडे, दुष्ट रोग, दाद, भ्रम, खांसी, ज्वर, गंडमाला, गांठ, अर्बुद, त्वचारोग और वातरक्तपर यह घृत महातीक्ष्ण है, यह घृत सम्पूर्ण प्रकारकी सूजनको दूर करता है ॥ १ ॥ ७ ॥

मस्तकरोगे षड्बिंदुघृतम् ।

शुण्ठीविडङ्गयष्ट्याह्वाभृङ्गतोयैः शृतं घृतम् ।
नस्यं षड्बिन्दुदानेन सर्वमूर्द्धगदापहम् ॥ १ ॥

सोंठ, वायविडंग, मुलहठी इनका भांगरेके काढेमें घृत बनाय नास देनेसे संपूर्ण मस्तकरोग जाते हैं ॥ १ ॥

वायुविकारे दशमूलादिघृतम् ।

दशमूलस्य निर्यूहेर्जीवनीयैः पलोन्मितैः ।
क्षीरेण च घृतं पक्वं तर्प्पणं पवनार्तिजित् ॥
क्वाथेन त्रिगुणं सर्पिः प्रस्थसाध्यपयःसमम् ॥ १ ॥

दशमूल १ पल, जीवनीयगण १ पल, इनको दूध और घीमें औटावे, जब काढा हो तब काढेसे तिगुना घी और दूध २५६ टंक डाले । यह संपूर्ण वायुरोगोंका नाश करता है ॥ १ ॥

अश्वगंधाघृतम् ।

अश्वगंधाकषायेण कल्के क्षीरं चतुर्गुणम् ।
घृतपक्वं तु वातघ्नं वृष्यं मांसविवर्द्धनम् ॥ १ ॥

Aho ! Shrutgyanam

असगन्धका काढा कर चौगुणा दूध उसमें डाले, फिर घृतमें पकावे यह घृत वायुको दूर करे तथा मांसको बढावे और वृष्य है ॥ १ ॥

वातरक्ते गुडूचीघृतम् ।

अमृतायाः कषायेण कल्केन च महौषधात् ।
मृद्वग्निना घृतं सिद्धं वातरक्तहरं परम् ॥ १ ॥
आमवातादिवातानां कृमिदुष्टव्रणान्यपि ।
अर्शांसि गुल्मांश्च तथा नाशयत्याशु योजितम् ॥ २ ॥

गिलोयके काढेमें सोंठ डालकर फिर घृत डालकर मन्दाग्निसे औटावे । यह घृत वातरक्त और आमवातयुक्त वा कृमि, दुष्टव्रण, बवासीर, गुल्म, आदि संपूर्ण रोगोंको नाश करता है ॥ १-२ ॥

वातशूले शुंठीघृतम् ।

नागरक्वाथकल्काभ्यां घृतप्रस्थं विपाचयेत् ।
चतुर्गुणेन तेनाथ केवलेनोदकेन वा ॥ १ ॥
वातश्लेष्मप्रशमनमग्निदीपनकं परम् ।
नागरं घृतमित्युक्तं कट्यामशूलनाशनम् ॥ २ ॥

सोंठके, काढेको एक प्रस्थ घीमें औटावे, परन्तु सोंठका पानी घृतसे चौगुना होवे. यह घृत वातश्लेष्मको दूर करता है, मन्दाग्निको दीप्त करे यह सोंठका घृत कटिशूल, आमवात और कठिन दरदका नाश करता है ॥ १-२ ॥

लूताविचर्चिकायां काशीसादिघृतम् ।

काशीसं द्वे निशे मुस्ते हरितालं मनः शिला ।
कंपिल्लकं च गंधं च विडङ्गं गुग्गुलं तथा ॥ १ ॥
सिद्धकं मरिचं कुष्ठं तुत्थकं गौरसर्षपः ।

Aho ! Shrutgyanam

रसांजनं च सिन्दूरं श्रीवासं रक्तचन्दनम् ॥ २
अरिमेदं निम्बपत्रं करञ्जं सारिवा वचा ।
मंजिष्ठा मधुकं मांसी शिरीषं लोध्रपद्मकम् ॥ ३ ॥
हरीतकी प्रपुन्नाटं चूर्णयेत् कार्षिकां पृथक् ।
ततस्तु चूर्णमालोड्य त्रिंशत्पलमिते घृते ॥ ४ ॥
स्थापयेत्ताम्रपात्रेषु घर्मे सप्तदिनानि च ।
अस्याभ्यङ्गेन कुष्ठानि दद्रुपामाविचार्चिकाः ॥ ५ ॥
शूकदोषा विसर्प्पाश्च विस्फोटा वातरक्तजाः ।
शिरःस्फोटोपदंशश्च नाडीदुष्टव्रणानि च ॥ ६ ॥
शोफा भगन्दराश्चैव लूताः शाम्यन्ति देहिनाम् ।
शोधनं रोपणं चैव सर्ववर्णकरं मतम् ॥ ७ ॥

हीराकसीस, दोनों हलदी, मोथा, हरिताल, मैनाशिल, कबीला, गन्धक, वायविडंग, गूगल, मोम, मिरच, नीलाथोथा, सरसों, रसौत, सिन्दूर, चीढ, रक्तचन्दन, कत्था, नीमके पत्ते, करंजुआ, गौरीसर, वच, मञ्जीठ, मुलहठी, बालछड, लोध, पद्माख, हरड, पमारके बीज इन सबको जुदी २ चार चार टंक लेवे, इनका चूर्ण ३० पल घृतमें डालकर औटावे । तांबेके पात्रमें सात दिन धूपमें रक्खे । फिर मर्दन करे तो दाद, पामा, विचर्चिका, शूकदोष, विसर्प, विस्फोटक, वातरक्त, शिरदोष, गरमी, नाडीव्रण, दुष्टव्रण, भगन्दर, मकडी फैलना इनको शोधन करे और देहका कालापन दूर होवे ॥ १–७ ॥

पञ्चतिक्तकं घृतम् ।

वृषानिम्बामृताव्याघ्रीपटोलानां शृतेन च ।
कल्केन पक्वं सर्पिस्तु निहन्याद्विषमज्वरान् ॥ १ ॥

Aho ! Shrutgyanam

अडूसा, नींबकी छाल, गिलोय, कटेरी, पटोल इनके काढेको घीमें औटावे, यह घृत विषमज्वरको तत्काल दूर करता है ॥ १ ॥

पुष्टौ कामदेवघृतम् ।

अश्वगन्धा तुलैका स्यात्तदर्द्धो गोक्षुरस्तथा ।
बलाऽमृता शालिपर्णी विदारी च शतावरी ॥ १ ॥
पुनर्नवा स्वच्छशुण्ठी काश्मर्यास्तु दलान्यपि ।
पद्मबीजं सटी बीजं दद्याद्दशपलं घृतम् ॥ २ ॥
चतुर्द्रोणं पयःपक्त्वा पादशेषं शृतं नयेत् ।
जीवनीयगणः कुष्ठं पद्मकं रक्तचन्दनम् ॥ ३ ॥
पत्रकं पिप्पली द्राक्षा कपिकच्छुफलं तथा ।
नीलोत्पलं नागपुष्पं सारिवे द्वे तथा बला ॥ ४ ॥
पृथक्कर्षसमा भागाः शर्करायाः पलद्वयम् ।
रसस्य पौण्ड्रकेक्षूणामाढकैकं समाहरेत् ॥ ५ ॥
घृतस्य चाष्टकं दत्त्वा पाचयेन्मृदुवह्निना ।
घृतमेतन्निहन्त्याशु रक्तपित्तं सुरक्षितम् ॥ ६ ॥
हलीमकं पाण्डुरोगं व्रणभेदं स्वरक्षयम् ।
वातरक्तं मूत्रकृच्छ्रं शश्वच्छूलं तु दारयेत् ॥ ७ ॥
शुक्रक्षयमुरोदाहं कार्श्यमोजःक्षयं तथा ।
स्त्रीणां चैव प्रजननं गर्भदं शुक्रदं नृणाम् ।
कामदेवघृतं नाम हृद्यं बल्यं रसायनम् ॥ ८ ॥

अब पुष्टताके ऊपर कामदेवघृत लिखते हैं । असगन्ध १०० पल, गोखरू ५० पल, खरैटी, गिलोय, शालपर्णी,

Aho ! Shrutgyanam

विदारीकंद, शतावरी, सांठी, पीपल, सोंठ, कुम्भेरन, ककडी यह सब एक एक पल, कमलगट्टा, कचूर, बीजफल, ४० लेवे, ६४ सेर पानीमें चढावे, जब चौथाई रहजाय तब उतारलेवे जीवनीयगण ( अर्थात् औषधि ), कूठ, पद्माख, रक्तचंदन, तेजपात, पीपल, दाखके बीज, कौंचके बीज, कमल, नागकेशर, दोनों गौरीसर, बेलगिरी यह चार चार टंक लेवे, मिश्री २ पल, कमलकेशर तथा गौडकेशर ६४ पल डालकर पकावे, जब सिद्ध होजाय तब निकाले । यह घृत बहुत दिनोंका रक्तपित्त, हलीमक, पांडुरोग, व्रणभेद, स्वरक्षय वातरक्त, मूत्रकृच्छ्र, पसलीके दरद, पीलिया, वीर्यक्षय, पेटका दरद, दुबलापन और क्षयका नाश करे और स्त्रियोंको सन्तानदायक तथा पुरुषोंको वीर्यदायक है । यह कामदेवघृत हृदयको हित तथा बलकारक रसायन है ॥ १-८ ॥

रुधिरविकारे मंजिष्ठादिघृतम् ।

मंजिष्ठा च हरिद्रा च देवदारु हरीतकी
शृङ्गवेरं ह्यतिविषा वचा कटुकरोहिणी ॥ १ ॥
हिंगुतश्चाक्षमात्रेण तत्सिद्धमवतारयेत् ।
एतन्मांजिष्ठकं सर्पिर्बहून्रोगान्निवारयेत् ॥ २ ॥
हिक्कां श्वासं ज्वरं कुष्ठं ग्रहणीं पाण्डुरोगताम् ।
प्रमेहमधुमेहांश्च क्रिमिगुल्ममरोचकम् ॥ ३ ॥
कासं शोषमुदावर्त्तमपस्मारं तथैव च ।
अर्शांसि श्वयथुं चैव गण्डमालां तथोदरम् ॥ ४ ॥

मंजीठ, हलदी, देवदारु, हरड, सोंठ, अतीस, वच, कुटकी हींग ये एक एक पल लेकर अठगुने पानीमें पकावे, जब चौथाई रहजाय तब घृत डाल देवे, जब सिद्ध होजाय तब उतार लेवे । यह घृत बहुत दिनके रोगोंको दूर करै हिचकी, श्वास, ज्वर, कोढ, संग्रहणी,

Aho ! Shrutgyanam

पांडुरोग, प्रमेह, अर्श, सूजन, गण्डमाला, कृमिरोग, गांठ, अरुचि, खांसी, शोष, उदावर्त्त, मृगी, और उदररोगादिकोंको दूर करै॥ १-४॥

संग्रहणीविकारे कल्याणगुडः ।

पाठाधान्यजवान्यजाजिहपुषाचव्यग्निसिन्धूद्भवैः
सश्रेयस्यजमोदकीटरिपुभिः कृष्णाजटासंयुतः ।
सव्योषैः सफलत्रिकैः सत्रुटिभिस्त्वग्यत्नजैरौषधैः
प्रत्येकं पलिकैः सतैलकुडवैः सार्द्धं त्रिवृन्मुष्टिभिः॥ १॥
सर्वैरामलकीरसस्य तुलया सार्द्धं तुलार्द्धं गुडं स-
म्पाच्यो भिषजाऽवलेहवदयं प्रागभोजनाद्भुज्यते ।
ये केचिद्ग्रहणीगदाः सगुदजाः कासाः सशोफामयाः
सश्वासं श्वयथुं शिरोदररुजः कल्याणकस्तान् जयेत् २

नागपुरीययतिवर श्रीहर्षकीर्तिसंकलिते ।
वैद्यकसारोद्धारे पञ्चमघृताधिकारोऽयम् ॥ ५ ॥

पाढ, धनियां, अजमायन, जीरा, कबाबचीनी, चव्य, सेंधानोन, पीपल, अजमोद, वायविडंग, पीपलामूल, सोंठ, मिरच, पीपल, त्रिफला, इलायची, तज, तेजपात, नागकेशर यह सब बराबर अर्थात् एक एक पल लेवे । तेल ६४ टंक, निसोथ १६ टंक, आंवलोंका रस १६० टंक, गुड १००० टंक डालकर अच्छे प्रकार औटावे फिर औषधियोंको डालकर अवलेह बनावे, भोजनके प्रथम चार टंक खावे । यह गुड-संग्रहणी, उदररोग, खांसी, कंठ सूखना, श्वास, कंठसूजन आदिरोगोंका नाश करे ॥ १ ॥ २ ॥

इति श्रीमाथुरदत्तरामचौबेकृतमाथुरीमञ्जूषाभाषाटीकायां
घृताधिकारः पञ्चमोऽध्यायः ॥ ५ ॥

Aho ! Shrutgyanam

# अथ तैलाधिकारः--षष्ठोऽध्यायः ६.

सर्ववातेषु नारायणतैलम् ।

बिल्वाग्निमन्थश्योनाकपाटलापारिभद्रकाः ।
प्रसारण्यश्वगन्धा च बृहती कण्टकारिका ॥ १॥
बला चातिबला चैव श्वदंष्ट्रा सपुनर्नवा ।
एषां दशपलान्भागांश्चतुर्द्रोणेऽम्भसः पचेत् ॥ २ ॥
पादशेषं परिश्रावं तैलाढकं प्रदापयेत् ।
शतपुष्पा देवदारु मांसी शैलेयकं वचा ॥ ३ ॥
चन्दनं तगरं कुष्ठमेलापर्णीचतुष्टयम् ।
रास्ना तुरगगन्धा च सैन्धवं सपुनर्नवम् ॥ ४ ॥
एषां द्विपलिकान् भागान्पेषयित्वा विनिक्षिपेत् ।
शतावरीरसं चैव तैलतुल्यं प्रदापयेत् ॥ ५ ॥
आजं वा यदि वा गव्यं दद्यात्क्षीरं चतुर्गुणम् ।
शनैर्विपाचयेत्सर्वं तत्सिद्धमवतारयेत् ॥ ६ ॥
पाने बस्तौ तथाऽभ्यङ्गे भोज्ये चैव प्रशस्यते ।
अश्वो वा वातसंभग्नो गजो वा यदि वा नरः ॥ ७ ॥
पंगुलः पीठसर्पी च तैलेनानेन सिद्ध्यते ।
अधोभागाश्च ये वाता शिरोमध्यगताश्च ये ॥ ८ ॥
दन्तशूले हनुस्तम्भे मन्यास्तम्भे गलग्रहे ।
क्षीणेंद्रिया नष्टशुक्रा ज्वरक्षीणाश्च ये नराः ॥ ९ ॥


Aho ! Shrutgyanam

बधिरा लग्नजिह्वाश्च विकला मन्दमेधसः।
मन्दप्रजा च या नारी या च गर्भं न विंदति।
कुरण्डमन्त्रवृद्धिश्च येषां तेषामिदं हितम् ॥ १० ॥
यथा नारायणो देवो दुष्टदैत्यविनाशनः।
तथेदं वातरोगाणां तैलं नारायणं स्मृतम् ॥ ११ ॥

बेल, अरणी, अरल, पाढल, नींबकी छाल, गंधप्रसारणी, असगंध, कटेरी, गंगेरन, गोखरू, सांठ यह सब दस दस पल लेकर ६४ सेर पानीमें औटावे, जब चौथाई रहजाय तब १०२४ टंक तेल डाले. सौंफ, देवदारु, बालछड, छारछबीला, वच, चन्दन, तगर, कूठ, इलायची, शालपर्णी, माषपर्णी, मुद्गपर्णी, पीलवनी, रास्ना, असगन्ध, सैंधानोन, सोंठ, यह सब दो दो पल ले पीसकर डालदेवे और शतावरीका रस तैलके बराबर अर्थात् चार सेर डाले, बकरी और गायका चौगुना दूध डालकर मंदी २ आंचसे पकावे, जब सिद्ध होजाय तब उतारले, फिर इस तेलको पीवे तथा मर्दन करे, भोजनके प्रथम तेल लेवे। घोडा हाथीके वातरोग तथा मनुष्यके पंगु, पीठभग्न वायु इतने रोग इस तेलके लगानेसे नाश होवें और नीचे अंगकी वायु, माथेकी वायु, दन्तशूल, हनुस्तम्भ, जाबडास्तम्भ, गलग्रह, इंद्रियक्षीण, वीर्यनष्ट, ज्वरकरके क्षीण होवे, जीभ फूलना, विकलता, मन्दबुद्धि, स्त्रीके संतान न होय, नलबंधना, आंतोंकी वृद्धि आदिक संपूर्ण रोगोंको नाश करता है ॥ १-११ ॥

जीर्णज्वरे तापातिदाहादौ च लाक्षादितैलम्।

चन्दनांबु नखं वाप्यं यष्टी शैलेयपद्मकम्।
मञ्जिष्ठा सरला दारु शटचेला नागकेशरम् ॥ १ ॥

Aho ! Shrutgyanam

पत्रं चैला मुरा मांसी कंकोलं च नतांबुदम् ।
हरिद्रे सारिवे तिक्तं लवङ्गागुरुकुङ्कुमम् ॥ २ ॥
त्वग्रेणुनलिकास्त्वेभिस्तैलं मस्तुचतुर्गुणम् ।
लाक्षारसं समं सिद्धं ग्रहघ्नं बलवर्णकृत् ॥ ३ ॥
अपस्मारक्षयोन्मादे कृतालक्ष्मीविनाशनम् ।
गात्राणां स्फुटने दाहे कण्डूजीर्णज्वरापहम् ॥ ४ ॥

१–चंदन, नेत्रवाला, नख, मुलहठी, शिलाजीत, पद्माख, मंजीठ, निसोथ, देवदारु, कचूर, इलायची, नागकेशर, तेजपात, बालछड, क्षीरकालोली, तगर, नागरमोथा, दोनों हलदी, दोनों गौरीसर, कुटकी, लौंग, अगर, केसर, रेणुका, चीता इनसे चौगुना तेल गायका मट्ठा ९ सेर, लाखका रस ९ सेर इन सबको औटावे, जब सिद्ध हो जाय तब काममें लावे । गलग्रहका नाश करे, शरीरका वर्ण अच्छा करे, मृगी, क्षयी, उन्मादको दूर करे, शरीरको पुष्ट करे, गात्रभंग, दाह, खाज, जीर्णज्वर आदिको दूर करे ॥ १–४ ॥

लक्षाढकं क्वाथयित्वा जलस्य चतुराढकैः ।
चतुर्थांशं शृतं नीत्वा तैलप्रस्थे विपाचयेत् ॥ १ ॥
तक्राढकं च गोदध्नस्तत्रैव च नियोजयेत् ।
शतपुष्पामश्वगन्धा हरिद्रा देवदारु च ॥ २ ॥
कटुका रेणुका मूर्वा कुष्ठं च मधुयष्टिका ।
चन्दनं मुस्तकं रास्ना पृथक्कृत्वा प्रमाणतः ॥ ३ ॥
चूर्णयेत्तत्र निक्षिप्य साधयेन्मृदुवह्निना ।
अस्याभ्यंगात्प्रशाम्यंति सर्वेऽपि विषमज्वराः ॥ ४ ॥

Aho ! Shrutgyanam

वातपित्ते क्षये दाहे गुर्विणीपुष्टिदं मतम् ।
कासश्वासासृग्विकारे कण्डूशूलभ्रमेषु च ॥ ५ ॥

२–लाखका रस १०२४ टंक, पानी २५६ पल डालकर काढा करे, मीठा तेल १६ पल डाले, गायका मट्ठा १६४ पल डाले और विधिपूर्वक पकावे फिर सौंफ, असगंध, हलदी, देवदारु, कुटकी, संभाळू, मुलहठी, कूठ, मोथा, रक्तचन्दन, रास्ना, मूर्वा इन सबको चार चार टंक ले पीसकर डाले, फिर मन्दाग्निमें पकावे, इसके मर्दन करनेसे संपूर्ण विषम ज्वर नाश होवे. वायु, पित्त क्षय, दाहको हित है और खांसी, श्वास, रुधिर विकार, खाज, शूल भ्रमादिकोंको दूर करता है. गर्भिणीको हित है ॥ १ ॥ ५ ॥

दद्रुमण्डलपामाविचर्चिकादौ मरिचादितैलम् ।

मरिचचंदनदारुनिशाद्वयं जलदमेघशिलालशकृद्रसैः।
त्रिवृतयाऽश्वहरोर्कपयोविषैः सुरभिमूत्रयुतं विप-
चेद्भिषक् ॥ १ ॥ कटुकतैलमिदं मरिचाह्वयं कठि-
नचर्मदलारसकापहम् । बहुलमण्डलसिध्मविच-
र्चिकाप्रवरकुष्ठकिलासविसर्पजित् ॥ २ ॥

मिरच, चन्दन, दोनों हलदी, देवदारु, खस, मोथा, मैनशिल, हरताल, गोबरका रस, निसोत, असगंध, आकका दूध, तेलिया मीठा इनको गोमूत्रमें औटावे, फिर कडवा तेल डालकर उतार लेवे. यह तेल चर्मदल, दाद, बडे चकत्ते, कोढ, पामा, फोडा, विचर्चिकादि संपूर्ण रोगोंको दूर करे ॥ १-२ ॥

वृद्धमरिचादितैलम् ।

मरिचं त्रिफला दन्तीक्षीरमार्कं शकृद्रसैः ।
देवदारु हरिद्रे द्वे मांसीकुष्ठं सचन्दनम् ॥ १ ॥

Aho ! Shrutgyanam

विशाला करवीरं च हरितालं मनःशिला।
चित्रको लाङ्गली लाक्षा विडङ्गं चक्रमर्दकम् ॥ २ ॥
शिरीषकुटजौ निम्बसप्तपर्णस्नुहीमृता।
सम्पाको नक्तमालश्च खदिरं पिप्पली वचा ॥ ३ ॥
ज्योतिष्मती च पलिका विषं च द्विपलं नयेत्।
आढकं कटुतैलस्य गोमूत्रं च चतुर्गुणम् ॥ ४ ॥
मृत्पात्रे लोहपात्रे वा शनैर्मृद्वग्निना पचेत्।
पक्त्वा तैलवरं ह्येतत्कर्षयेत्कोषकं व्रणम् ॥ ५ ॥
पामाविचर्चिकाकण्डूदद्रुविस्फोटकानि च।
वलितं पलितं छाया नीली व्यङ्गत्वमेव च ॥ ६ ॥
अभ्यंगेन प्रणश्यन्ति सौकुमार्यं च जायते।
प्रथमे वयसि स्त्रीणां नस्यमस्य तु दीयते ॥ ७ ॥
जरामपि तथा प्राप्य नाम्ना नायाति विक्रियाम्।
बलीवर्दस्तुरंगो वा गजो वा वायुपीडितः ॥
त्रिभिरभ्यंजयेद्गाढं भवेन्मारुतविक्रमः ॥ ८ ॥

मिरच, १ पल, त्रिफला १ पल, जमालगोटेकी जड १ पल, आकका दूध दो सेर, थूहरका दूध दो सेर, गोबरका रस दो सेर, देवदारु १ पल, दोनों हलदी १ पल, बालछड १ पल, कूठ १ पल, चन्दन १ पल, इन्द्रायण १ पल, कनेरकी जड १ पल, हरताल १ पल, मैनासिल १ पल, चित्रक १ पल, करिहारी १ पल, लाख १ पल, वायविडंग १ पल, पमाडके बीज १ पल, सिरसकी छाल १ पल, कुडेकी छाल १ पल, नींबकी छाल १ पल, सातपूडा १ पल, थूहर, गिलोय, अमलतास, कंजा, जावित्री, पीपल, खैरसार, बच, माल-

Aho ! Shrutgyanam

कांगनी, मंजीठ, तेलियामीठा, कडवातेल, ६४ पल, गोमूत्र २५६ पल इनको मिट्टीके पात्रमें अथवा लोहेके पात्रमें मन्दाग्निसे पकावे। जब पकजाँय तब उतारलेवे। यह तेल कोढ, व्रण, पामा, विचर्चिका, शरीरमें गुलजट और सफेद बालोंका होना, खुजली आदिमें हितकर है इस तेलके मर्दनसे शरीर सुंदर होय. प्रथम उमरवाली स्त्रीको नास देवे तो बुढापेमें भी सुन्दर तथा दृढ शरीर होय. किसी तरह विकारको प्राप्त नहीं होय. बैल, घोडा, हाथी ये वायुविकारसे पीडित होवें तो तीन दिन मर्दन करनेसे पवनके समान पराक्रमवाला होता है ॥ १-८ ॥

सर्ववातरोगे विषगर्भतैलम् १-२।

विषं च पुष्करं कुष्ठं वचा भार्ङ्गी शतावरी।
शुण्ठी हरिद्रे लशुनं विडङ्गं देवदारु च ॥ १ ॥
अश्वगन्धाऽजमोदा च मरिचं ग्रथिकं बला।
रास्ना प्रसारिणी शिग्रु गुडूची हपुषाऽभया ॥ २ ॥
दशमूलानि निर्गुण्डी मिशी पाठा च वानरी।
विशाला शतपुष्पा च प्रत्येकं पलिकोन्मितान् ॥ ३ ॥
चतुर्गुणजलैः पक्त्वा पादशेषं शृतं नयेत्।
तिलतैलं क्षिपेत्प्रस्थं तथैरण्डं च सार्षपम् ॥ ४ ॥
धत्तूरं चाण्डभृङ्गार्करसान्प्रस्थमितान्क्षिपेत्।
पाचयेद्गोमयरसैस्तैलशेषं समुद्धरेत् ॥ ५ ॥
पलमेकं विषं चात्र सूक्ष्मं कृत्वा विनिक्षिपेत्।
सर्वेषु वातरोगेषु सदाऽभ्यङ्गो विधीयते ॥ ६ ॥

Aho ! Shrutgyanam

संधिवाते सन्निपाते त्रिकपृष्ठे कटिग्रहे ।
पक्षाघाते तथाऽर्द्धांगे गात्रकंपेऽतिदारुणे ॥ ७ ॥
कुब्जके च धनुर्वाते गृध्रस्यां च प्रतानके ।
विषगर्भामिदं तैलं योजनीयं सदा बुधैः ॥ ८ ॥

१–तेलियामीठा, पोहकरमूल, सोंठ, वच, भारंगी, सतावर, मंजीठ, हलदी, लहसुन, वायविडंग, देवदारु, असगंध, अजमोद, मिरच, पीपलामूल, खरैटी, गंधप्रसारणी, सहंजना, गिलोय, हाऊबेर, हरड, दशमूल, संभालु, मेथी, पाढ, कौंचके बीज, इंद्रायणकी जड, सौंफ इन सबको एक एक पल लेकर चौगुने जलमें औटावे, जब चतुर्थांश बाकी रहे तब उतारलेवे, इसमें एक प्रस्थ मीठा तेल, एक प्रस्थ अंडीका तेल और एक प्रस्थ सरसोंका तेल डाले, पीछे इनमें धतूरा, अंड, भांगरा, आकका रस एक एक प्रस्थ डाले. फिर गोबरका रस डालकर पकावे. जब तेल सिद्ध होजाय तब एक पल विष डालकर देहमें लगावे. यह तेल संपूर्ण वातरोगोंका नाश करे, इसकी मालिशसे संधिगत वायु, सन्निपात, त्रिक, पीठ, कमर, इनका दुखना, पक्षाघात, अर्द्धांग कंपवायु, कुबडापन, धनुषवायु, गृध्रसीवायु, प्रतानवायु आदिक रोग दूर होवें यह विषगर्भ तैल है ॥ १–८ ॥

कनकश्चापि निर्गुंडी तुंबिनी सपुनर्नवा ।
वानरीयाऽश्वगंधा च प्रयुन्नाटः सचित्रकः ॥ ९ ॥
सौभांजनं काकमाची कलिहारी तु निंबकैः ।
महानिंबेश्वरी चैव दशमूली शतावरी ॥ १० ॥
कारवेल्ली सारिवे द्वे श्रीपर्णी च विदारिका ।
वज्रार्कमेषशृङ्गी च करवीरद्वयंतथा ॥ ११ ॥

Aho ! Shrutgyanam

काकजंघा त्वपामार्गस्तथा स्यात्सुप्रसारिणी ।
त्रिफला तत्समांशेन रसं तैलं समानि च ॥ १२ ॥
अशुक्तितिलतैलं च तैलमैरण्डसार्षपम् ।
पचेदेकत्र सर्वं तत्तैलं सिद्धं च बुद्धिमान् ॥ १३ ॥
त्रिकटून्यश्वगन्धा च रास्ना कुष्ठं च निंबके ।
देवदारु कलिंगं च द्वौ क्षारौ लवणानि च ॥ १४ ॥
तुत्थं कटुफलं पाठा भार्गी च नवसादरम् ।
गन्धकं पुष्करं मूलं शिलाजतु सटी वचा ॥ १५ ॥
एत नि कर्षमात्राणि तैलशेषे विनिक्षिपेत् ।
प्रसृतं च विषं दद्यात्सूक्ष्मचूर्णीकृतं क्षिपेत् ॥ १६ ॥
विषगर्भमिदं तैलं सर्वव्याधीन्व्यपोहति ।
कुक्षिभ्रूपृष्ठगण्डेषु संधानं शोफमेव च ॥ १७ ॥
गृध्रसीं च शिरोवायुं सर्वांगस्फुटनं तथा ।
दण्डापतानकाष्ठीलं कर्णनादस्य शून्यताम् ॥ १८ ॥
कम्पनं चोर्ध्ववातं च बाधिर्यं पलितं तथा ।
गण्डमालापचीग्रन्थिशिरःकम्पापतन्त्रकम् ॥ १९ ॥
अनेन सर्ववाताश्च सन्निपातास्त्रयोदश ।
वनमभ्यागते सिंहे पलायन्ते यथा मृगाः ।
तथा वातेषु सर्वेषु योजनीयं भिषग्वरैः ॥ २० ॥

२–धतूरेके बीज, संभालू, कडवी तुंबी, सोंठ, कौंचके बीज, असगंध, पमाड, चीता, सहँजना, मकोय, कालिहारी, नीबकी छाल, बकायन, दशमूल, शतावरी, करेला, दोनों

Aho ! Shrutgyanam

गौरीसर, श्रीपर्णी, विदारीकंद, सेहुंड, आक, मेढासिंगी, लाल कनेर तथा सफद कनेर, काकजंघा, ओंगा, प्रसारिणी, त्रिफला यह सब बराबर लेवे और चौगुने पानीमें काढा करे काले तिलका तेल काढेके बराबर, एरंडका तल दूना, सरसोंका तेल तिगुना इन सबको बुद्धिमान् वैद्य एकत्र कर पकावे. तदनंतर सोंठ, मिरच, पीपल, असगंध, रास्ना, कूठ, नींबकी छाल, देवदारु, इन्द्रयव, जवाखार, सज्जी, पांचोंनोंन, शुद्ध नीलाथोथा, कायफल, पाढ, भारंगी, नवसादर, गंधक, पोहकरमूल, शिलाजीत, कचूर, वच, यह औषधि चार चार टंक जब तेलमात्र शेष रहे तब डाल देवे फिर बत्तीस टंक तेलिया मीठा डाले । यह विषगर्भ तेल संपूर्ण रोगोंको दूर करता है । पीठका दरद, भौंहकी पीडा, कूखका दरद कनपटीकी पीडा, संधिपीडा, सूजन, गृध्रसी, माथेकी वायु, सर्वांगफूटन, प्रतानवायु, उदरगाठ, कर्णरोग, मूत्रवायु, कंपवायु, ऊर्ध्ववायु, अधोवायु, बहरापन, पलित, गंडमाला, अपचीवात, मस्तककंप, तेरह प्रकारका सन्निपात, आदि संपूर्ण वातरोग इस तेलसे नाश होते हैं । जैसे वनमें सिंहको देखकर सब मृग भाग जाते हैं उसी प्रकार इस दवाके सेवनसे संपूर्ण रोग नाश होते हैं । इसको अच्छा वैद्य संपूर्ण वातरोगमें देवे ॥ ९-२० ॥

### मस्तकरोगे षड्बिन्दुतैलम् ।

एरण्डमूलं तगरं शताह्वा जीवंतिरास्ना लवणोत्तमं च । भृंगं विडंगं मधुयष्टिका च महौषधं चेति तिलस्य तैलम् ॥ १ ॥ एतैर्विपक्वैः पयसा च तुल्यं चतुर्गुणे भृंगरसे च सम्यक् । षड् बिन्दवो नासिकयोपयुक्ताः सर्वान्निहन्युः शिरसो

Aho ! Shrutgyanam

विकारान् ॥ २ ॥ च्युतांश्च केशान् स्खलितांश्च दन्तानुद्बद्धमूलांश्च दृढीकरोति । सुपर्णनागप्रतिमं च चक्षुर्बुद्धिं बलं चाभ्यधिकं करोति ॥ ३ ॥

एरंडमूल, तगर, सतावर, जैती, रास्ना, सेंधानोंन, भांगरा, वायविडंग, मुलहठी, सोंठ, तिलका तेल, पहले तेलको बकरीके दूधमें पकावे फिर तेलसे चौगुना भांगरेका रस डाले और औषधियोंका काढा डालकर पकावे, जब सिद्ध होजाय तब बर्ते. इस तेलकी छः बून्द नाकमें डाले तो सर्व मस्तकविकार नष्ट होवें, बालोंका दृढ करे, उखडे बालोंको फिर जमावे और दांतोंको दृढ करे, दृष्टि बढावे, बल अधिक करे ॥ १-३ ॥

वातरोगे शतावरीतैलम् ।

शतावरीरसं ग्राह्यं पाच्यं वा यन्त्रपीडितम् ।
प्रभूतं तद्रसं क्षिप्त्वा तैलस्याढकमेव च ॥ १ ॥
दधिक्षीरेण विपचेद्द्रव्याण्येतानि दापयेत् ।
शतपुष्पा वचा कुष्ठं मांसीशैलेयचन्दनैः ॥ २ ॥
प्रियंगु पद्मकं मुस्ता ह्रीबेरोशीरतट्फलम् ।
सैन्धवं मधुकं रोध्रं गैर्यकं रक्तचन्दनम् ॥ ३ ॥
चण्डा चैला मुरा स्पृक्का नलिका पद्मकेशरम् ।
श्रीवेष्टकं सर्ज्जरसं जीवकर्षभकौ सटी ॥ ४ ॥
पतंगरेणुका दार्वी कर्चूरं सारिवा तथा ।
मञ्जिष्ठा मधुकं चैव द्रव्यैरेतैः पलोन्मितैः ॥ ५ ॥
मध्यपाकं विजानीयात्ततस्तमवतारयेत् ।

Aho ! Shrutgyanam

पथ्यं पाने तथाऽभ्यंगे नस्ये योज्ये च दापयेत् ॥६॥
पीड्यमाने तथा वाते पक्षाघाताभिमंथके ।
आर्दिते कर्णशूले च उरुस्तम्भे कटिग्रहे ॥ ७ ॥
पवने च शिरःकम्पे सूतिकायां प्रदापयेत् ।
मन्यास्तम्भे धनुःकम्पे ह्यस्थिभंगे च दारुणे ॥८॥
तथा सर्वगते वायौ शुष्यमाणेषु धातुषु ।
अनार्त्तक्षीणरेतस्तु वन्ध्यायां गर्भिणीषु च ॥ ९ ॥
वृक्षं पुनर्नवाकारं बलमारोग्यदं महत् ।
शतावरीतैलमिदं सर्ववातविकारनुत् ॥ १० ॥

शतावरीका रस १०२४ टंक निकालकर मीठा तेल १०२४ टंक डाले फिर दही, दूध डालकर पकावे । सौंफ, वच, कूठ, शिलाजीत चन्दन, प्रियंगु, पद्माख, मोथा, हाऊबेर, खस, कायफल, सेंधानोंन, मुलहठी, लोध, अगर, पतंग, लाल कनेर, कस्तूरी, इलायची, बालछड, छारछबीला, कमल, नागकेशर, चीढ, राल, जीवक, ऋषभक, कचूर, संभालू, दारु हलदी, गौरीसर, मंजीठ यह सब औषधि एक एक पल लेकर तेलमें डालकर पकावे. जब पकजाँय तब उतारकर पानमें, मर्दन, नास, तथा भोजन आदिमें लेवे. यह वायुपीडा, पक्षाघात, दरद, कानका दरद, ऊरुस्तम्भ, कमरका दरद, वमन. मस्तकरोग, प्रसूतिकारोग, इन रोगोंमें अवश्य देवे । जावडास्तम्भ, धनुर्वात हडफूटन भयानक दरद, धातु सूखना, क्षीणवीर्य आदिक रोगोंको दूर करता है, वन्ध्या सेवन करे तो पुत्रवती होय. शरीरको पुष्ट करे. बल करे, आरोग्य करे, सब प्रकारके वायुके नाशक है ॥ १-१० ॥

Aho ! Shrutgyanam

वातपित्तादिरोगे बलाद्यतैलम् ।

बलाशतं गुडूच्याश्च पादं रास्नाष्टभागकम् ।
जलाढकशतैः पक्त्वा शतभागस्थिते रसे ॥ १ ॥
दधिमस्त्विक्षुनिर्यासे शुक्तैस्तैलाढके शनैः ।
पचेत्सा च पयोद्धांशं कल्कैरेभिः पलोन्मितैः ॥२॥
सटीसरलदार्व्येलामञ्जिष्ठागरुचन्दनैः ।
पद्मकात्रिफलामुस्तासूर्यपर्णीहरेणुभिः ॥ ३ ॥
यष्ट्याह्वासुरसाव्याघ्रीनखर्षभकजीवकैः ।
पलाशरसकस्तूरीनलिकाजातिकोशकैः ॥ ४ ॥
स्पृक्काकुंकुमशैलेयामालतीकट्फलांबुभिः ।
त्वक्कुन्दरसकर्पूरीतुरुष्कश्रीनिवासकैः ॥ ५ ॥
लवङ्गनखकंकोलकुष्ठमांसीप्रियंगुभिः ।
क्षीरेयतगरं वापि वचादमनकच्छुकैः ॥ ६ ॥
सनागकेशरं सिद्धे दद्याच्चात्रावतारिते ।
पलमात्रं ततः पूतं विधिना तत्प्रयोजयेत् ॥ ७ ॥
कासं श्वासं ज्वरं मूर्छां छर्दिगुल्मक्षतक्षयान् ।
दौर्बल्यं शिरसस्तापं सर्वधात्वावृतानिलम् ॥ ८ ॥
प्लीहशोषात्रपस्मारमलक्ष्मीं च प्रणाशयेत् ।
बलातैलमिदं श्रेष्ठं वातव्याधिविनाशनम् ॥ ९ ॥

खरेटी १०० पल, गिलोय २५ पल, रास्ना १२ पल, इनको दश मन पानीम पकावे जब सौ पल रहजाय तब, उतारलेवे फिर दही मट्ठा गुड इनके काढेम पकावे, फिर १

Aho ! Shrutgyanam

आढक तिलके तेलमें पकावे, बकरीके आध आढक दूधमें काढा कर इन औषधियोंको डाले–कचूर, देवदारु, दारुहलदी इलायची, मंजीठ, अगर, चन्दन, पद्माख, त्रिफला, मोथा, माषपर्णी, रेणुका, मुलहठी, रास्ना, कटेरी, नख, सुगन्धिद्रव्य, ऋषभक, जीवक, पलाश ( ढाक ) रस, कस्तूरी, निसोत, जायफल, केशर, शिलाजीत, मालतीपुष्प, कायफल, नेत्रवाला, तज, कुन्द, त्वचा, कपूर, लोहबान, चीढ, लौंग, करंज, मिरच, कंकोल, कूठ दोनों मरुआ, बालछड, प्रियंगू, फावूला तगर, वच, दमनफूल, कौंचके बीज, नागकेशर, जब तेल पकजाय तब इन औषधियोंको १६ टंक डालकर फिर पकावे। इसको विधि-संयुक्त सेवन करे तो खांसी, श्वास, ज्वर, मूर्च्छा, छर्दि, गोला, क्षय, दुर्बलता, मस्तकशूल, सम्पूर्ण धातुओंके भीतरकी वायु, प्लीहा, सूजन, मृगी, शरीरका दोष ( मल ) इतने रोगोंको बलातेल नाश करता है और सम्पूर्ण प्रकारकी वायुको दूर करता है ॥ १–९ ॥

वातरोगे प्रसारणीतैलम् ।

प्रसारणीक्काथपयोम्बुतक्रमस्त्वारनालं विपचेत्तु तैलम् । कल्कीकृतं विश्वघनांबुकुष्ठं मांसीशताह्वामरदारुसेव्यैः ॥ १ ॥ शैलेयरास्नागरुसारिवा च सिन्धूत्थबिल्वानलमंथचोच्चैः । तगरं लतांभोजपुनर्नवा स्याच्छ्योनाकयष्ट्याभकुटंनटैश्च ॥ २ ॥ छिन्नोद्भवादार्व्यभयाकरंजमेदानिशाह्वैः सफलत्रिकैश्च । एरण्डगोकंटकजीवकैश्च तत्साधितं हंत्यनिलोत्थरोगान् ॥ ३ ॥

Aho ! Shrutgyanam

सर्वांश्च दीप्तानपि पक्षघातान्वाताश्रिताध्मानहनु-
ग्रहादीन ॥ ४ ॥ संशुष्कभग्नप्रबलाङ्गयष्टि
योऽसाध्यतामुल्बणमारुतेन । नीतः पुमांस्तस्य
भवेदवश्यं प्रसारणीतैलमिदं हिताय ॥ ५ ॥

प्रसारणीका काढा कर दूध, दही, मट्ठा, कांजी इनको मिलाकर पकावे जब तेल शेष रहजाय तब उतारकर सोंठ, मोथा, नेत्रबाला, कूठ, अरणी, तज, मञ्जीठ, अगर, कमल, सांठी, अरलू, मुलहठी, मनसिल, छड, सौंफ, देवदारु, शिलाजीत, रास्ना, अगर, गौरीसर, सैंधानोंन, बेल, गिलोय, दारुहलदी, हरड, कांज, अष्टवर्ग, हलदी, बहेडा, आंवला, एरंड, गोखरू, जीवक इनसे सिद्ध किया तेल संपूर्ण वायुरोगोंको दूर करता है. सब इन्द्रियोंको बल करे और पक्षाघात, पेटका अफरा, हनुग्रह, गृध्रसी, सब भुजारोग, बाहुशोष, हृदय, मस्तक, शरीरफटेको उल्वण सन्निपात, आदि संपूर्ण वायुरोगोंको दूर करता है ॥ १-५ ॥

साधारणगुणभूषाद्यईचन्दनादितैलम् ।

चन्दनं पद्मकं कुष्ठमुशीरं देवदारु च ।
नागकेशरपत्रैलात्वङ्मांसीतगरं जलम् ॥ १ ॥
जातीफलं घोण्टफलं कुंकुमं जातिपत्रिका ।
नखं कुन्दरुकस्तूरी चण्डासैलेल्हदं मनः ॥ २ ॥
पतङ्गं पुष्करं मुस्ता रक्तचन्दनसारिवा ।
शटीकर्पूरमञ्जिष्ठालाक्षायष्टिप्रियंगुभिः ॥ ३ ॥
शतपुष्पा वरी मूर्वा ह्यश्वगन्धा महौषधम् ।
पद्मकेशरश्रीबिल्वमरलागरुरेणुभिः ॥ ४ ॥

Aho ! Shrutgyanam

स्पृक्कालवंगकंकोलं द्रवैरेभिर्द्विकर्षकैः ।
दशमूलकषायस्य भागाः षष्ट्यायसस्तथा ॥ ५ ॥
यवकोलकुलत्थानां बलामूलस्य चैकतः ।
निक्काथ्य भागो भागाश्च तैलस्य च चतुर्दश ॥ ६ ॥
ततः पक्के विजानीयात्क्षिप्रं तदवतारयेत् ।
शुभे पात्रे विनिक्षिप्तमौषधैस्तु सुगन्धिभिः ॥ ७ ॥
प्रतीवापं ततः कार्यमेषां संयोजने विधिः ।
प्रयोज्यं सुकुमाराणामीश्वराणां सुखात्मनाम् ॥ ८ ॥
स्त्रीणां स्त्रीवृन्दभर्तॄणामलक्ष्मीकलिनाशनम् ।
सर्वकाले प्रयोगेण कांतिलावण्यपुष्टिदम् ॥ ९ ॥
जीर्णज्वरं सदाहं च शीतं च विषमज्वरम् ।
शोषापस्मारकुष्ठघ्नं वंध्यानां च सुतप्रदम् ॥ १० ॥
अशीतिं वातजान्रोगान्वातरक्तं विशेषतः ।
सूतिकाबालमर्मास्थिहतक्षीणेषु पूजितम् ॥ ११ ॥
व्याधितानां हितार्थाय ये तु कंड्वार्तिपीडिताः ।
विशेषाद्रूक्षदेहानां विचित्राणां विशेषतः ॥ १२ ॥
विनिर्मितमिदं तैलं चात्रेयेण महर्षिणा ।
न चास्मात्सहसा रोगाः प्रभवंत्यूर्ध्वजत्रुजाः ॥ १३ ॥
अस्य प्रयोगात्तैलस्य जरां न लभते नरः ।
चन्दनादि त्विदं तैलं लोकानां च हितप्रदम् ॥ १४ ॥

चन्दन, पदमाख, कूठ, उशीर, देवदारु, नागकेशर, तेजपात, इलायची, तज, बालछड, तगर, नेत्रबाला, जायफल, सुपारी,

Aho ! Shrutgyanam

केशर, जावित्री, नख, ( नख नामसे प्रसिद्ध सुगंधियुक्त होता है ), गोंद, कस्तूरी, कोकेछ, छारछबीला, पतंग, पोहकरमूल, मोथा, रक्तचन्दन, गारीसर, कचूर, कपूर, मजीठ, लाख, मुलहठी, प्रियंगु, सौंफ, शतावर, मूर्वा, असगन्ध, सोंठ, कमलकेशर, हाऊबेर, चीढ, पित्तपापडा, गठिवन, लौंग, कंकोल इन औषधियोंको ८ टंक लेकर और दशमूल १ भाग ले लोहेकी कढाईमें काढा करे, बेर कुलथीका काढा करे. इनको एकत्र कर और खौंटीकी जडका काढा यथोक्त कर चौगुना तेल डाले. जब परिपक्व होजावे तब उतार लवे और सुन्दर पात्रमें रख देवे और सुगंधवाली औषधियोंको ऊपरसे डाल देवे। इसके मर्दनसे शरीर सुन्दर होवे. स्त्री पुरुष दोनों लगावें तो शरीर शोभायुक्त होवे, बहुत दिनका ज्वर, दाह, शीतज्वर, विषमज्वर, मुखशोप, मृगी, कोढ आदिको दूर करे, बाँझ स्त्रीके पुत्र होय, ८० प्रकारके वातरोग, प्रसूतरोग, बालका मर्मरोग, वीर्यक्षीण, हतवीर्य, खाज, रूखी देह, त्वचाके रोग और जत्रुके ऊपर जो रोग होवें उन सबमें यह चंदनादि तेल हितकारक है. यह आत्रेय मुनिने कहा है ॥ १-१४ ॥

कुष्ठदद्रुविकारे वज्रतैलम् ।

वज्रीक्षीररविक्षीरे द्रव्यधान्यारचित्रकम् ।
महिषीविड्भवं द्रावं सर्वांशतिलतैलकम् ॥ १ ॥
पचेत्तैलावशेषं तु गोमूत्रेऽथ चतुर्गुणम् ।
तैलावशेषं पक्त्वा च तत्तैलं प्रस्थमात्रकम् ॥ २ ॥
गन्धकाग्निशिलातालविडङ्गातिविषाविषम् ।
तिक्तकोशातकी कुष्ठं वचा मांसी कटुत्रिकम् ॥ ३ ॥

Aho ! Shrutgyanam

पीतदारु च यष्ट्याह्वं सर्जिक्षारं च जीरकम् ।
देवदारु च कर्षांशचूर्णं तैले विमिश्रयेत् ॥ ४ ॥
वज्रतैलमिति ख्यातमभ्यंगात्सर्वकुष्ठनुत् ॥ ५ ॥

थूहरका दूध, आकका दूध, धतूरेका रस, चीतेका रस, भैंसके गोबरका रस इन सबके बराबर तिलका तेल डालकर पकावे, जब तेलमात्र रहजाय तब उतार लेवे, तेल एक प्रस्थ डाले फिर गोमूत्र चौगुना डालकर पकावे फिर चीता, गण्डक, मनसिल, हरताल, वायविडङ्ग, अतीस, तेलियामीठा, सज्जीखार, जीरा, देवदारु, इनको चार चार टंक, चूर्ण कर डाले । इस तेलके लगानेसे सम्पूर्ण कुष्ठ नाश होवें ॥ १-५ ॥

कुष्ठे कालानलतैलम् ।

त्रिक्षारं पटुपञ्चकोलरजनी तालं शिला गन्धकं ।
सिन्दूरं रसराठरामठनृपं लोहं रसोनांजनम् ।
कुष्ठं तुत्थकदारुवेल्लमहिजं स्नुह्यर्कदुग्धप्लुतं ।
पाच्यं सर्षपतैलमष्टदधिकं कुष्टे हि कालानलम् ॥ १ ॥

सज्जी, जवाखार, सुहागा, पांचों नोन, बेर, हलदी, हरताल, मनसिल, गन्धक, सिन्दूर, पारा, मैंनफल, हींग, भांगरा, सार, लहसन, रसौंत, कूठ, नीलाथोथा, दारु हलदी, वायविडंग, चिरायता, थूहर, आकका दूध इन सबको बराबर लेकर सरसोंका तेल आठ पल, गायका मट्ठा ८ पल ले तेल बना लेवे । यह तेल १८ प्रकारके कुष्ठोंका नाश करे ॥ १ ॥

सिन्दूरादितैलम् १-२ ।

सिन्दूरं चन्दनं मांसी विडंगं रजनीद्वयम् ।
प्रियंगुः पद्मकं कुष्ठं मञ्जिष्ठा खदिरं वचा ॥ १ ॥



Aho ! Shrutgyanam

जात्यर्कत्रिवृता निम्ब करंजविषमेव च।
कृष्णा छत्रकरोध्रं च प्रपुन्नाटं च संहरेत् ॥ २ ॥
अम्लपिष्टानि सर्वाणि योजयेत्तैलमात्रया।
अभ्यंगेन प्रयुंजीत सर्वकुष्ठविनाशनः ॥ ३ ॥
पामाविचर्चिकाकच्छूविसर्पे विहितं मतम्।
रक्तपित्तोत्थितान्हन्ति रोगानेवंविधान्बहून् ॥ ४ ॥

१-सिन्दूर, चन्दन, बालछड, वायविडंग, दोनों हलदी, प्रियंगु, पदमाख, कूठ, मंजीठ, खैरसार, बच, चमेली, आकका दूध, निसोथ, नीम्बकी छाल, कंजा तेलियामीठा, पीपल, छतोना, छारछबीला, लोध, पमारके बीज इनको एकत्र कर इमलीके रसमें पीस तेलमें पकावे, जब सिद्ध हो जाय तब मर्दन करे तो सम्पूर्ण कोढ दूर होवें, और पामा, विचर्चिका, दाद, फोडा तथा रक्तपित्तादि रोग दूर होवें १-४॥

सिन्दूरार्द्धपले पिष्टं जीरकस्य पलं तथा।
कटुतैलं पचेत्ताभ्यां सद्यः पामाहरं परम्।
वृद्धवैद्योपदेशेन पचेत्तैलं पलाष्टकम् ॥ १ ॥

२-सिन्दूर ८ टंक, जीरा १६ टंक, सरसोंका तेल ८ पल ले पकावे। इस तैलको मर्दन करनेसे पामा और कुष्ठ दूर होवें ॥ १ ॥

गुंजादितैलम्।

गुञ्जामूलं फलं तैलं तोयं द्विगुणितं पचेत्।
तस्याभ्यङ्गेन संमर्देद्गण्डमालां सुदारुणाम् ॥ १ ॥

चिरमिटीकी जड और फल साथ लेकर तेल और दुगुने पानीमें औटावे जब तैल सिद्ध होजाय तब इसके मर्दन करनेसे कठिन गंडमाला दूर होवे ॥ १ ॥

Aho ! Shrutgyanam

भल्लातकतैलम् ।

भल्लातकत्र्यूषणमक्षचूर्णं कुष्ठं च गुंजा त्रिफला च तैलम् । क्षारांश्च पंचाथ विपच्य चैतदभ्यंजनाद्धन्ति च कुष्ठदद्रुम् ॥ १ ॥

भिलावा, सोंठ, मिरच, पीपल, बहेडा, कूठ, चिरमिटी, त्रिफला, कडवातेल, पांचों नोन इन औषधियोंको पकाकर तेल बनाकर इसको मर्दन करनेसे कोढ तथा दाद दूर होवे ॥ १ ॥

अर्कतैलम् ।

अर्कपत्ररसे पक्वं हरिद्राकल्कसंयुतम् ।
शोधयेत्सार्षपं तैलं पामाकच्छूविचर्चिकाः ॥ १ ॥

आकके पत्तोंके रसमें हलदी पीसकर काढा करे, सरसोंका तेल डालकर पकावे, जब, तेल शेष रहे तब उतारलेवे यह तेल पामा, दाद, विचर्चिकाको दूर करता है ॥ १ ॥

नीलकाद्यं तैलम् ।

नीलका केतकीकन्दं भृंगराजकुरण्टकः ।
तथाऽर्जुनस्य पुष्पाणि बीजकाक्षसमानपि ॥ १ ॥
कृष्णास्तिलाश्च तगरं समूलं तगरं तथा ।
अयोरजः प्रियंगुश्च दाडिमत्वग्गुडूचिका ॥ २ ॥
त्रिफला पद्मकाष्ठं च कल्कैरेभिः पृथक्पृथक् ।
कर्षमानं पचेत्तैलं त्रिफलाक्वाथसंयुतम् ॥ ३ ॥
भृंगराजरसेनैव सिद्धं केशः स्थिरीभवेत् ।
अकालपलितं कण्डूमिन्द्रलुप्तं च नाशयेत् ॥ ४ ॥

Aho ! Shrutgyanam

नीलवृक्ष ( पत्रज ), केतकीकी जड, भांगरा, पियाबाँसा, अर्जुनवृक्षके फूल, बिजैसार, बहेडा, इनकी बराबर मात्रा ले, फिर काले तिलका तेल, तगर, कमलकी जड, लोहकी चूरा, प्रियंगू, अनारकी छाल, गिलोय, त्रिफला, पद्माख, इन सबको चार चार टंक लेकर तेलमें पकावे, फिर त्रिफलेका काढा, भांगरेका रस डालकर पकावे, जब तेल रहजाय तब उतार लेवे । इसके लगानेसे बाल स्थिर होवें और जवानीमें बाल सफेद होजायँ तो काले होवें, खाज, होनेसे बाल उडजांय तो फिर आवें ॥ १–४ ॥

रोमशातने नाडीव्रणादौ च क्षारादितैलम् ।

शुक्तिशम्बूकशङ्खानां दीर्घवृन्तान् समाक्षिकान् ।
दुग्धक्षारं समादाय खरमूत्रेण भावयेत् ॥ १ ॥
क्षाराष्टभागं विपचेत्तैलं सर्षपजं बुधः ।
इदमन्तःपुरे देयं तैलमात्रेण पूजितम् ॥ २ ॥
बिन्दुरेकः पतेद्यत्र तत्र रोम पुनर्नहि ।
इदं नाडीव्रणे तैलमश्विभ्यामेव निर्मितम् ॥ ३ ॥
अर्शांसि कुष्ठरोगाणि पामादद्रूविचर्चिकाः ।
क्षारतैलमिदं श्रेष्ठं सर्वकेशहरं परम् ॥ ४ ॥

सीप, घोंघा, बडा शंख ( भानाम कट्ठ ) इनको गरम कर गधेके पेशाबमें बुझावे, आठ भाग क्षारको एक भाग सरसोंके तेलमें पकावे, जब तेल शेष रहे तब उतार लेवे । यह तेल अन्तःपुरमें देवे । एक बूँद डालनेसे रोम दूर होवें, नाडीव्रणके निमित्त यह तैल अश्विनी कुमारोंने कहा है अर्श, १८ प्रकारका कोढ, पामा, दाद आदिका नाश करे । सम्पूर्ण बालोंको दूर करता ह यह क्षारतेल श्रेष्ठ है ॥ १–४ ॥

Aho ! Shrutgyanam

स्तनविकारे कासीसादितैलम् ।

कासीसतुरगगन्धासांबरगजपिप्पलीविपक्वेन ।
तैलेन यान्ति वृद्धिं स्तनकर्णवरांगलिंगानि ॥ १ ॥
कटीतटनिकुंजेषु संस्थितो वातकुंजरः ।
एरण्डतैलसिंहस्य गन्धमाघ्राय गच्छति ॥ २ ॥

नागपुरीययतिवरश्रीहर्षकीर्तिसंकलिते ।
वैद्यकसारोद्धारे षष्ठस्तैलाधिकारोऽयम् ॥ ६ ॥

कासीस, असगन्ध, लोध, गजपीपल इनको तेलमें डालकर पकावे जब तेल मात्र रहजाय तब उतारलेवे । इसके मलनेसे स्त्रियोंके स्तन बढें, योनिवृद्धि तथा लिंग वृद्धि करे । कमरमें दर्द करनेवाला वातरूपी हाथी एरंडतेलरूप सिंहकी गन्ध सूंघतेही भागता है ॥१-२॥

इति श्रीदत्तरामचौबेकृतयोगचिन्तामणिमाथुरीमंजूषा-
भाषाटीकायां तैलाधिकारः षष्ठोऽध्यायः ॥ ६ ॥

## अथ मिश्राधिकारः--सप्तमोऽध्यायः ७.

तत्रादौ विषयनिरूपणम् ।

गुग्गुलः शंखकद्रावो गन्धकं च शिलाजतु ।
स्वर्णताम्रादिवंगादिसारमण्डूरमारणम् ॥ १ ॥
अभ्रकं तस्य सत्त्वं च पारदं तालकं तथा ।
नागताम्रं च माक्षीकं मनःशिलादिशोधनम् ॥ २ ॥

Aho ! Shrutgyanam

रसास्तथाऽऽसवारिष्टलेपाश्च मल्हमागुदम् ।
रक्तस्रावं च नस्यं च विरेको वमनं तथा ॥ ४ ॥
स्वेदबन्धेरणोद्धूलरोष्टगंडूषधूपवत् ।
तक्रपानकटीरोहा हिमा घामाश्च मुद्गकैः (?) ॥ ४ ॥
केचित्साधारणा योगाः केचित्कायचिकित्सकाः ।
वन्ध्यौषधं तथा कर्मविपाकं किंचिदुच्यते ॥ ५ ॥
ज्वरादिरोगसंख्या च नाडीमूत्रपरीक्षणम् ।
नेत्रस्यरसनाज्ञानं परीक्षा मात्रया सह ॥ ६ ॥
राजप्रशस्तिरध्याये सप्तमे परिकीर्त्तिता ॥ ७ ॥

इसमें इतनी चीजें कहेंगे-योगराजगूगल आदि १ शंखद्रावादि २, गन्धकशोधन ३, शिलाजीतशोधन ४, सुवर्ण ५, तांबा ६ वंगादिमारण ७, मण्डूरमारण ८, अभ्रक, ९ अभ्रकसत्त्व १०, पारदशोधन तथा मारण ११, हरताल शोधन मारण १२, शीसा शोधन मारण १३, सोनारूपामक्खी शोधन मारण १४, मनासिल शोधन १५, रसक्रिया १६, आसव १७, अरिष्ट १८, लेप १९, मलहम २०, रुधिरस्राव २१, नस्य २२, विरेचन २३, वमन २४, स्वेदक्रिया २५, बन्धन २६, उद्धूलन २७, रोटी बांधना २८, कुल्ला करना २९, धूप देना ३०, तक्रपान ३१, कटिरोह ३२, हिम ३३, घाम ३४, मधुरकज्वर लक्षण ३५, कुछ साधारण योग ३६, कायचिकित्सा ३७,बन्ध्या औषध३८, कर्मविपाक ३९, ज्वरादिरोगोंकी गिनती ४०, मूत्रपरीक्षा ४१, नेत्रज्ञान ४२, मुखज्ञान ४३, जिह्वाज्ञान ४४, मात्राकी परीक्षा ४५, ( ४१ से ४५ तक आदिमें ही कहा गया है ) राजप्रशंसा ४६, ग्रन्थकी तारीफ ४७ यह सातवें अध्यायमें कही हैं ॥ १-७ ॥

Aho ! Shrutgyanam

प्रथमं गुग्गुलु प्रकरणम् ।

तत्र वातव्याधौ योगराजगुग्गुलुः १-२ ।

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ।
भृष्टं हिंग्वजमोदा च सर्षपा जीरकद्वयम् ॥ १ ॥
रेणुकेन्द्रयवा पाठा विडङ्गं गजपिप्पली ।
कटुकाऽतिविषा भार्ङ्गी वचा मौर्वांति भागतः ॥ २ ॥
प्रत्येकं शाणमात्राणि द्रव्याणीमानि विंशतिः ।
द्रव्येभ्यः सकलेभ्यश्च त्रिफला द्विगुणा भवेत् ॥ ३ ॥
एभिश्चूर्णीकृतैः सर्वैः समो देयस्तु गुग्गुलुः ।
घृतेन पिण्डं संकुट्य धारयेद् घृतभाजने ॥ ४ ॥
गुटिकां शाणमात्रां तु कृत्वा ग्राह्या यथोचिता ।
गुग्गुलुर्योगराजोऽयं त्रिदोषघ्नो रसायनम् ॥ ५ ॥
मैथुनाहारपानानां त्यागो नैवात्र विद्यते ।
सर्वान् वातामयान्कुष्ठानर्शांसि ग्रहणीगदान् ॥ ६ ॥
प्रमेहं वातरक्तं च नाभिशूलं भगन्दरम् ।
उदावर्तं क्षयं गुल्ममपस्मारमुरोग्रहम् ॥ ७ ॥
मन्दाग्निं श्वासकासौ च नाशयेदरुचिं तथा ।
रेतोदोषहरः पुंसो रजोदोषहरः स्त्रियाः ॥ ८ ॥
पुंसामपत्यजनको वन्ध्यानां गर्भदस्तथा ।
रास्नादिक्काथसंयुक्तो विविधं हंति मारुतम् ॥ ९ ॥
काकोल्यादिशृतात्पित्तं कफमारग्वधादिना ।

Aho ! Shrutgyanam

दार्वीशृतेन मेहांश्च गोमूत्रेण च पाण्डुताम् ॥ १० ॥
मेदोवृद्धिं च मधुना कुष्ठं निंबशृतेन च।
छिन्नाक्वाथेन वातास्रं शोफं शूलं कफामयान् ॥ ११ ॥
पाटलाक्वाथसहितोविषं मूषकजं जयेत्।
त्रिफलाक्वाथसहितो नेत्रार्तिं हन्ति दारुणाम्।
पुनर्नवादिक्वाथेन हन्यात्सर्वोदराणिच ॥ १२ ॥

१–पीपल, पीपलामूल, चव्य, चीता, सोंठ, भूनी हींग, अजमोदा, सरसों, दोनों जीरे, सम्भालू, इन्द्रायण, पाढ, वायविडंग, गजपीपल, कुटकी, अतीस, भारंगी, वच, मरोडफली इन २० दवाइयोंकी जुदी २ मात्रा एक एक टंक और इन सबसे दूना त्रिफला इन सबका चूर्ण कर सबके बराबर शुद्ध गूगल डाले और घीमें सानकर सबकी गोली बनाकर चिकने बर्तनमें रख देवे, २ टंकके प्रमाण गोली सेवन करे, यह योगराजगूगल संपूर्ण वातरोगोंको तथा कोढ, अर्श, संग्रहणी, प्रमेह, वातरक्त, नाभिशूल, भगंदर, उदावर्त, क्षय, गुल्म, मृगी, उरग्रह, मंदाग्नि, श्वास, खांसी, अरुचि, वीर्यगत दोष और स्त्रियोंका प्रदरको दूर करे, पुरुषोंके सन्तान उत्पत्ति करे, सर्व त्रिदोषोंका नाश करे, और रसायन है मैथुन, आहार, पानका कुछ परहेज नहीं है, वन्ध्या पुत्रवती होय और रास्नाके काढेके साथ लेवे तो बहुत प्रकारके वातरोग नाश होवें, कंकोलके काढेके साथ लेवे तौ पित्त दूर होवे, अमलतासके काढेके साथ लेय तौ कफ नाश होवे, दारुहलदीके काढेके साथ लेनेसे प्रमेह दूर होय, गोमूत्रसे लेय तौ पांडुरोग जाय, शहदके साथ लेय तो मेदरोग दूर होय, नींबकी छालके काढेके साथ लेय तौ १८ प्रकारका कोढ नाश होय, गिलोयके काढेके साथ लेय तौ आमवात, सूजन, शूल, कफ दूर होवे, पाढरीके क्वाथके साथ लेनेसे उदरविष जाय, त्रिफलके काढेके साथ लेनेसे नेत्रदरद जावे और सोंठके साथ लेनेसे संपूर्ण उदररोग नाश होवें ॥ १–१२ ॥

Aho ! Shrutgyanam

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ।
पाठाविडंगेन्द्रयवाहिंगुभार्गीवचान्वितैः ॥ १३ ॥
सर्षपातिविषाजाजीजीवकारेणुकान्वितैः ।
गजकृष्णाऽजमोदा च मूर्वा कटुकमिश्रितम् ॥१४ ॥
समभागान्वितैरेतैस्त्रिफला द्विगुणा भवेत् ।
त्रिफलासहितैरेतैः समभागस्तु गुग्गुलुः ॥ १५ ॥
गुग्गुलस्य समं क्षीरं क्षीरादर्द्धं च सर्पिषः ।
सर्पिःषोडशगोमूत्रं साधितं गुग्गुलीसह ॥ १६ ॥
त्रिफलासममण्डूरं लोहं चैव चतुर्गुणम् ।
मधुना परिप्लुतं चैव भेषजं तत्प्रकारयेत् ॥ १७ ॥
योगराज इति ख्यातो भक्षयेत्प्रातरुत्थितः ।
अर्शांसि वातगुल्मं च पाण्डुरोगमरोचकम् ॥१८॥
नाभिशूलमुदावर्तं प्रमेहान्वातशोणितम् ।
भगन्दरं क्षयं कुष्ठं हृद्रोगं ग्रहणीगदम् ॥ १९ ॥
महान्तमग्निसादं च श्वासं कासं तथैव च ।
रेतोदोषाश्च ये पुंसां योनिदोषाश्च योषिताम् ॥२०॥
निहंत्युदायुधान्सर्वान् दुर्वारान्नात्र संशयः ।
अस्मिन्न परिहारस्तु पानभोजनमैथुने ॥ २१ ॥

२-पीपल, पीपलामूल, चव्य, चीता, सोंठ, पाढ, वायविडंग, इंद्रजौ, भुनी हींग, भारंगी, वच, सरसों, अतीस, जावित्री दोनों जीरे, सँभालू, गजपीपल, अजमोद, मरोडफली, कुटकी इनकी समान मात्रा लेवे और सबसे दूना त्रिफला और सबके बराबर शुद्ध गूगल गूगलके

Aho ! Shrutgyanam

बराबर गौका दूध, दूधसे आधा घी और घीसे सोलह गुणा गोमूत्र इन सबको मिलाकर पकाय शहद डाले, त्रिफलाके बराबर मंडूर उससे दोगुणा लोहसार, मंडूर-सार डालकर काममें लावे । इस योगराज-गूगलको प्रातःकाल सेवन करनेसे अर्श, वायुगोला, पांडुरोग, अरुचि, नाभिशूल, उदावर्त्त, प्रमेह, वातरक्त, भगंदर, क्षय, कोढ, हृदयरोग, ग्रहणी, श्वास, और खांसीको दूर करे । अग्निका दीपन करे, वीर्यको बढावे, स्त्रियोंके योनिदोषोंको दूर करे । इसपर खाना पीना कुछभी वर्जित नहीं है ॥ १३-२१ ॥

किशोरगुग्गुलुः ।

त्रिफलायास्त्रयः प्रस्थाः प्रस्थैकममृता भवेत् ।
संक्षिप्य लोहपात्रेषु सार्द्धद्रोणांबुना पचेत् ॥ १ ॥
जलमर्द्धशृतं ज्ञात्वागृह्णीयाद्वस्त्रगालितम् ।
तत्र क्वाथे क्षिपेच्छुद्धं गुग्गुलुं प्रस्थसम्मितम् ॥ २ ॥
पुनः प्रदेयं तत्पात्रे दर्व्या संचालयेन्मुहुः ।
सान्द्रीभूतं च तज्ज्ञात्वा गुडपाकसमाकृतिः ॥ ३ ॥
चूर्णीकृत्य ततस्तत्र द्रव्याणीमानि निक्षिपेत् ।
पथ्या द्विपलिका ज्ञेया गुडूची पलकोन्मिता ॥ ४ ॥
षडक्षं त्र्यूषणं प्रोक्तं विडंगानि पलार्द्धकम् ।
कर्षं कर्षं त्रिवृद्दन्त्यौ पीडितं स्निग्धभाजने ॥ ५ ॥
गुटिकां शाणिकां कृत्वा युंज्याद्दोषाद्यपेक्षया ।
अनुपाने भिषग् दद्यात्कोष्णं नीरं पयोऽथवा ॥ ६ ॥
मञ्जिष्ठादिशृतेनापि युक्तं युक्तिमता परम् ।
जयेत्सर्वाणि कुष्ठानि वातरक्तं त्रिदोषजम् ॥ ७ ॥

Aho ! Shrutgyanam

सर्वव्रणानि गुल्मांश्च प्रमेहपिडिकास्तथा ।
प्रमेहोदरमन्दाग्निकासश्वयथुपाण्डुताः ॥ ८ ॥
हन्ति सर्वामयानित्थं सुखयुक्तो रसायनः ।
किशोरकाभिधानोऽयं कुर्यात्कैशोरकं बलम् ॥ ९ ॥
अम्लं तीक्ष्णमजीर्णं च व्यवायं श्रममातपम् ।
मद्यं रोषं त्यजेत्सम्यग्गुणार्थी पुरुसेवकः ॥ १० ॥

त्रिफला ४८ पल, गिलोय १० प्रस्थ इनको २४ सेर पानीमें डालकर लोहेके पात्रमें पकावे, जब आधा पानी शेष रहे तब उतारकर कपडेमें छानलेवे, फिर गुग्गुल १ प्रस्थ डालकर औटावे, कलछीसे हिलाता जाय, जब गुडकी चासनीके समान गाढा होजाय तब उतार ठंढा कर निम्नलिखित औषधियोंको डाले—हरड २ पल, गिलोय २ पल, सोंठ, मिरच, पीपल २४ टंक, वायविडंग ८ टंक, निसोथ ४ टंक, जमालगोटेकी जड २ टंक। फिर सबको मिलाकर एक एक टंकके प्रमाण गोलियां बनावे और चिकने बर्तनमें रख छोडे, दोष और बलाबल देखकर वैद्य गरम पानीके साथ अनुपान देवे अथवा दूध वा मंजीठके काढेसे देवे तो सम्पूर्ण रोग, वातरक्त, त्रिदोष, सब प्रकारके व्रण, गुल्म, प्रमेह, फुन्सी गांठ, १८ प्रकारका कोढ उदर विकार, मन्दाग्नि, खाँसी, सूजन, पांडुरोग, आमवात इन रोगोंको नाश करे और यह किशोर गुग्गुल जवानकासा बलकरे। जो गुणकी इच्छा करे तो खट्टा, चरपरा, अजीर्ण, श्रम, धूप, मद्य, रोष इनको त्याग करे ॥ १-१० ॥

त्रिफलागुग्गुलुः ।

त्रिपलं त्रिफलाचूर्णं कृष्णाचूर्णपलोन्मितम् ।
गुग्गुलं पञ्चपलिकं कुट्टयेत्सर्वमेकतः ॥ १ ॥

Aho ! Shrutgyanam

ततस्तु गुटिकां कृत्वा प्रयुंज्याद्वह्न्यपेक्षया।
भगन्दरं गुल्मशोफमर्शांसि च विनाशयेत् ॥ २ ॥

त्रिफलाचूर्ण ३ पल, पीपल १ पल, गूगल ५ पल, इन सब को पीसकर गोली बनावे, यथायोग्य अग्नि बल देखकर गोली देवे. यह गूगल भगंन्दर, गुल्म, सूजन और अर्शको दूर करे ॥ १ ॥ २ ॥

कांचनारगुग्गुलुः।

कांचनारत्वचो ग्राह्याः पलानां दशकं बुधैः।
त्रिफला षट्पला कार्या त्रिकटु स्यात्पलत्रयम् ॥१॥
पलैकं वरुणः कार्यएलात्वक् पत्रकं तथा।
प्रत्येकं कर्षमात्रं स्यात्सर्वानेकत्र चूर्णयेत् ॥ २ ॥
यावत्सर्वमिदं चूर्णं तावन्मात्रस्तु गुग्गुलुः।
संकुटय सर्वमेकत्र पिण्डं कृत्वा च धारयेत् ॥ ३ ॥
गुटिकाः शाणिकाः कृत्वा प्रातर्ग्राह्यं यथोचितम्।
गण्डमालां जयंत्युग्रामपचीमर्बुदं तथा ॥ ४ ॥
ग्रन्थीन्व्रणानि गुल्मांश्च कुष्ठानि च भगन्दरम्।
प्रदेयश्चानुपानार्थं क्वाथो मुण्डीतिकाभवः।
क्वाथः खादिरसारस्य पथ्याक्वाथो यवोष्णकः ॥ ५ ॥

कचनारकी छाल १० पल, त्रिफला ६ पल, सोंठ, मिरच, पीपल ३ पल, बरना १ पल, इलायची, तज, तेजपात ४ टंक इन सबके बराबर गूगल डालकर गोली १ टंकके प्रमाण बनावे, प्रातःकाल बलाबल देखकर देवे तो गंडमाला, अपची, अर्बुद, गांठ, व्रण, १८ प्रकारका कोढ और भगंदरको हरे. अनुपान मुंडीके काढेके साथ तथा खैरसारके काढेके

Aho ! Shrutgyanam

साथ देवे तथा हरडके काढेके साथ देवे वा गरम पानीसे देवे तो ऊपर लिखे रोग दूर होवें ॥ १-५ ॥

गोक्षुरादिगुग्गुलुः ।

अष्टाविंशतिसंख्यानि पलान्यानीय गोक्षुरान् ।
विपचेत्षड्गुणे नीरे क्वाथो ग्राह्योऽर्द्धशेषतः ॥ १ ॥
ततः पुनः पचेत्तत्र पुरमष्टपलं क्षिपेत् ।
गुडपाकसमाकारं ज्ञात्वा तं तत्र निक्षिपेत् ॥ २ ॥
त्रिकटुत्रिफलामुस्तं चूर्णं तु पलसप्तकम् ।
तत पिण्डीकृतस्तस्य गुटिकामपि योजयेत् ॥ ३ ॥
हन्यात्प्रमेहं कृच्छ्रं च प्रदरं मूत्रघातकम् ।
वातास्रं वातरक्तं च शुक्रदोषं तथाऽश्मरीम् ॥ ४ ॥

गोखरू २८ पलको छःगुणे पानीमें औटावे, जब आधा पानी रह जाय तब उतार लेवे, छानकर ८ पल गूगल डाले, जब गाढा होजाय तब उतारलेवे और ठडा होजानेपर इन औषधियोंको डाले-सोंठ, मिर्च, पीपल, त्रिफला, मोथा ७ पलका चूर्ण कर डाले, सबको मिलाकर एक टंक प्रमाण गोली बनावे. यह औषधि प्रमेह, मूत्रकृच्छ्र, मूत्राघात, प्रदर, वातरक्त, वीर्यदोष और पथरी आदिको दूर करती है ॥ १-४ ॥

सिंहनादगुग्गुलुः ।

फलत्रिकोशीरविडंगदन्तीपुनर्नवाम्भोधरवह्निवि-
श्वा । रास्नामृताभीरुसुराह्वदार्वीसग्रंथिकैलेभक-
णापलांशैः ॥ १ ॥ द्रोणांभसो गुग्गुलतुल्यभागै-
रर्द्धं श्रृतैः सूक्ष्मपटान्तपूतैः । भूयः श्रृतैरंगुलि-
धेयरूपो लेहः सुशीतो भुवि भाजनस्थः ॥ २ ॥

Aho ! Shrutgyanam

सुचूर्णितैस्त्र्यूषणजन्तुहंत्रीछिन्नोद्भवादार्व्यभयात्रि-
जातैः । त्रिवृत्समैरक्षमितं विचूर्णं निधाय गुप्तं
यवधान्यपूते ॥ ३ ॥ मासस्थितं प्राश्य शुभेऽह्नि
शुद्धः प्रयात्यरोगं रुजितो मनुष्यः । शोफोदर-
प्लीहरुजोविकारनाभिव्रणार्शोग्रहणीप्रदोषैः ॥ ४ ॥
सवातरक्तैः सकलैश्च कुष्ठैर्विमुच्यते पाण्डुगदैश्च
घोरैः । प्रभंजनो रोगमहातरूणां विवर्द्धनो रोग-
बलायुषां च ॥ ५ ॥ मासाध्यमस्तीति विकार-
जातं ख्यातस्तु नाम्ना भुवि सिंहनादः ॥ ६ ॥

त्रिफला, खस, वायविडंग, सोंठ, मोथा, दंती, चीता, रास्ना, गिलोय, कटसेना, देवदारु, हलदी, पीपलामूल, इलायची, गजपीपल, सोलह सेर पानी सब औषधियोंके बराबर गूगल इनको मिलाके औटावे. जब आधा पानी रहजाय तब छान लेवे. फिर मंदाग्निसे औटाकर जब गाढा होजाय तब उतारलेवे और इन औषधियोंको डाले-सोंठ, मिर्च, पीपल, वायविडंग, गिलोय, दारुहलदी, हरड, तज, तेजपात, इलायची, निसोथ इनकी समान मात्रा १४ टंक चूर्ण कर-डाले, फिर चिकने बासनमें भरकर रख देवे, यव तथा धानमें एक महीना राखै, फिर अच्छा दिन देखकर सेवन करे तो सूजन, उदररोग, प्लीहा, दरद, नाभीके व्रण, बवासीर, संग्रहणी, वातरक्त, संपूर्ण कोढ, पांडुरोग ये रोग नाश होवें । यह गूगल रोगरूपी वृक्षोंका छेदन करनेवाला है ॥ १-६ ॥

प्रमेहे मूत्रकृच्छ्रे च चन्द्रप्रभागुग्गुलुः ।

बिल्वं व्योषफलत्रिकं त्रिलवणं द्विक्षारचव्यानि
च श्यामापिप्पलिमूलमुस्तककणामाध्वीकधा-

Aho ! Shrutgyanam

न्यत्वचः । षड्ग्रंथामरदारुवारणकणाभूनिम्बदन्तीनिशापत्रैलातिविषाः पिचुप्रमितयो लोहस्य कर्षाष्टकम् ॥ १ ॥ त्वक्क्षीरं पलिकां परं दशजलान्यष्टौ शिलाजिन्मतो मत्स्यंडीकुडवोन्मितेति गुटिकां संयोज्य कुर्याद्भिषक् । तत्रैकं प्रतिवासरं सहविषाक्षौद्रेण लिह्यादिमां तप्तं मस्तुपयोरसं मधुघृतं तावत्पिबेन्मात्रया ॥ २ ॥ अर्शांसि प्रदरं ज्वरं सुविषमं नाडीव्रणानश्मरीं कृच्छ्रं विद्रधिमग्निमांद्यमुदरं पाण्ड्वामयं कामलाम् । यक्ष्माणं सभगन्दरं सपिडिकागुल्मप्रमेहारुचीरेतोदोषमुरःक्षतं कफमरुत्पित्तार्तिमुग्रां जयेत् ॥ ३ ॥ वृद्धं संजनयेद्युवानमसमौजस्कं बलं वर्द्धयेदेतस्यां न निषिद्धमंगमसकृन्नेच्छागमं मैथुनम् । विख्याता गुटिकेयमंचिततगा चंद्रप्रभानामतश्चन्द्रानन्दकरी करोति रुचिरां चन्द्रेण तुल्यां तनुम् ॥ ४ ॥

बेल, सोंठ, मिर्च, पीपल, त्रिफला, सैंधानोंन, कालानोंन, कचनोन, सज्जीखार, जवाखार, चव्य, निसोथ, पीपलामूल, मोथा चिरायता, जमालगोटेकी जड, हलदी, तेजपात, इलायची, सोनामक्खी, धनियां, तज, अजमोद, देवदारु, गजपीपल, अतीस, नींब चार टंक, लोहसार ३२ टंक, वंशलोचन १ पल, गूगल, १६० टंक, शिलाजीत ८ पल, मिश्री खांड ६४ टंक इन सबको इकट्ठा कर १ टंक प्रमाण गोली बनाकर । घृतके संग नित्य सेवन करे । मट्ठा, दूध, शहद

Aho ! Shrutgyanam

ऊपरसे पीवे, यथा बल देख लेवे। बवासीर, प्रदर विषमज्वर, नसोंके फोडे, फुन्सी, पथरी, मूत्रकृच्छ्र, मन्दाग्निपेटका दर्द, पांडुरोग, कमलवायु, भगन्दर, गांठ, बीस प्रकारका प्रमेह, अरुचि, वीर्यदोष, उरःक्षत, कफ, वात, पित्त इनकी पीडाको जीते. बुड्ढेको जवान करे, जब औषधिको सेवन करे तब मैथुनको न छोडदेवे। यह गूगल सम्पूर्ण रोगोंको दूर करता है ॥ १-४ ॥

शंखद्राव ।

स्फटिका च यवक्षारं सोरोऽथ नवसादरम् ।
समभागमितैरेभिः शंखद्रावो रसो मतः ॥ १ ॥
काचकूपीद्वयं नीत्वा दत्त्वा कर्पटमृत्तिकाम् ।
एकस्य विवरं कृत्वा भृत्वा चान्याः सदोषधीः ॥ २ ॥
गजकुम्भास्ययंत्रेण चुल्ल्यां च खर्परोपरि ।
धृत्वा दत्त्वा च मन्दाग्निं तद्रसं काचभाजने ॥ ३ ॥
गृहीत्वा स्थापयेत्सम्यग्ग्रहणीयं शुभे दिने ।
शंखौ द्रवति तन्मध्ये शंखद्रावस्ततो मतः ॥ ४ ॥
कुम्भकेन प्रमुंचेत जिह्वाग्रे तालुकोपरि ।
दन्ताः पतन्ति लग्नेऽस्मिञ्छेषरोगस्य का कथा ॥५॥
अखिलोदररोगाणां निहन्ता गुल्मकस्य च ।
कालिंजं प्लीहकं हन्ति हृद्रोगं ग्रहणीं यकृत् ॥ ६ ॥
ऊर्ध्वं कासं कफं श्वासं ह्यामवातं विनाशयेत् ।
कांतिं नीरोगतां पुष्टिं जठराग्निं विवर्धयेत् ॥ ७ ॥

फिटकरी, यवक्षार, शोरा, नौसादर इन सबको बराबर लेकर काचकी दो शीशी ले कपरमिट्टी कर एकमे दवा भर

Aho ! Shrutgyanam

देवे, फिर गजकुंभकर चूल्हेपर चढा मन्दाग्नि देवे, जब उसका रस दूसरी शीशीमें आजाय तब लेकर अच्छी जगह रक्खे और अच्छा दिन देखकर सेवन करे। इसमें शंख तथा कौडी डालनेसे भस्म हो जाती है इसीसे इसको शंखद्राव कहते हैं। इसकी मात्रा रुईके फोहेमें लगाकर जिह्वापर लगा देवे और जो दांतोमें लग जायगा तो दांत गिरजावेंगे और सम्पूर्ण उदररोगोंको तथा गुल्मको नाश करै। प्लीहा, हृद्रोग, ग्रहणी, यकृत्, ऊर्ध्वश्वास, कफ, खांसी, आमवात इनको दूर करे, सुन्दर काया करे, पुष्टी करे, पेटकी अग्निको, बढावे ॥ १-७ ॥

गन्धकविधिः।

लोहपात्रे विनिक्षिप्य घृतमग्नौ प्रतापयेत्।
तप्ते घृते तत्समानं क्षिप्त्वा गन्धकजं रसम् ॥ १ ॥
गलितं गन्धकं ज्ञात्वा दुग्धमध्ये विनिक्षिपेत्।
एवं गन्धकशुद्धिः स्यात सर्वकार्येषु योजयेत् ॥ २ ॥

लोहेके पात्रमें घृत डालकर तडकावे, जब खूब गरम होजाय तब गन्धक पीसकर डालदेय, जब गंधक गलजाय तब घीसहित दूधमें डालदेय. यह शुद्ध गंधक सब काममें लावे ॥ १-२ ॥

दुग्धे घृते निम्बरसे भृङ्गराजरसेऽथवा।
गन्धकं शोधयेत्प्राज्ञो दोलायन्त्रेण वाससा ॥ ३ ॥
सदुग्धभाण्डेऽपि पटस्थितोऽयं शुद्धो भवेत्कूर्म-
पुटेन गन्धः। सदुग्धभाण्डस्य मुखे सुवस्त्रं बद्धं
क्षिपेद्गन्धकसूक्ष्मखण्डान् ॥ ४ ॥ विमुद्रयित्वा


Aho ! Shrutgyanam

समितादिना तन्मन्दाग्निना यामयुगं पचेच्च ॥ ५ ॥
शोधितं गन्धकं यावत्तावती त्रिफला भवेत् ।
द्वयोस्तुल्या सिता देया कर्षार्द्धं खादयेत सुधी॥६॥
कण्डूविचार्चिकादद्रूसिध्ममण्डलकुष्ठनुत् । अम्ल-
क्षारं हिङ्गु तैलमग्नितापं च वर्जयेत् ॥ ७ ॥

दूध, घी, नींबका रस, भांगरेका रस, प्रत्येकमें गन्धकको शोधे, एक हांडीमें गन्धक कपडेकी पोटली बनाय दोलायन्त्रमें मन्दाग्निसे पकावे, फिर दूध हांडीमें भरकर ऊपर कपडा बांधकर गन्धक रख मन्दाग्निसे देय, कूर्मपुटसे इस प्रकार गन्धक शुद्ध होवे, फिर गन्धक सूक्ष्म पीसकर, कपडेमें बांधकर सूक्ष्म वस्त्रसे मुद्रा कर चार प्रहर यन्त्रमें राखे, फिर दो प्रहर मन्दाग्नि देवे, जब शुद्ध हो जाय तब त्रिफलेका चूर्ण, गन्धक त्रिफलाकी बराबर मिश्री २ टंक मिलाकर खाय तो खाज, विचार्चिका, दाद, सिध्म, मण्डल और कोढ दूर होवें । परहेज खट्टा, खारी, हींग, तेल, अग्निका तापना बन्द करे ॥ ३–७ ॥

शिलाजतुशोधनप्रकारः ।

त्रीन्वारान्प्रथमं शिलाजतु जले भाव्यं भवेत्रैफले
निःक्काथे दशमूलजे च तदनु च्छिन्नोद्भवाया रसैः ।
वात्यालं क्वथने पटोलसलिले यष्टीकषाये पुन-
र्गोमूत्रे च पयस्यथापि च गवामेषां कषाये ततः॥१॥

तीन वार पहिले शिलाजीतको त्रिफलेके काढेकी भावना देवे. फिर दशमूलके काढेकी भावना देवे. फिर गिलोयके काढेकी भावना देवे. फिर पटोलके काढेकी भावना देवे. फिर मुलहठी, गोमूत्र, दूध इनकी भावना देवे तो शुद्ध होय ॥ १ ॥

Aho ! Shrutgyanam

शिलाजतुसत्त्वम् ।

शिलाजतु समानीय ग्रीष्मतप्तशिलाजतु ।
गोदुग्धैस्त्रिफलाक्काथैर्भृंगद्रावैश्च मर्दयेत् ।
आतपे दिनमेकैकं तत्सिद्धं शुद्धतां व्रजेत् ॥ १ ॥

शिलाजीतको गरमीके दिनोंमें [गौके दूधसे, त्रिफलेके काढेसे, भांगरेके रससे मर्दन करे, फिर एक एक दिन पुट देता जाय और धूपमें सुखाता जाय तो शिलाजीत शुद्ध होवे ॥ १ ॥

मुख्यं क्षिलाजतुशिलासूक्ष्मखण्डं प्रकल्पयेत् ।
निक्षिप्यात्युष्णपानीये यामैकं स्थापयेत्सुधीः ॥ १ ॥
मर्दयित्वा ततो वारि गृह्णीयाद्वस्त्रगालितम् ।
स्थापयित्वा च मृत्पात्रे धारयेदातपे पुनः ॥ २ ॥
आलोड्य च पुनस्तस्मादुपरिस्थं घनं नयेत् ।
अधः स्थितं च यच्छेषं तस्मिन्नीरं विनिक्षिपेत् ॥ ३ ॥
विमर्द्य धारयेद्धर्मे पूर्ववच्चैव तं नयेत् ।
एवं पुनः पुनर्नीत्वा द्विमासाभ्यां शिलाजतु ॥ ४ ॥
भूयात्कार्यक्षमं वह्नौ क्षिप्तं लिङ्गोपमं भवेत् ।
निर्धूमं च ततः शुद्धं सर्वकर्मसु योजयेत् ॥ ५ ॥
एलापिप्पलिसंयुक्तं माषमात्रं तु भक्षयेत् ।
मूत्रकृच्छ्रं मूत्ररोधं हन्ति मेहं तथा क्षयम् ॥ ६ ॥

शिलाजीतके छोटे २ टुकडे कर एक प्रहर पानीमें भिगोवे, फिर मलकर कपडेमें छानलेवे और मिट्टीके पात्रमें डालकर धूपमें रख देवे, फिर मथे जो ऊपर मलाई आवे उसे लेताजाय जो पानी नीचे शेष

Aho ! Shrutgyanam

रहे उसे फेंक देवे, ऐसे ही मलताजाय और धूपमें रख २ कर ऊपरकी मलाई लेताजाय और नीचेको फेंकता जाय, इसी तरह दो महीने शिलाजीतको शोधन करे, और अग्निपर रक्खे तो लंबासा आकार होजाय और धुआं न देवे तो जाने शुद्ध होगया । इस शिलाजीतको सब कामोंमें वर्ते । इलायची और पीपलके साथ एक महीने खाय तो मूत्रकृच्छ्र मूत्रका रुकना, क्षय इनको दूर करे ॥ १--६ ॥

### स्वर्णादिधातुमारणम् ।

तैले तक्रे गवां मूत्रे कांजिके च कुलत्थके ।
तप्ततप्तानि सिंचेत द्रावे द्रावे तु सप्तधा ॥ १ ॥
सुवर्णताරताम्राणां पत्राण्यग्नौ प्रतापयेत् ।
प्रसिंचेत्तप्ततप्तानि तैले तक्रे च संस्थिते ॥ २ ॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा ।
एवं स्वर्णादिलोहानां विशुद्धिः संप्रजायते ॥ ३ ॥

तेल, मट्ठा, गोमूत्र, कांजी, कुलथी इन प्रत्येकमें धातुको तपा २ कर सात सात बार बुझावे, सोना, चांदी, तांबा इनके पत्र कर तपा तपा कर तेल, मट्ठा, कांजीमें बुझावे, और गोमूत्र, कुलथीके काढेमें तीन तीन बार बुझावे इस प्रकार लोहे, सोने आदिकी शुद्धि होती है ॥ १–३ ॥

### मृगांकविधिः १–३ ।

स्वर्णस्य द्विगुणं सूतमम्लेन सह मर्दयेत् ।
तद्गोलकसमं गन्धं निदध्यादधरोत्तरम् ॥ १ ॥
गोकलं च ततो रुद्ध्वा शरावदृढसंपुटे ।

Aho ! Shrutgyanam

त्रिंशद्वनोपलैर्दद्यात्पुटेनैव चतुर्दश ॥ २ ॥
निरुत्थं जायते भस्म गंधो देयः पुनः पुनः ॥ ३ ॥

१–सोनेसे दुगुना पारा नींबूके रसमें घोटे, फिर गोली बनावे और उस गोलीके बराबर ऊपर नीचे गन्धकका संपुट देवे. फिर दो शंखोंमें रखकर सात कपरामिट्टी और ३० आरने उपलोंकी अग्नि देवे. जब भले प्रकार निर्धूम होजावे इसी तरह चौदह पुट देय और बार २ गन्धक डाले तो निरुत्थ भस्म होवे ॥ १–३ ॥

भूर्जवत्सूक्ष्मपत्राणि हेम्नः सूक्ष्माणि कारयेत् ।
तुल्यानि तानि सूतेन खल्वे क्षिप्त्वा विमर्दयेत् ॥ १ ॥
कांचनाररसेनैव ज्वालामुख्या रसेन वा ।
लांङ्गल्या वा रसैस्तावद्यावद्द्रवति पिष्टकम् ॥ २ ॥
तथा हेम्नश्चतुर्थांशं टंकणं तत्र निक्षिपेत् ।
पिष्टमौक्तिकचूर्णं च स्वर्णाद्द्विगुणितं क्षिपेत् ॥ ३ ॥
तेषु सर्वसमं गन्धं क्षिप्त्वा चैकत्र मर्दयेत् ।
तेषां कृत्वा ततो गोलं वासोभिः परिवेष्टयेत् ॥ ४ ॥
पश्चान्मृदा वेष्टयित्वा शोषयित्वा च साधयेत् ।
शरावसंपुटस्यांते तत्र मुद्रांप्रयोजयेत् ॥ ५ ॥
लवणापूरिते भांण्डे धारयेत्तं च संपुटम् ।
मुद्रां दत्वा शोषयित्वा बहुभिर्गोमयैः पचेत् ॥ ६ ॥
ततः शीते समाहृत्य गन्धं सूतसमं क्षिपेत्
धृत्वा च पूर्ववत्खल्वे पचेद्गजपुटेन च ॥ ७ ॥
स्वांगशीतं ततो नीत्वा गुंजायुग्मं प्रयोजयेत् ।

Aho ! Shrutgyanam

अष्टाभिर्मरिचैर्युक्ता कृष्णात्रययुता तथा ॥ ८ ॥
विलोक्य देया दोषादीनेकैका रसरक्तिका ।
सर्पिषा मधुना चापि देया पथ्यं च भोजयेत् ॥९॥
मृगांकोऽयं रसो हन्यात्कृशत्वं बलहीनताम् ।
श्लेष्माणं ग्रहणीं कासं श्वासं क्षयमरोचकम् ॥१०॥
अग्निं च कुरुते दीप्तं कफवातान्नियच्छति ॥ ११ ॥

२-सुवर्णका भोजपत्रके समान सूक्ष्म पत्र करे और उतनाही पारा डाल कर खरल करे, फिर कचनारका रस, ज्वालामुखीका रस, कलियारीका रस इसमें, जबतक पिष्टके समान न हो तबतक मर्दन करे, फिर सोनेसे चौथाई सुहागा डाले, फिर सोनेसे दुगुना मोतियोंका चूर्ण और सबके बराबर गन्धक डालकर मर्दन करे. फिर सबका गोला बनावे फिर उसपर कपडा लपेट पीछे कपरमिट्टी कर सुखा लेवे, जब सूखजाय तब दो शंखोंमें रखकर कपरमिट्टी कर सुखा लेवे, फिर एक हांडीमें ऊपर नीचे नोनभर बीचमें रख संपुट कपरमिट्टी कर सुखा लेवे, फिर खूब आरने ऊपलोंकी आंच देवे, जब ठंढा होजाय तब निकालकर गन्धक, पारा बराबर डालकर पूर्वोक्त रीतिसे मर्दन करे, फिर गजपुटकी आंच देवे. जब खूब ठंढा होजाय तब निकाल लेवे । आठ मिरचके योगमें तीन पीपलसयुंक्त दो रत्तीके प्रमाण देवे । जैसा दोष देखे वैसा दे, वा एक रत्ती दे, बलाबल देखकर घी, शहद पथ्यमें देवे. यह मृगांकरस कृशता, बलहानि, श्लेष्म, ग्रहणी, खांसी, श्वास, क्षय और अरुचिको दूर करे, अग्निको दीप्त करे और कफ वातका नाश करे ॥ १-११ ॥

शुद्धं सूतं स्वर्णपत्रं जम्बीरे मर्दयेत्समम् ।
तयोर्द्विगुणिता मुक्तास्त्रिभिस्तुल्यं तु गन्धकम् ॥१॥

Aho ! Shrutgyanam

टंकणं गन्धकादर्धं सर्वं जम्बीरजैर्द्रवैः ।
मर्द्यं यामेन तद्गोलं वस्त्रे बद्ध्वा विपाचयेत् ॥ २ ॥
दोलायन्त्रेण पाताले यामादुद्धृत्य शोषयेत् ।
ततो मृन्मयभाण्डांतर्लवणं चांगुलीद्वयम् ॥ ३ ॥
क्षिप्त्वा तद्विक्षिपेत्पूर्वगोलक वस्त्रवेष्टितम् ।
लवणैः पूरयेद्भाण्डं मुद्रयित्वा दिनं पचेत् ॥ ४ ॥
चुल्ल्यां क्रमाग्निना सिद्धो मृगांकोऽयं महारसः ।
राजरोगनिवृत्त्यर्थं देयो गुंजामितो घृते ।
दशभिर्मरिचैः सार्द्धं पिप्पल्या मधुनाऽपि वा ॥ ५ ॥

३-शुद्ध पारा और सुवर्णपत्र बराबर ले जम्बीरीके रसमें मर्दन करे, इनमें दूने मोती लेवे और सबके बराबर गन्धक, और गंधकसे आधा सुगाहा ले इन सबको जम्बीरीके रसमें एक प्रहर घोटकर गोला बनावे फिर ऊपर कपडा लपेटकर दोलायंत्र या पातालयंत्रमें पकावे, कांजीमें पकावे, फिर एक प्रहरके बाद सुखावे, फिर मिट्टीके बर्तनमें दो अंगुल नोन नीचे भरकर कपरमिट्टी कर एक दिन चूल्हेपर क्रम ( मन्द, मध्य, तीक्ष्ण ) से अग्नि देवे तो यह मृगांकमहारस सिद्ध होवे । यह यक्ष्मा रोगका नाश करे, एक रत्ती घीके साथ देय अथवा दस मिर्च अथवा पीपल शहदके साथ देवे ॥ १-५ ॥

राजमृगांकरस ।

भस्मसूतत्रयो भागा भागैकं भस्म हेमकम् ।
मृतताम्रस्य भागैकं शिलागन्धकतालकम् ॥ १ ॥
प्रतिभागद्वयं शुद्धमेकीकृत्य विचूर्णयेत् ।
वराटं पूरयेत्तेन च्छागीक्षीरेण टंकणम् ॥ २ ॥

Aho ! Shrutgyanam

क्षिप्त्वा तेन मुखं रुद्ध्वा मृद्भाण्डे तन्निरोधयेत् ।
शुष्कं गजपुटे पक्त्वा चूर्णयेत्स्वांगशीतलम् ॥ ३ ॥
रसो राजमृगांकोऽयं चतुर्गुंजः क्षयापहः ।
दशपिप्पलिकाक्षौद्रे एकोनत्रिंशदूषणैः ॥ ४ ॥

पारेकी भस्म तीन भाग, सोनेका भस्म एक भाग, तांबेकी भस्म एक भाग, शिलाजीत, गन्धक, शुद्ध हरिताल ये सब दो दो भाग सबका मिला चूर्ण कर कौडियोंमें भरदेवे, फिर बकरीके दूध और सुहागेसे इनका मुह बन्द कर देवे फिर मिट्टीके पात्रमें भरकर कपर- मिट्टी कर सुखा लेवे, फिर गजपुटकी आंच देवे, जब शीतल होजाय तब निकाले. यह राजमृगांकरस चार रत्ती बलाबल देखकर देवे तो क्षयरोगका नाश करे । पीपल १०, शहद, मिरच २९ के साथ ले । यह क्षयादि रोगोंको नाश करे ॥ १-४ ॥

ताम्रमारणविधिः ।

सूक्ष्माणि ताम्रपत्राणि कृत्वा संस्वेदयेद् बुधः ।
वासरत्रयमम्लेन ततः खल्वे विनिक्षिपेत् ॥ १ ॥
पादांशं सूतकं दत्त्वा याममम्लेन मर्दयेत् ।
तत उद्धृत्य पत्राणि लेपयेद्द्विगुणेन च ॥ २ ॥
गन्धकेनाम्लपिष्टेन तस्य कुर्याच्च गोलकम् ।
धृत्वा तद्गोलकं भाण्डे शरावेण च रोधयेत् ॥ ३ ॥
वालुकाभिः प्रपूर्याथ विभूतिलवणांबुभिः ।
दत्त्वा भाण्डं मुखे मुद्रां ततश्चुल्ल्यां विपाचयेत्॥४॥
क्रमवृद्धाग्निना सम्यग्यावद्यामचतुष्टयम् ।
स्वांगशीतलमुद्धृत्य मृतताम्रं शुभं भवेत् ॥ ५ ॥

Aho ! Shrutgyanam

तांबेके सूक्ष्म पत्र कर शोध लेवे, फिर छाछमें तीन दिन रख मर्दनकरे, फिर चौथाई पारा डालकर इमलीके रसमें एक प्रहर मर्दन करे, फिर तांबेके पत्र निकालकर और दुगुनी गन्धक नींबूके रसमें घोटकर तांबेके पत्रों-पर लेप कर गोली बनावे. फिर दो सकोरोंको बीचमें गोली रखदेवे, कपरोटीकर एक हांडीमें बालू वा नोन भर बीचमें सरवा रखदेवे, हांडीको कपरमिट्टी कर चूल्हेपर चढावे, अग्नि क्रमसे देवे, पहले मन्दाग्नि पीछे मध्यम तत्पश्चात् तीक्ष्णाग्नि देवे, चार प्रहर भले प्रकार अग्नि देवे जब ठंढा होजाय तब निकाल लेवे, यह तांबेश्वर रस है ॥ १-५ ॥

तस्य गुणा दोषाश्च ।

ऊर्ध्वश्वासं कफं कासं हृद्रोगं पांडुतां क्षयम् ।
जयेत्प्रमेहकुष्ठार्शः शोफशूलाग्निमन्दताः ॥ १ ॥
अशुद्धं वातमुत्क्लेदं मूर्च्छादोषं करोति च ।
अपक्कं कांतिधातुघ्नं भ्रमशूलोष्मकुष्ठनुत् ॥ २ ॥
न विषं विषमित्याहुस्ताम्रं तु विषमुच्यते ।
एको दोषो विषे ताम्रे चाष्टौ दोषाः प्रकीर्तिताः ॥ ३ ॥
भ्रमो मूर्च्छा विदाहश्च स्वेदः क्लेदस्तथा तमः ।
अरुचिश्चित्तसंतापस्ताम्रे दोषः प्रकीर्तिताः ॥ ४ ॥

ऊर्ध्वश्वास, कफ, खांसी, हृद्रोग, पांडुरोग, क्षय, प्रमेह, कोढ, अर्श, सुजन, शूल और मन्दाग्निको दूर करे और जो अशुद्ध रहजाय तो वात, उत्क्लेद, मूर्च्छा दोष करे, अपक्क हो तो धातुका नाश, भ्रम, शूल, गरमी, कोढ करे। विषहीको विष मत जानो, ताम्र, विषहै। विषमें एक दोष है, ताम्बेमें आठ दोष हैं-भ्रम, मूर्च्छा, दाह, स्वेद. क्लेद तम अरुचि पित्त संताप ये तांबेमें दोष हैं ॥ १-४ ॥

वङ्गमारणविधिः ।

मृत्पात्रे द्राविते वङ्गे चिञ्चाश्वत्थत्वचो रसः ।

Aho ! Shrutgyanam

क्षिप्त्वा क्षिप्त्वा चातुर्थांशमयोदर्व्या प्रचालयेत् ॥ १॥
ततो द्वियाममात्रेण वङ्गभस्म प्रजायते ।
प्रमेहदाहपाण्डुघ्नं पुष्टिकान्तिबलप्रदम् ॥ २ ॥

मिट्टीके ठीकरेमें रांगेको गलावे इमली, पीपलकी छालका चूर्ण चौथाई डालकर लोहेकी कलछीसे चलावे तो दो प्रहरमें रांगकी भस्म हो जावेगी । प्रमेह, दाह पांडुरोगको दूर करे और पुष्टि कान्ति बलकी देनेवाली है ॥ १ ॥ २ ॥

सीसकमारणविधिः ।

अश्वस्थचिंचात्वग्भस्म भस्मतुल्या मनःशिला ।
जम्बीररसारनालैश्च पिष्ट्वा रुद्ध्वा पुटे पचेत् ॥ १ ॥
स्वांगशीतं पुनः पिष्ट्वा विंशत्यंशशिलात्मकैः ।
नागः सिंदूरवर्णाभो म्रियते सर्वकार्य कृत् ॥ २ ॥

पीपलकी छाल, इमलीकी छाल इनकी भस्म करलेवे आर शीशेकी बराबर मनशिल लेय जंभीरीके रसमें और कांजीके रसमें पीसकर शीशेके पत्रके ऊपर लेप करे और अग्नि देय जब ठंढा होजाय तब निकाल लेय, फिर बीस भाग मनसिल संपुट कर फूंके, जब सिन्दूरकासा रंग होजाय तब यह रस सब कार्योंको करै ॥ १ ॥ २ ॥

सारमारणविधिः ।

शुद्धं लोहभवं चूर्णं पातालगरुडीरसैः ।
गोमूत्रत्रिफलाक्काथैर्मर्दयित्वाऽग्निना पुटेत् ॥ १ ॥
अर्कदुग्धैः पुनः पिष्ट्वा पुटेद्यामचतुष्टयम् ।
पुनः कन्यारसैः पिष्ट्वा पचेद्गजपुटेन च ॥ २ ॥

Aho ! Shrutgyanam

पुटत्रयं कुमार्याश्च अर्कदुग्धे पुटत्रयम् ।
एवं सप्तपुटैर्मृत्युं लोहं चूर्णमवाप्नुयात् ॥ ३ ॥
यथा यथा प्रदीयन्ते पुटास्तु बहवो यतः ।
तथा तथा विवर्द्धन्ते गुणाश्चास्य सहस्रशः ॥ ४ ॥
तावल्लोहं पुटे देयं यावच्चूर्णं कृते जले ।
निस्तरंगो लघुस्तोये समुत्तरति हंसवत् ॥ ५ ॥
तावद्विचूर्णयेदेतद्यावत्कज्जलसन्निभम् ।
करोति निहितं नेत्रे नैव पीडां मनागपि ॥ ६ ॥
आयुःप्रदाता बलवीर्यकर्ता रोगप्रहर्त्ता मदनस्य कर्त्ता ।
अयःसमानं नहि किंचिदन्यद्रसायनं श्रेष्ठतमं हितं च ७

शुद्ध लोहके चूर्णको छिरहटीके रसमें मर्दन करे और गोमूत्र, त्रिफलाके काढेमें मर्दन करे, अग्निदेय, फिर आकके दूधमें चार प्रहर भावना देवे फिर ग्वारपाठेके रसमें पीसकर गजपुटमें फूंके, फिर ग्वारपाठेमें तीन भावना देय और अर्कदूधमें ऐसे सात पुट देनेसे लोहा मरता है, और ज्यों २ जियादह पुट देय त्यों २ गुण बढते जाते हैं, वैद्य तबतक पुट देता रहे कि, जबतक जलपर तैरे नहीं और जबतक काजलके समान न होय तबतक चूर्ण करता रहे तथा नेत्रमें लगानेपर थोडी भी पीडा न करे। यह आयुका देनेवाला है वीर्य बढावे, रोगोंका नाश करे, कामोद्दीपन करे, लोहके समान दूसरा रसायन नहीं है, श्रेष्ठ और हितकारक है ॥ १-७ ॥

मण्डूरकरणम् ।

अक्षांगारे धमेत्किट्टं लोहजं तद्गवां जलैः ।
सिंचयेत्तप्ततप्तं च सप्तवारं पुनः पुनः ॥ १ ॥

Aho ! Shrutgyanam

चूर्णयित्वा ततः क्वाथैर्द्विगुणैस्त्रिफला भवेत् ।
पचेत्ततश्चार्कदुग्धैर्मण्डूरं जायते परम् ॥ २ ॥
त्रिफला त्रिकटुर्मुस्ताग्निविडंगैर्गुडे गुटी ।
तक्रेण पीतमथवा मासं वा सप्तसप्तकैः ॥ ३ ॥
ऊर्ध्वश्वासे पाण्डुरोगे शोफ आमानिले कृमौ ।
मृद्भक्षितविकारेषु वारिरोगे च शस्यते ॥ ४ ॥

खैरसार वा बहेडेकी लकडीके कोयलोंमें लोहेके कीटको तपावे और गोमूत्रमें सात बार बुझावे पीछे दूना त्रिफला लेकर दोनोंको आकके दूधमें भावना देकर संपुटमें फूकदेवे तो मंडूर उत्तम बने, फिर त्रिफला, सोंठ, मिरच, पीपल, मोथा, चित्रक, वायविडंग इनको मिलाकर गुडमें गोली बनावे, प्रातःकाल छाछके साथ गोली एक महीना या ४९ दिनमें खाय तो ऊर्ध्वश्वास, पांडुरोग, सूजन आमवात, कृमिरोग, मिट्टीविकार और पानी लगना ये सब रोग दूर होवें ॥ १-४ ॥

### अभ्रकमारणविधिः ।

कृष्णाभ्रकं धमेद्वह्नौ ततो दुग्धेन सिंचयेत् ।
भिन्नपत्रं ततःकृत्वा तण्डुलीयाम्लयोर्द्रवैः ॥ १ ॥
भावयेदष्टयामं तदेवं शुध्यति चाभ्रकम् ।
बध्वा धान्ययुतं वस्त्रे मर्दयेत्कांजिकैः सहः ॥ २ ॥
आदायाम्लगतं शुद्धं शुद्धधान्याभ्रकं भवेत् ।
अर्कक्षीरैर्दिनं पिष्ट्वा चक्राकारं च कारयेत् ॥ ३ ॥
वेष्टयेदर्कपत्रांश्च सम्यग्गजपुटे पचेत् ।
पुनर्मर्द्यं पुनः पाच्यं सप्तवारं प्रयत्नतः ॥ ४ ॥

Aho ! Shrutgyanam

ततो वटजटाक्काथैस्तद्वद्देयं पुटत्रयम् ।
म्रियते नात्र संदेहः सर्वकार्येषु योजयेत् ।
निश्चन्द्रमभ्रकं तत्स्याज्जरामृत्युरुजापहम् ॥ ९ ॥

काले अभ्रकको अग्निमें तपावे, फिर दूधसे सींचे, फिर जुदे २ पत्र कर आंवलोंके पानीमें और इमलीके रसमें आठ प्रहरकी भावना देवे तो अभ्रक शुद्ध होवे, फिर धान्ययुक्त कपडेमें बांधकर कांजीमें मर्दन करे तो शुद्ध धान्याभ्रक होवे, फिर आकके दूधमें एक दिन घोटकर टिकिया बनावे और आकके पत्ते ऊपर नीचे लपेटकर गजपुटकी आंच देवे फिर घोटकर आंच देवे, ऐसे ७ बार आंच देवे, फिर वटकी जडके काढेमें तीन पुट देवे, इस प्रकार निस्संदेह अभ्रक मरे फिर सब कार्योंमें वर्त्ते, जो अच्छा अभ्रक बने तो बुढापे व मृत्युको दूर करे ॥ १-९ ॥

अमृतीकरणम् ।

क्षिप्त्वाऽभ्रेण घृतं तुल्यं लोहपात्रेऽतिपाचयेत् ।
घृते जीर्णे तदभ्रं तु सर्वकार्येषु योजयेत् ॥ १ ॥

अभ्रकके बराबर घृत डाले और पात्रमें पकावे, जब सब घृत सूख-जाय तब उतारकर काममें लावे ॥ १ ॥

कृष्णाभ्रकं समादाय द्विप्रस्थं चूर्णयेद्बुधः ।
गोमूत्रालोडितं भाण्डे क्षिप्त्वा वह्नौ दिनं पचेत् ॥ १ ॥
अर्कदुग्धे पुनः पिष्ट्वा कृत्वा टिकडिकाः शुभाः ।
वेष्टयित्वाऽर्कपत्रैश्च खर्परस्थाः पुनः पचेत् ॥ २ ॥
एवमेवार्कदुग्धस्य दद्यात्सप्तपुटानि च ।
पुटत्रयं कुमार्याश्च त्रिफलायाः पुटत्रयम् ॥ ३ ॥

Aho ! Shrutgyanam

गुडस्य च पुटं दत्त्वा पुनः पंचामृतैः पचेत् ।
ततो वटजटाक्वाथैः सम्यग् देयं पुटत्रयम् ॥ ४ ॥
एवं निश्चन्द्रतां याति सर्वरोगेषु योजयेत् ।
मृतमभ्रं हरेन्मृत्युं जरापलितनाशनम् ॥ ५ ॥
योजितं चानुपानेन सर्वरोगहरं स्मृतम् ॥ ६ ॥

काला भोडल दो प्रस्थ चूर्ण कर आकके पत्ते लपेटकर ठीकरीमें आंच देवे, ऐसेही आकके दूधकी सात पुट देवे और पकावे, फिर तीन पुट कुमारीके रसकी देवे, फिर तीन पुट त्रिफलेके रसकी देय, फिर गुडकी एक पुट देय, फिर पञ्चामृतकी एक पुट देय, फिर बडकी जटाके काढेकी तीन पुट देय, इस प्रकार उज्वल करे, फिर सब रोगोंमें बर्ते । यह मरा हुआ अभ्रक मृतकको जिलावे, बुढापेको दूर करे अनुपानसे देय तो सहसा रोग न होवे, सब रोग नाश होवें ॥ १-६ ॥

सर्वधातुसत्त्वविधिः १-२ ।

लाक्षा मीनं पयश्छागं टंकणं मृगशृङ्गकम् ।
पिण्याकं सर्षपाशिग्रुगुंजोर्णा गुडसैन्धवम् ॥ १ ॥
यवास्तिक्ता घृतं क्षौद्रं यथालाभं विचूर्णयेत् ।
एभिर्विमिश्रिताः सर्वे धातवो गाढवह्निना ॥ २ ॥
मूषाध्माताः प्रजायन्ते मुक्तसत्त्वा न संशयः ॥ ३ ॥

१-लाख, मछली, बकरीका दूध, सुहागा, हिरनका सींग, सरसोंकी खल, सहँजना, चिरमिटी, ऊन, गुड, सेंधानोन, यव, कुटकी, घृत, शहद जिस प्रकार हो सके उस प्रकार चूर्ण करे और सब धातुमात्रका सत्व निकाले इन चीजोंका मूषा संपुटकर सत्व निकाले ॥ १-३॥

Aho ! Shrutgyanam

गुडं च गुग्गुलं चैव लाक्षापामाण्डटंकणम् ।
उष्णं मीनं समादाय समभागानि कारयेत् ॥
द्रावयेत्सर्वसत्त्वानि पाषाणादपि मृत्तिका ॥ १ ॥

२-लाख, पमार, सुहागा, ऊन, मछली इनको समान ले इन सबको मिलाकर मूसमें सत्व निकाले, इससे पत्थरसे भी मिट्टीका सत्त्व निकलता है ॥ १ ॥

मृतधातुसंजीवनी ।

घृतमधुटंकणगुञ्जागुडेन पिण्डीकृतो मृतो धातुः ।
स पुनर्जीवति यदा तदा निरुत्थो मृतो धातुः ॥ १ ॥

घी, शहद, सुहागा, चिरमिटी, गुड इनमें धातुको मिलाय गोली बनावे तो मरी हुई धातु जीवे और फिर उस धातुको मारै तो वह निरुत्थ अर्थात् पूर्ण मृत हो जाता है ॥ १ ॥

पाराशोधनविधिः ।

कुमारी चित्रकं व्याधिमूलकाकुल्यवारिणा ।
पृथक्पृथक्चतुर्यामं मर्दयेत्सर्वकर्मसु ॥ १ ॥
अंकोलेन विषं हन्ति पावकं हन्ति चित्रकैः ।
राजवृक्षैर्मलं हन्ति कुमारीसप्तकंचुकैः ॥ २ ॥

पारेको घीग्वारपाठेके रसमें मर्दन करै, चार प्रहर चीता, अमलतास, कूटमें मर्दन करे, चार प्रहर अंकोलकी जडके रसमें मर्दन करे, फिर सब काममें लावे । अंकोलके मर्दनसे पारेका विष नाश होवे, चीतेसे मर्दन करनेसे दाह दूर होवे, अमलतासके मर्दनसे मल दूर होवे, कुमारीसके मर्दन से सात काँचली पारेकी दूर होवें ॥ १-२ ॥

हरगौरीरसः ।

रसभागो भवेदेको द्विगुणो गंधको मतः ।

Aho ! Shrutgyanam

खल्वे कज्जलसंकाशं काचकुप्यां क्षिपेत्सुधीः ॥ १ ॥
खर्प्परे वालुकापूर्णे स्थापयेत्तत्र कूपिकाम् ।
इष्टकां च मुखे दत्त्वा कृत्वा कर्पटमृत्तिकाम् ॥ २ ॥
सप्तविंशतियामैश्च त्रिभिः कूपैर्विपाचयेत् ।
पश्चादूर्ध्वं समायाति रसं ज्ञात्वा विचक्षणः ॥ ३ ॥
हंसपादसमं वर्णं निष्पन्नं रसमादिशेत् ।
गुंजायुग्मं प्रदातव्यं सितादुग्धानुपानयुक् ॥ ४ ॥
प्रमेहश्वासकासेषु षंढे क्षीणेऽल्पवीर्यके ।
हरगौरीरसो देयः सर्वरोगप्रशान्तये ॥ ५ ॥
ये क्षीणागतवीर्याश्च कथं सीदन्ति ते नराः ।
ईश्वरेण त्विदं प्रोक्तं हरगौरीरसायनम् ॥ ६ ॥

एक भाग पारा, दो भाग गन्धक खरलमें घोटकर कजली करे, फिर शीशीमें डालकर इकट्ठी करे, फिर वालुकायंत्रमें रख ऊपर नीचे बालू भरे, बीचमें शीशी रक्खे और पकी ईंटसे मुख बन्द करे और विधिपूर्वक सात कपरोटी कर सत्ताईस प्रहर तीन तीन शीशियोंमें पकावे, फिर जब ऊपर उडकर आजाय तब जानो रस बन गया, सिंगरफकासा रंग निष्पन्न रस जानो । दो रत्ती पानमें ले और मिश्री मिलाकर ऊपरसे दूध पीवे. यह हरगौरीरस–प्रमेह, श्वास, खांसी, नपुंसकता, क्षीणता, वीर्यक्षय इन सब रोगोंका नाश करता है जिन मनुष्योंका वीर्य क्षीण है वे क्यों दुःख पाते हैं । ईश्वरने उनके लियेही हरगौरीरस कहा है ॥ १–६ ॥

रससिंदूरम् ।

सूतकं च समादाय द्विगुणं गन्धकं क्षिपेत् ।
ततश्च कज्जलीं कृत्वा काचशीश्यां तु धारयेत् ॥ ६ ॥

Aho ! Shrutgyanam

मृन्मयां मुद्रितां दत्वा नन्दसंख्या प्रमाणतः ।
पृथग्भाण्डं तु संस्थाप्य वालुकार्द्धप्रमाणतः ॥ ७ ॥
मध्ये च शीशिकां धृत्वा मुखे मुद्रां च कारयेत् ।
द्वात्रिंशद्याममग्निश्च स्वांगशीतेऽवतारयेत् ॥ ८ ॥
रसासिंदूरनामेदं भास्करेण विनिर्मितम् ।
गुञ्जायुग्मं सदा ग्राह्यं नागवल्लीदलैः सह ॥ ९ ॥

पारेसे दूनी गन्धक डालकर कज्जली करे, फिर काचकी शीशीमें भर मुख बन्द कर कपरमिट्टी नौ बार कर एक पात्रमें आधा भाग बालू भर बीचमें शीशी रख फिर ऊपर बालू भर मुख बन्द करे. सात कपडमिट्टी कर बत्तीस प्रहरकी आंच देवे. जब ठण्ढा होजाय तब उतार लेवे । यह रससिन्दूर भास्करजीने कहा है. मात्रा दो रत्ती नित्य पानके साथ सेवन करे ॥ ६-९ ॥

मदनमुद्रा १-२ ।

नागेन्द्रसिक्थकमयोमलसर्जिकाभिर्लाक्षा च चुंबकमधूफलभूर्जपत्रम् । संकुट्यमानमतसीफलतैलमिश्रं श्रीपारदस्य मरणे मदनाख्यमुद्रा ॥ १ ॥

१-सिन्दूर, मोम, लोह, कीट, सज्जी, लाख, चुम्बकपत्थर, महुआ फल, भोजपत्र इनको कूटकर अलसीके तेलमें मिलावे. यह पारा मारनेके लिये मदनमुद्रा कही है ॥ १ ॥

उदुम्बरार्कवटदुग्धपलं पलं च लाक्षापलं पलचतुष्टय भूर्जपत्रम् । संकुट्य सर्वमतसीफलतैलमिश्रं श्रीपारदस्य मरणे मदनाख्यमुद्रा ॥ २ ॥



Aho ! Shrutgyanam

२--गूलरका दूध, आकका दूध, वटका दूध एक एक पल ले, लाख १ पल और भोजपत्र चार पल ले इन सबको कूटकर अलसीके तेलमें मिलावे. यह भी पारा मारनेके लिये मदनमुद्रा है ॥ २ ॥

वज्रमुद्रा ।

खडी खदिरभस्मांबु लवणश्चाथवा ध्रुवम् ।
कारीषभस्म लवणांबु द्वाभ्यां मुद्रा प्रकीर्तिता ॥ १ ॥

खडिया, खैरसार, राख, पानी, नोन अथवा केवल राख, नोन, पानीसे यह दोनों मिलाकर वज्रमुद्रा बनती है ॥ १ ॥

पारदगुणाः ।

देहस्य शुद्धिं कुरुते च पारदो नानागदानां हरणे समर्थः । करोति पुष्टिं हरते च मृत्युं कल्पायुषं चापि करोति नूनम् ॥ १ ॥ पारदः सकलरोग- पारदो राजयक्ष्मशरणैकपारदः । सर्व रोगमपि हन्ति तत्क्षणान्नागवल्लिरसराजभक्षणात् ॥ २ मूर्च्छितो हरते व्याधिं बद्धः खेचरतां व्रजेत् । सर्वसिद्धिकरो नीलो निश्चलो मुक्तिदायकः ॥ ३ ॥ तारे गुणाशीति तदर्द्धकांते वंगे चतुःषष्टि रवौ तदर्द्धम् । हेम्नः शतैकं गगने सहस्रं वज्रे गुणाः कोटिरनंतसूते ॥ ४ ॥ संस्कारहीनं खलु सूतराजं यः सेवते तस्य करोति बाधाम् । देहस्य नाशं विदधाति नूनं कुष्ठान् समग्रान् जनयेन्नराणाम् ॥ ५ ॥ विकारो यदि जायेत पारदान्मलसंयुतात् । गंधकं

Aho ! Shrutgyanam

सेवयेद्धीमान्पाचितं विधिपूर्वकम् ॥ ६ ॥ गंधकं माषयुग्मं च नागवल्लीदलैः सह । खादेत् पारद-संग्रस्तो दोषशान्तिस्तदा भवेत् ॥ ७ ॥

पारा देहकी शुद्धि करता है और नानाप्रकारके रोगोंके नाश करनेको समर्थ है. पुष्टिकारक, मृत्युका हर्ता, निश्चय कल्पकी उमर करता है, पारा संपूर्ण रोगोंको पार करता है. शोष, यक्ष्मा, दाह इनको मेघके समान शांत करता है, पारा नागरपानके साथ सेवन करनेसे संपूर्ण रोगोंको दूर करता है. मूर्च्छित पारा रोगका नाश करता है, पारेकी गोली मुखमें रखनेसे आकाशमार्गमें होकर चले, नीला पारा सर्व सिद्ध करता, निश्चल मुक्तिका देनेवाला है, चांदीमें ८० गुण, कांतिसारमें ४० गुण, वंगमें ६४ गुण, ताँबेमें ३२ गुण, सुवर्णमें १००, अभ्रकमें १००० गुण, हीरामें १०००००० गुण, और पारेमें अनगिनत गुण जानो, पर इन सबकी भस्ममें गुण है। और संस्कारहीन पारा खाय तो अवगुण करता है, देहका नाश, कोढको करे। पारा खानेसे जो विकार होवें तो दो महीनें पानमें शुद्ध गंधकका सेवन करे तो पारा खानेके सर्व रोग शांत होवें ॥ १-७ ॥

पारदविकारशान्तिः ।

द्राक्षाकूष्मांडखण्डा च तुलसी शतपुष्पिका ।
लवङ्गतजनागं च गन्धकेन समांशकः ॥ १ ॥
कर्षमात्रपयोभुक्तं सर्वं सर्वं पृथक् पृथक् ।
सर्वयोगान्तरासाध्यसूतदोषविकारनुत् ॥ २ ॥
नागवल्लीरसं प्रस्थं भृंगराजरसं समम् ।
तुलसीरसप्रस्थं च छागीदुग्धं समांशकम् ॥ ३ ॥

Aho ! Shrutgyanam

मर्दयेत्सर्वगात्रेषु यामयुग्मं दिनत्रये ।
स्नानं शीतलनीरेण सूतदोषप्रसान्तये ॥ ४ ॥

मुनक्का, पेठा, खांड, तुलसी, सोफ, लौंग, तज, नागकेशर, गंधक इनकी समान मात्रा ले इन सबको गंधक संयुक्त चार टंक खाय, ऊपरसे दूध और घी पीवे, एक एक कर्ष जुदी २ औषधि लेवे, यह सब रोगोंको शांत करे और पारेके विकारोंको दूर करता है. पान और भांगरेका रस एक एक प्रस्थ लेवे, तुलसीपत्रका रस एक प्रस्थ बकरीका दूध एक प्रस्थ इनको २ प्रहर शरीरमें मर्दन करे और ठंढे पानीसे स्नान करे तो पारेका दोष दूर होय ॥ १-४ ॥

### भस्मसूतम् ।

शुद्धं सूतं समं गन्धं वटक्षीरैर्विमर्दयेत् ।
पाचयेन्मृत्तिकापात्रे वटकाष्ठैर्विचालयेत् ॥ १ ॥
लघ्वग्निना दिनं पाच्यं भस्म सूतं भवेद्ध्रुवम् ।
द्विगुञ्जं नागपत्रेषु पुष्टमग्नेश्च वृद्धिकृत ॥ २ ॥

पारा ४ टंक, गंधक ४ टंक, बडके दूधमें मर्दन करे और मिट्टीके पात्रमें पकावे, बडकी लकडीसे हिलाता जाय, एक दिन मन्दाग्नि देय तो पारा भस्म हो जायगा, मात्रा एक रत्ती पानमें देवे तो पुष्टि करे, अग्नि दीपन और क्षुधाको बढावे ॥ १-२ ॥

### हरितालशुद्धिः ।

तालकं कणशः कृत्वा तच्चूर्णं कांजिकेक्षिपेत् ।
दोलायंत्रेण यामैकं ततः कूष्मांडजैर्द्रवैः ॥ १ ॥
तिलतैलं पचेद्यामं यामं च त्रिफलाजलैः ।

Aho ! Shrutgyanam

एवं यंत्रे चतुर्यामं पाच्यं शुद्ध्यति तालकम् ॥ २ ॥
शुद्धं स्यात्तालकं छिन्नं कूष्माण्डसलिलेततः ।
चूर्णोदके पृथक्तैले भस्मीभूतं न दोषकृत् ॥ ३ ॥
तालकं पोट्टलीं बद्ध्वा मृद्भाण्डे कांजिके क्षिपेत् ।
दोलायंत्रेण यामैकं ततः कूष्माण्डजैर्द्रवैः ॥ ४ ॥
तिलतैले पचेद्यामं यामं च त्रिफलाजलैः ॥ ५ ॥

हरितालके टुकडे कर कांजीमें डाल एक प्रहर दोलायन्त्रमें पकावे फिर पेठेके रसमें एक प्रहर पकावे, तिलके तेल और त्रिफलेके काढेमें एक एक प्रहर पकावे, ऐसे चार प्रहर आँच देवे तो हरिताल शुद्ध होवे । उस शुद्ध हरितालको पेठेके रसमें पकावे, फिर तेलमें तथा एक प्रहर त्रिफलेके रसमें पकाय शुद्ध करलेवे तो निर्दोष होय ॥ १-५ ॥

तालं विचूर्णयेत्सूक्ष्मं मर्द्यं नागार्जुनीद्रवैः ।
सहदेव्या बलायाश्च मर्दयेद्दिवसद्वयम् ॥ ६ ॥
तत्तालं रोटकं कृत्वा च्छायायां च विशोषयेत् ।
हंडिकायंत्रमध्यस्थं प्लक्षभस्म तलोपरि ॥ ७ ॥
पाच्यं वालुक यंत्रेण भिदितं चण्डवह्निना ।
स्वांगशीतं समुद्धृत्य सर्वयोगेषु योजयेत् ॥ ८ ॥

हरितालको नागार्जनीके रसमें ३ दिन और सहदेवी कँघईके रसम २ दिन मर्दन करे फिर हरितालकी टिकिया कर छायामें सुखावे, फिर बालुकायन्त्रमें ढाककी राख भर बीचमें टिकिया रख पकावे, अतितीक्ष्ण अग्नि देय, जब ठंढी होजाय तब निकाल सम्पूर्ण काममें लावे ॥ ६-८ ॥

Aho ! Shrutgyanam

रसकर्पूरविधिः ।

पारदः स्फटिका चैव हीराकासीसमेव च ।
सैन्धवं समभागे ते विंशांशं नवसादरम् ॥ १ ॥
खल्वे विमर्द्य सर्वाणि कुमारीरसभावना ।
क्रमवृद्धाग्निना पक्वो रसः कर्पूरसंज्ञकः ॥ २ ॥

पीसी फिटकरी, हीराकसीस, नोन प्रत्येक एक एक सेर, बीसवां हिस्सा नवसादर इनको खरल कर कुमारीरसमें क्रमसे अग्नि देवे, पहिले मन्दाग्नि, फिर मध्यमाग्निं, फिर तीक्ष्णाग्नि दे तो रसकपूर बने ॥ १-२ ॥

सूतं संशोध्य चक्राभं कृत्वा लिप्त्वा च हिंगुना ।
द्विस्थालीसम्पुटे धृत्वा पूरयेल्लवणेन च ॥ ३ ॥
अधःस्थाल्यां ततो मुद्रां प्रदद्याद् दृढतां बुधैः ।
विशोष्याग्निं विधायाधो निषिंचेदंबुनोपरि ॥ ४ ॥
ततस्तु कुर्यात्तीव्राग्निं तदधः प्रहरत्रयम् ।
एवं निपातयेदूर्ध्वं रसो दोषविवर्जितः ॥ ५ ॥
अथोर्ध्वं पिठरीमध्ये लग्नो ग्राह्यो रसोत्तमः ॥ ६ ॥

पारेको शोधकर निर्मल करे, फिर हांडीमें हींगका लेप करे, दूसरी हांडीका सम्पुट कर नोनसे भर दे और हांडीमें दृढ मुद्रा देवे, जब सूख जाय तब चूल्हेपर चढावे, क्रमसे आग्नि देवे और तीन प्रहर तीक्ष्ण अग्नि देवे और पानीसे भीगा कपडा रक्खे, थोडा २ पानी डालता जाय, जब शीतल होवे तब निकाले जो ऊंचा चढजाय वो निर्दोष जानो, ऊपरकी हांडीमें हो उसे उत्तम जानो ॥ ३-६ ॥

Aho ! Shrutgyanam

शुद्धरसस्य मुखकरणम् ।

अर्कसीहुंडधत्तूरलांगलीकरवीरकाः ।
गुञ्जाहिफेना चेत्येताः सप्तोपविषजातयः ॥ १ ॥
एतैर्विमर्दितः सूतश्छिन्नपक्षः प्रजायते ।
मुखं च जायते तस्य धातूंश्च ग्रसते द्रुतम् ॥ २ ॥

आक, थूहर, धतूरा, करिहारी रूखडी ( तथा शाकविशेष ) कनेर, चिरमिटी, अफीम यह सात उपविषकी जाति हैं । इन करके पारेको मर्दन करे तो छिन्नपक्ष होजाय और पारेके मुख होय ( बुभुक्षित ) सम्पूर्ण धातुओंका शीघ्र ग्रस जाय ॥ १ ॥ २ ॥

अथवा कटुकः क्षारो राजी लवणपञ्चकम् ।
रसोना नवसारश्च शिग्रुश्चैकत्र चूर्णयेत् ॥ ३ ॥
समांशैः पारदोदेतैर्जम्बीरेण द्रवेण वा ।
निम्बुतोये काञ्जिकैर्वा सोष्णखल्वे विमर्दयेत् ॥ ४ ॥
अहोरात्रत्रयेण स्याद्रसे सुरुचिरं मुखम् ॥ ५ ॥

सोंठ, मिरच, पीपल सज्जी, जवाखार, राई, पांचों नोंन, लहसन, नौसादर सहँजना इनका चूर्ण कर तीन दिन अर्थात् २४ प्रहर मर्दन करनेसे पाराके मुख होता है । इसमें सन्देह नहीं ॥ ३-५ ॥

पारदमारणविधिः ।

मृत्पिण्डे प्रक्षिपेन्नीरं तन्मध्ये च शरावकम् ।
महत्कुण्डं पिधानाभं तन्मध्ये मेखलायुतम् ॥ १ ॥
लिखेच्चमेखलामध्ये स्वर्णेनात्र रसं क्षिपेत् ।
रसस्योपरि गन्धस्य रजो दद्यात्समांशकम् ॥ २ ॥
दत्त्वोपरि शरावं च भस्ममुद्रां प्रदापयेत् ।

Aho ! Shrutgyanam

तस्योपरि पुटं दद्याच्चतुर्भिर्गोमयोपलैः ॥ ३ ॥
एवं पुनः पुनर्गन्धं षड्गुणं जारयेद्बुधः ।
गन्धे जीर्णे भवेत्सूतं तीक्ष्णाग्निः सर्वकर्मकृत् ॥ ४ ॥

धूमसाररसं तारो गन्धकं नवसादरम् ।
यामैकं मर्दयेदम्लैर्भागं कृत्वा समं समम् ॥ ५ ॥
काचकुप्यां विनिक्षिप्य तां च मृद्वस्त्रमुद्रया ।
विलिप्य परितो वक्रे मुद्रां दत्त्वा च शोषयेत् ॥ ६ ॥

अधः सच्छिद्रपिठरीमध्ये कूपीं निवेशयेत् ।
पिठरीं वालुकापूरैर्भृत्वा आकूपिकागलम् ॥ ७ ॥
निवेश्य चुल्ल्यां तदधः कुर्याद्वह्निं शनैः शनैः ।
तस्मादप्यधिकं किञ्चित्पावकं ज्वालयेत्क्रमात् ॥८॥
एवं द्वादशभिर्यामैर्म्रियते सूतकोत्तमः ।
स्फोटयेत्स्वांगशीतं त मूर्ध्वगं गन्धकं त्यजेत् ॥ ९ ॥
अधःस्थं मृतसूतं च सर्वकर्मसु योजयेत् ॥ १० ॥

मिट्टीके बरतनमें पानी भर बीचमें सरवा रक्खे, उसके ऊपर एक बडा ढक्कन ढके, उसके चारों तरफ गड्ढा करै, उस गड्ढेमें सोनेके बरतनसे रस डालता जाय, उस रसके ऊपर गन्धक पीसकर समान मात्रा डाले, ऊपर एक सरवा रक्खे, फिर भस्ममुद्रा देवे, तिसके ऊपर पुट देकर उपलोंकी आँच देवे, इसी प्रकार छः बार गन्धकको बुद्धिमान् वैद्य जलावै । जैसे २ गन्धक जले वैसे २ पारा तीक्ष्णाग्नि हो कार्य करनेवाला हो जाता है. जैसे धूमसार, पारा, फिटकरी, गन्धक, नौसादरको एक प्रहर खटाईमें मर्दन करे और

Aho ! Shrutgyanam

सब औषधि बराबर लेवे. फिर कांचकी शीशीमें भरकर एक शीशी उसके सम्पुटमें देवे, फिर वालुकायन्त्रमें शीशीके गलेतक बालू भरदेवे और हांडीके मुखमें कपरमिट्टी कर चूल्हेपर रख क्रमसे अग्नि देवे, ऐसे बारह प्रहर आँच देवे तो पारा उत्तम मरै जब ठंढा होजाय तब फोडकर ऊपरकी गन्धकछोड देवे, नीचेके पाराको काममें लावे॥१-१०॥

हिंगुलसे पारा काढनेकी विधि ।

निम्बूरसैर्निम्बपत्ररसैर्वा याममात्रकम् ।
पिष्ट्वा दरदमूर्ध्वं च पातयेत्सूतमुक्तवत् ॥
ततः शुद्धं रसं तस्मान्नीत्वा कार्येषु योजयेत् ॥ १ ॥

नींबूके रस तथा नीमके पत्तोंके रसम हिंगलूको एक प्रहर खरल करे फिर डमरूयन्त्रमें चढावे, उससे उडकर पारा ऊपर जा लगे उसे शुद्ध जाने और उसको सब काममें लावे ॥ १ ॥

हरतालशुद्धिः ।

पलाशभस्म मृद्भाण्डे क्षिप्त्वोपरि च तालकम् ।
तालोपरि पुनर्भस्म दत्त्वा स्थालीं विमुद्रयेत् ॥ १ ॥
चुल्ल्यां पचेच्चतुर्यामं पश्चात्तत्सिद्धतां व्रजेत् ।
गाढे तथाऽयसि न्यस्तं निर्धूमं च तदाशुभम् ॥ २ ॥
खण्डेन रक्तिकामात्रं खादेत्कुष्ठनिवृत्तये ।
पथ्यं मकुष्ठचणका लवणस्नेहवर्जिताः ॥ ३ ॥

ढाककी राखको हांडीमें भरकर बीचमें हरताल रक्खे, फिर मुद्रा चढाय चूल्हेपर रखकर चार प्रहर अग्नि देवे, जब मृत हो जाय तब इस प्रकार परीक्षा करे कि, लोहेको गरम कर उसमें डाले जो धुआं न देवे तो जाने शुद्ध होगई । इसको खांडमें एक रत्ती देवे तो कोढ दूर होवे । पथ्य-मोठ, नोन, चना, तेल घृत न देवे इनको छोडकर और पथ्य देवे ॥ १-३ ॥

Aho ! Shrutgyanam

पलमेकं शुद्धतालं कुमारीरसमर्दितम् ।
शरावसम्पुटे क्षिप्त्वा यामान्द्वादश तत्पचेत् ॥ ४ ॥

शुद्ध हरताल १ पल ले कुमारीरसमें मर्दन करे और दो शरावोंमें सम्पुट कर १२ प्रहरकी आँच देवे ॥ ४ ॥

हरितालं कर्षमात्रं मर्दितं कन्यकाद्रवैः।
सतैलं चायसे पात्रे क्षिप्त्वा मन्दाग्निना पचेत् ॥ ५ ॥

एक कर्ष हरताल कुमारीरसमें मर्दन कर लोहेके पात्रमें तेल डालकर मन्दाग्नि देवे ॥ ५ ॥

नागतांबाविधिः ।

मयूरपिच्छानादाय ज्वालयेदाज्यसर्षपैः ।
गुडगुग्गुलमीनोर्णा टंकणं सर्जिका मधु ॥ १ ॥
गुञ्जा च पिप्पली लाक्षाघृतंचैकत्र कारयेत् ।
धमेत्तदन्धमूषायां नागताम्रं प्रजायते ॥ २ ॥

मोरपख ४ सहस्त्रोंके चन्दा निकाले और मिट्टीक बडे बर्तनमें डालकर जलावे, फिर दो टंक गुड, सरसो, गूगल, छोटी मच्छी, ऊन, सुहागा, सज्जी, शहद, चिरमिठी, पापल, लाख ये सब बराबर लेकर एक हाथ नीचा गड्ढा खोदे एक ओरमें मोरपंखकी राख रक्खे और ऊपर दवाई डालता जाय और नीचेसे धोकता जाय, जब सब डालचुके और ठंडा होजाय, तब छोटे २ कण बीन लेवे और गलालेवे तो नागतांबा होवे ॥ १-२ ॥

सुवर्णमाक्षिकशोधनम् ।

माक्षिकं स्वेदयेत्पूर्वं कुलत्थक्काथयोगतः ।
अथवा नरमूत्रेण दोलायन्त्रे विशुद्ध्यति ॥ १ ॥

Aho ! Shrutgyanam

माक्षिकस्य त्रया भागा भागैकं सैन्धवस्य च ।
मातुलुंगद्रवैश्चाथ जम्बीरोत्थद्रवैः पचेत् ॥ २ ॥
क्षालयेल्लोहजे पात्रे यावत्पात्रं सलोहितम् ।
भवेत्ततः सुसिद्धः स्यात्स्वर्णमाक्षिकमृच्छति ॥ ३ ॥
कुलत्थस्य कषायेण घृततैलेन वा पचेत् ।
तक्रेणऽवाजमूत्रेण म्रियते स्वर्णमाक्षिकम् ॥ ४ ॥

सोनामक्खीको पहले शहदमें फिर कुलथीके काढेमें फिर मनुष्यके मूत्रमें घोटकर दोलायंत्रमें शुद्ध करे । फिर शहद तीन भाग, सेंधानोंन एक भाग ले बिजौरा तथा जंभीरीके रसमें पकावे । उसको लोहेके पात्रमें डालकर जब लाल हो जाय तब-तक हिलावे तो सोनामक्खी शुद्ध होय । कुलथीके काढे अथवा घृत तेलमें पकावे या मट्ठामें पकावे वा बकरीके मूत्रमें पकावे तौ सोनामक्खी मरै ॥ १–४ ॥

रूपमाक्षिकशोधनम् ।

कर्कोटीमेष शृंग्युत्थैर्द्रवैर्जंबीरजैर्दिनम् ।
भावयेदातपे तीव्रे विमला शुद्धयति ध्रुवम् ॥ १ ॥

रूपामाखी कंकोडा, मेढासींगीका रस, जंभीरीका रस इनमें एक दिन भावना देकर फिर धूपमें सुखावे तो रूपामाखी शुद्ध होवे ॥ १ ॥

मनःशिलाशोधनम् ।

पचेत्र्यहमजामूत्रे दोलायन्त्रे मनःशिलाम् ।
भावयेत्सप्तधा पित्तैरजायाः शुद्धिमृच्छति ॥ १ ॥

मनशिलको बकरीके मूत्रविषे दोलायंत्रमें तीन दिन पकावे, फिर बकरीके पित्तेकी सात भावना देवे तौ शुद्ध होवे ॥ १ ॥

Aho ! Shrutgyanam

नीलांजनशोधनम् ।

नीलांजनं चूर्णयित्वा जंम्बीरद्रवभावितम् ।
दिनैकमातपे शुद्धं सर्वकार्येषु योजयेत् ॥ १ ॥
एवं गैरिककासीसं टंकणानि वराटिका ।
शंखत्रुटी च कङ्कुष्ठं शुद्धिमायान्ति निश्चितम् ॥ २ ॥

सुरमाको पीसकर जंबीरीके रसकी एक दिन भावना दे, फिर धूपमें सुखावे तो शुद्ध होवे तब सब काममें वर्ते । इसी प्रकार गेरू, कसीस, सुहागा, कौडी, शंख, फिटकरी, खपरियादि शुद्ध होते हैं॥१-२

## अथ रसप्रकरणम् ।

लोकनाथरसः ।

भागौ दग्धकपर्दकस्य च तथा शंखस्य भागद्वयं
भागौ गंधकसूतयोर्मिलितयोः पिष्ट्वा मरीचादपि ।
भागानां त्रितयं नियोज्य सकलं निम्बूरसैश्चूर्णितं
पीतस्तक्रमनु ग्रहण्यपहरः श्रीलोकनाथोरसः ॥ १ ॥

कौडीकी भस्म दो भाग, शंख, दो भाग, गन्धक एक भाग, पारा एक भाग इनको पीसकर तीन टंक मिरच डाल सबको मिलावे फिर नींबूके रसमें गोली बना और छाछके साथ लेवे तो यह श्रीलोकनाथ रस संग्रहणी रोगको दूर करता है ॥ १ ॥

शुद्धो बुभुक्षितः सूतो भागद्वयमितो भवेत् ।
तथा गंधकभागौ द्वौ कुर्यात्कज्जलिकां तयोः ॥ २ ॥
सूताच्चतुर्गुणेष्वेव कपर्देषु विनिक्षिपेत् ।
भागैकं टंकणं दत्त्वा गोक्षीरेण विमर्दयेत ॥ ३ ॥

Aho ! Shrutgyanam

तथा शंखस्य खण्डानां भागानष्टौ प्रकल्पयेत् ।
क्षिपेत् सर्वं पुटश्चान्तश्चूर्णं लिप्तशरावयोः ॥ ४ ॥
गर्ते हस्तोन्मिते धृत्वा पुटेद्गजपुटेन च ।
स्वांगशीतं समुद्धृत्य पिष्ट्वा तत्सर्वमेकतः ॥ ५ ॥
षड्गुंजासमितं चूर्णमेकोनत्रिंशदूषणैः ।
घृतेन वातजे दद्यान्नवनीतेन पित्तजे ॥ ६ ॥
क्षौद्रेण श्लेष्मजे दद्यादतीसारक्षये तथा ।
अरुचौ ग्रहणीरोगे कासमंदानले तथा ॥ ७ ॥
कासश्वासेषु गुल्मेषु लोकनाथो रसो हितः ।
तस्योपरि घृतान्नं च भुंजीत कवलत्रयम् ॥ ८ ॥
मंचे क्षणैकमुक्तान्नं शयीतानुपधानके ।
रसाच्च जायते तापस्तदा शर्करया युतम् ।
गुडूच्या वाथ गृह्णीयाद्वंशलोचनयाथवा ॥ ९ ॥

शुद्ध और भूखा पारा दो भाग, गंधक दो टंक इनकी कज्जली कर पारेसे चौगुनी कौडी डाले, सुहागा एक टंक डालकर गौके दूधमें खरल करै फिर शंखकी भस्म एक टंक डालकर फिर सबको सकोरेमें रख कपरमिट्टी कर एक हाथ गड्ढे तथा गजपुटमें फूंक देवे. जब ठंढा हो जाय तब निकाल लेवे फिर पीसकर काममें लावे । छः रत्ती रस २९ काली मिरचोंके साथ, वायुवालेको घृतमें देवे और पित्तवालेको माखनमें, कफवालेको शहदमें देवे । अतीसार और क्षयमें शहदके साथ लेवे, अरुचि, संग्रहणी, खांसी, मन्दाग्नि, श्वास, गुल्ममें लोकनाथरस फायदा करता है और तीन ग्रासोंके साथ घृत लेवे और खाटपर सीधा

Aho ! Shrutgyanam

तकिया लगाकर क्षणमात्र लेटे । रससे गरमी मालूम होवे तो मिश्री संयुक्त लेवे अथवा गिलोय वा वंशलोचनमें लेवे तो अरुचि, संग्रहणी आदि दूर होवें ॥ २–९ ॥

कफकुंजररसः १–२ ।

रसगन्धः सीपिमासं स्नुह्यर्कं च पयःपलम् ।
पलं पलं पञ्चलूणमेकीकृत्य तु चूर्णयेत् ॥ १ ॥
आलोडय चार्कदुग्धेन पूरयेच्छंखमध्यतः ।
पिप्पली विषकर्वीरं चूर्णं कृत्वा प्रलेपयेत् ॥ २ ॥
प्रज्वालयेद्याममात्रं सूक्ष्मं चूर्णं तु कारयेत् ।
कर्पूरनागपत्रैश्च देया मात्राऽर्द्धगुञ्जया ॥ ३ ॥
श्वासं कासं च हृद्रोगं कफं पञ्चविधं तथा ।
वज्रवद्धन्ति रोगांश्च रसोऽयं कफकुंजरः ॥ ४ ॥

१–पारा १६ टंक, गंधक १६ टंक, सीपी १६ टंक, थूहरका दूध १ पल, आकका दूध १ पल, पाचों नोन इनको एकत्र कर आकके दूधमें सान शंखमें भरे । पीपल, तेलिया मीठा, कनेर इनको भी शंखमें भर देवे और कपरौटी कर एक प्रहर अग्नि देवे जब ठंढा होजाय तब सबका चूर्ण कर कपूर पानके संग आधी रत्ती दे तो श्वास, खांसी, हृदयरोग, पाँच प्रकारके कफ वज्रके समान कफकुंजर रस रोगरूपी वृक्षोंको जडसे उखाडे ॥ १–४ ॥

नागं पारदसंयुतं समरिचं सद्वत्सनाभं शुभं देवा-
लीरसभावना मुनिमिता कर्चूरकाकल्ह्योः ।
देयं वल्लमितं महौषधरसैः सन्नागवल्लीदलैः श्लेष्मा-
वातविकारजाठरपरे स्यात्सन्निपाते ज्वरे ॥ १ ॥

Aho ! Shrutgyanam

२–शीशा, पारा विधिपूर्वक मिलावै । विधि–शीशेको गलाकर चूनेके पानीमें तीन बार डाले, पारेको सात बार कपडेमें छानलेवे फिर ईटके कुकुआसे एक प्रहर खरल करे फिर शीशेको गलाकर पारेमें डाल देवे, मिरच ४ टंक, तेलिया मीठा एक टंक बन्दाल (डोडी) की ७, भांगरेका रस कचूरकारस अकरकराका रस, सोंठका रस, पानका रस इनकी सात २ भावना देवे । यह रस श्लेष्मविकार, वायुविकार, पेटके रोग और सन्निपातज्वरादिकोंको भी नाश करे ॥ १ ॥

श्वासकुठारो रसः ।

रसं गन्धं विषं चैव टंकणं च मनःशिला ।
एतानि टंकमात्राणि मरिचं टंककाष्टकम् ॥ १ ॥
एकैकं मरिचं दत्त्वा खल्वे सूक्ष्मं विमर्दयेत् ।
त्रिकटुं टंकषट्कं च दद्यात्पश्चाद्विमर्दयेत् ॥ २ ॥
रसः श्वासकुठारोयं पूर्णखण्डेन बुद्धिमान ।
श्वासेऽतिदुस्तरे दद्याद् गुञ्जामात्रं प्रयत्नतः ॥ ३ ॥

पारा, गन्धक, तेलिया मीठा, सुहागा, मनशिल इन सबको एक एक टंक लेवे । मिरच ८ टंक ले एक एक मिरच डालता जाय और खरल करे सोंठ, मिरच, पीपल ६ टंक डालकर महीन पीसे । इस श्वासकुठार नाम रसको बुद्धिमान पुरानी खांडके साथ देवै । बडे कठिन श्वासमें एक रत्ती मात्रा यत्नसे देवे ॥ १–३ ॥

आनन्दभैरवरसः ।

हिंगुलं वत्सनागं च मरिचं टंकणं कणा ।
जंबीरस्य रसं दत्त्वा मर्द्यं यामचतुष्टयम् ॥ १ ॥
श्वासे कासे सन्निपाते ग्रहण्यां शूलमेहयोः ।
आस्मारानिलच्छर्दौ रसश्चानन्दभैरवः ॥ २ ॥

Aho ! Shrutgyanam

हिंगुल, शुद्ध तेलिया मीठा, मिरच, सुहागा, पीपल इनको जम्बीरीके रसकी चार प्रहरकी भावना देवे। यह रस खांसी श्वास, सन्निपात, संग्रहणी, शूल, प्रमेह, मृगी, वायु, छर्दि इतने रोगोंको दूर करता है। यह आनन्दभैरव रस है ॥ १ ॥ २ ॥

कालारिरसः १–२।

त्रिशाणं पारदं चैव गंधकं शाणपंचकम्।
त्रिशाणं वत्सनागं च पिप्पली दशशाणिका ॥ १ ॥
लवंगं च चतुःशाणं त्रिशाणं कनकाह्वयम्।
टंकणं वह्निशाणं च पंच जातीफलं क्षिपेत् ॥ २ ॥
मरिचं पञ्चशाणं स्यादकल्लं च त्रिशाणकम्।
करीरार्द्रकनिम्बूकैर्मर्दयेच्च दिनत्रयम् ॥ ३ ॥
कालारिरसनामाऽयं वातव्याधिविनाशनः।
मर्दने भक्षणे नस्ये द्विगुंजं संन्निपातजित् ॥ ४ ॥

१–पारा ३ टंक, गन्धक ५ टंक, तेलिया मीठा ३ टंक, पीपल १० टंक, लौंग ४ टंक, धतूरा ३ टंक, सुहागा फूला ३ टंक, जायफल ५ टंक, मिरच ५ टंक, अकरकरा ३ टंक, करील, अदरक इनको ले नींबूके रसमें तीन दिन मर्दन करै यह कालारि नाम रस मर्दन और भक्षण करै, तथा नास देवे तो वातरोगोंको दूर करै, दो रत्ती प्रमाण खाय तो सन्निपातको जीते ॥ १–४ ॥

शुद्धं सूतं मृतं ताम्रं गन्धकं नागरं विषम्।
जातीफलं लवङ्गानि कनकं मरिचैः सह ॥ ५ ॥
रसाच्च द्विगुणं ग्राह्यं टंकणं भृष्टमेव च।
पिप्पली करहाटश्चसर्वार्धंगृह्य कोविदैः ॥ ६ ॥

Aho ! Shrutgyanam

कर्षमात्राणि सर्वाणि रसाद्या मरिचांतकाः ।
पिष्ट्वा सूक्ष्ममिदं योज्यं नस्यभक्षणयोर्द्वयोः ॥ ७ ॥
भावना निम्बुकावल्लीहिमार्द्रकरसैस्तथा ।
वारत्रयंसदा देयाः कालारिरससिद्धये ॥ ८ ॥
सर्वे वाताः शिरोवातो मेहः प्रस्वेद एव च ।
सूतिकानां च ये रोगाः सर्वे नश्यन्ति वेगतः ॥ ९ ॥
रसः कालारिसंज्ञोऽयं प्रतीतो बहुषु श्रुतः ।
शिरोग्रहः कर्णनादो मन्यास्तम्भो हनुग्रहः ॥ १० ॥
धनुर्वातादयोप्येवं वाह्याः पामादयस्तथा ॥ ११ ॥

२–शुद्ध पारा, फूंका तांबा, गन्धक, सोंठ, तेलिया मीठा, जायफल, लौंग, धतूरेके बीज, मिर्च, पारेसे दूना सुहागा भूना, पीपल, अकरकरा ये सब औषधि आधे ले. सब औषधि मरिच पर्यंत चार २ टंक लेवे इनको पीसकर नस्य और खानेमें वर्ते नींबूके रसकी ३ भावना, ब्राह्मीके रसकी ३ भावना, अदरखके रसकी ३ भावना कनेरके रसकी ३ भावना देय तो कालारिरस सिद्ध हो जाता है । यह संपूर्ण वात, शिरका वात, प्रमेह, पसीना, प्रसूतिकादि रोगोंको दूर करे, यह कालारिरस बहुत जगह अजमाया हुआ है. शिरोरोग, उरग्रह, मन्यास्तम्भ, जोडोंका जकडना, धनुर्वात बाहरकी खाज आदि रोगोंका नाश करता है ॥ ९–११ ॥

चैतन्ये–सूचीभरणो रसः ।

विषं पलमितं सूतं शाणकं चूर्णयेद्द्वयम् ।
तच्चूर्णं संम्पुटे धृत्वा काचलिप्तशरावयोः ॥ १ ॥
मृदं दत्वा च संशोध्य ततश्चुल्ल्यां निवेशयेत् ।


Aho ! Shrutgyanam

वह्निं शनैः शनैः कुर्यात्प्रहरद्वयसंख्यया ॥ २ ॥
ततश्चोद्घाट्य तन्मुद्रामुपरिस्थशरावकात् ।
संलग्नो यो भवेत्सूतस्तद्गृह्णीयाच्छनैः शनैः ॥ ३ ॥
वायुस्पर्शो यथा न स्यात्तथा कुप्यां निवेशयेत् ।
यावत्सूच्या मुखे लग्नं कुप्यां निर्याति भेषजम् ॥४॥
तावन्मात्रो रसो देयो मूर्च्छिते सन्निपातके ।
क्षुरेण प्रस्थिते मूर्ध्नि तत्राङ्गुल्या च घर्षयेत् ॥ ५ ॥
रक्तभेषजसंपर्कान्मूर्च्छितोऽपि हि जीवति ।
यदा तापो भवेत्तस्य मधुरं तत्र दीयते ॥ ६ ॥

शुद्ध तेलिया मीठा १ पल, पारा १ पल इन दोनोंको पीसकर कांचकी शीशीमें भर सकोरोंमें रख कपरमिट्टी मुद्रा कर धूपमें सुखावे फिर चूल्हेपर चढाकर दो प्रहरकी मन्दाग्नि देवे। जब ठंढा हो जाय तब संपुट खोले, जो काचके पात्रमें पारा लगा होवे उसे खुरच लेवे, हौले २ दूसरे पात्रमें भरकर वर्तावमें लावे. पवन न लगने देवे, फिर शीशीमें भरकर रख देय और जितना सुईके मुखमें लगे उतना काढे, सुईके अग्रभागकी बराबर मात्रा लेवे। मूर्छित सन्निपातवालेके मस्तकपर चक्कूसे थोडा चीरकर उँगलीसे मर्दन करे तो अचेत मूर्छित जीवे ऐसेही सांपका काटा भी मरावस्थासे जीवे और जिसे ताप होय तब उसे मीठा खवावे ॥ १-६ ॥

आमवाते-उदयभास्कररसः ।

पारदं गन्धकं दिव्यं व्योषं त्रिलवणानि च ।
सितकन्दा च वृद्धैला रसकर्पूरमेव च ॥ १ ॥
समानि सर्वतुल्यं च शुद्धं जैपालकं क्षिपेत् ।

Aho ! Shrutgyanam

बीजपूररसैर्भाव्यो रसो ह्युदयभास्करः ॥ २ ॥
पारदं गन्धकं व्योषं द्वौ क्षारौ लवणानि च ।
टंकणं चेति तुल्यानि जैपालं सकलैः समम् ॥ ३ ॥
भावना बीजपूरस्य सूक्ष्मं चूर्णं विचूर्णयेत् ।
संग्राह्यं रक्तिकायुग्मं वातं सामं विनाशयेत् ॥ ४ ॥
गोदुग्धं केवलं पथ्यं देयमुष्ट्रीपयोऽथवा ।
अन्नं च वर्जयेत्तावदामशोफं निवारयेत् ॥ ५ ॥

पारा, शुद्ध गंधक, सोंठ, मिरच, पीपल, तीनों नोन, मिश्री, बडी इलायचीके दाने, शुद्ध रसकपूर इन सबको बराबर ले शुद्ध जमालगोटेमें मिलाकर बिजौरेके रसकी तीन भावना देवे । यह उदयभास्कर रस है । पारा, गंधक, सोंठ, मिरच, पीपल, सज्जीखार, जवाखार, तीनों नोन ये सब बराबर लेवे, इन सबके बराबर सुहागा, जमालगोटा बराबर ले और चूर्ण कर बिजौरेके रसकी भावना देवे । इसको दो रत्ती प्रमाण मात्रा देवै तो संपूर्ण वातको नाश करे । और केवल गोदुग्ध या उँटनीका दूध पथ्यमें देवे। जबतक आमकी सूजन न जाय तबतक अन्न न खाय ॥ १-५ ॥

वातकासे भूतांकुशो रसः ।

शुद्धसूतस्य भागैकं द्विभागं शुद्धगन्धकम् ।
भागत्रयं मृतं ताम्रं मरिचं दशभागकम् ॥ १ ॥
मृताभ्रकं चतुर्भागं भागमेकं विषं क्षिपेत् ।
भूताङ्कुशस्य भागैकं सर्वमम्लेन मर्दयेत् ॥ २ ॥
यामं भूतांकुशो नाम माषैकं वातकासजित् ।
अनुपानं लिहेत्क्षौद्रं विभीतकफलत्वचा ॥ ३ ॥

Aho ! Shrutgyanam

शुद्ध पारा १ टंक, शुद्ध गन्धक १ टंक, तामेश्वर ३ टंक, मिर्च १० टंक, अभ्रक ४ टंक, तेलिया मीठा १ टंक सब इकट्ठी कर इमलीके रसमें एक प्रहर मर्दन करै, इस भूतांकुश रसको एक मासा ले शहद और बहेडेकी राखके साथ चाटनेसे वायुरोग और खांसी दूर हो जाता है ॥ १–३ ॥

तालकेश्वरः ॥

तालं ताप्यं शिला सूतं शुद्धं सैंधवटंकणम् ।
समांशं चूर्णयेत् खल्वे सूताद्विगुणगन्धकम् ॥ १ ॥
गन्धतुल्यं मृतं ताम्रं जम्बीर्यां दिनपंचकम् ।
मर्द्यं स्वद्भिः पुटे पाच्यं भूधरोदरसंपुटे ॥ २ ॥
पुटेपुटे द्रवैर्मर्द्यं सर्वमेकत्र षट्पलम् ।
द्विपलं मारितं ताम्रं लोहभस्म चतुःपलम् ॥ ३ ॥
जम्बीराम्लेन तत्सर्वं दिनं मर्द्यं पुटे लघु ।
त्रिंशदंशं विषं चास्य क्षिप्त्वा चूर्णं विमर्दयेत् ॥४॥
महिष्याज्येन संमिश्रं कर्षार्धं भक्षयेत्सदा ।
मध्वाज्यैर्वाकुचीचूर्णं कर्षमात्रं लिहेदनु ।
सर्वकुष्ठान्निहन्याशु महातालेश्वरो रसः ॥ ५ ॥

हरताल, सोनामक्खी, मनसिल, पारा शुद्ध, शिलाजीत, शोधा सुहागा इन सबको बराबर लेकर चूर्ण कर पारेसे दूना गंधक, गंधकके बराबर तामेश्वर लेकर जंबीरीके रसमें पांच दिन मर्दन करे। ऐसे ६ पुट देवे और जमीनमें गाड देवे। दो पुटोंमें जंबीरीका रस देता जाय सबका प्रमाण छः पल एकत्र कर दो पल तामेश्वर और लोहभस्म ४ पल इनको जंबीरीके रसमें एक दिन मर्दन करै. और तीसवां हिस्सा तेलिया मीठा डालकर चूर्ण कर भैंसके घीके साथ आधा

Aho ! Shrutgyanam

कर्ष भक्षण करे । घी, शहत इनके साथ बावचीका चूर्ण ४ टंक लेवे तौ संपूर्ण कोढोंका नाश करे । यह महातालकेश्वर रस है ॥ १-९ ॥

अतिसारे रसः ।

लवंगमहिफेनं च हिंगुलं शाल्मलीरसः ।
सितासमा गुटी ज्येष्ठा जलपीताऽतिसारजित् ॥ १ ॥

लवंग, अफीम, हींगलू, सेमल, मोचरस, मिश्री इन सबको बराबर लेकर बेरके प्रमाण गोली बनावे । एक गोली जलके साथ लेवे तो अतीसार दूर होवे ॥ १ ॥

अतिसारे--आनन्दभैरवरसः ।

दरदं वत्सनागं च मरिचं टंकणं कणा ।
चूर्णयेत् क्रमभागेन रसो ह्यानन्दभैरवः ॥ २ ॥
गुंजैका वा द्विगुंजा वा बलं ज्ञात्वा प्रयोजयेत् ।
मधुना लेहयेच्चानु कुटजस्य फलत्वचः ॥ ३ ॥
चूर्णितं कर्षमात्रं तु द्विदोषोत्थातिसारजित् ।
मध्याह्ने दापयेत्पथ्यं गोराज्यं तक्रमेव च ॥ ४ ॥
पिपासायां जलं शीतं विजयां निशि दापयेत् ॥ ५ ॥

शिंगरफ, तेलिया मीठा, मिरच, सुहागा, पीपल इन सबको बराबर लेवे और चूर्ण करे, इस आनन्दभैरव रसको एक वा दो रत्ती बलाबल देखकर शहदमें चटादेवे, कुडेकी छाल वा कुडेके फलका चूर्ण एक कर्षमात्र देवे तो द्विदोषज अतीसार दूर होवे । मध्यान्हमें गौका दूध तथा घृत और मट्ठा लेवे प्यास लगे तो टंढा जल पीवे या रात्रिको भांग पीवे ॥ २-५ ॥

Aho ! Shrutgyanam

कनकसुन्दररसः ।

हिंगुलं मरिचं गन्धं पिप्पली टंकणं विषम् ।
कनकस्य च बीजानि समांशं विजयाद्रवैः ॥ १ ॥
मर्दयेद्याममात्रेण चणकाभा वटी कृता ।
भक्षिता ग्रहणीं हन्ति रसः कनकसुन्दरः ॥ २ ॥

सिंगरफ, मिरच, गन्धक, सुहागा, पीपल, तेलियामीठा, धतूरेके बीज इनको समान भाग लेकर भांगके रसमें एकप्रहर घोटकर चनेके प्रमाण गोलियां बनावे । इन गोलियोंके खानेसे संग्रहणी नाश होवे ॥ १--२ ॥

अजीर्णे--क्रव्यादरसः ।

पलं रसस्य द्विपलं बलिः स्याच्छुक्लायसी चार्द्धं पलप्रमाणम्। संचूर्ण्य सर्वं द्रुतमग्नियोगादेरण्डपत्रेषु निवेशनीया ॥ १ ॥ पिष्ट्वाऽथ तां कज्जलिकां निदध्याल्लौहं च पात्रं वरपूतमस्मिन् । जम्बीरजं पक्करसं फलानि शतं तलेऽस्याग्निमथाल्पमात्रम्॥२॥ जीर्णे रसे भावितमेतदेतैः सुपंचकोलोद्भववारिपूतैः। सेवेतसाम्लैः शतपत्रयोज्यं समं रजष्टंकणजं सुमृष्टम् ॥ ३ ॥ विडं तदर्द्धं मरिचं समं च तत्सप्तवारं चणकाम्लतोयैः । क्रव्यादनामा भवति प्रसिद्धो रसस्तु मंथानकभैरवोक्तः ॥ ४ ॥ मासद्वयं सैन्धवतक्रपीतमेतस्य धन्वौ खलु भोजनान्ते । गुरूणि मांसानि पयांसि पिष्टैः कृतानि खाद्यानि फलानि वेगात ॥ ५ ॥ मात्रातिरिक्तान्यतिसेवितानि

Aho ! Shrutgyanam

यामद्वयाज्जारयति प्रसिद्धः । निहन्त्यजीर्णान्यपि षट्प्रकाराण्यग्निं करोति क्रमसेवनेन ॥ ६ ॥
कुर्याद्दीपनमुद्धतं च पवनं दुष्टामयो यक्ष्मणां ।
तुन्दस्थौल्यनिबर्हणं सुगहनं शूलार्तिनिर्मूलनम् ।
गुल्मप्लीहविनाशनो बहुरुजां विश्वासनः सन्ततं
सेव्यो ग्रंथिमहोदरापहरणः क्रव्यादनामा रसः ॥ ७ ॥

